# महाभारतम्- वनपर्व

## लक्षालङ्कारटीका-पाठान्तरादिसहितम् (क्रिटिकल् एडिशन्)

## भाग-2




**सम्पादकः**

सि. आर. प्रदीपसिंहाचार्यः चतुर्वेदः



**प्रकाशनम्**

वेद-वेदान्ताध्ययनशोधसंस्थानम्

वसन्तकुञ्ज, नवदेहली

विश्वविद्याग्रन्थमाला -8

वेदवेदान्ताध्ययनशोधसंस्थानम्

# श्रीमन्महाभारतम्

श्रीमन्महाभारततात्पर्यनिर्णय-महाभारतलक्षालङ्कारानुसारि-
प्राचीनतौळवपाठ-पाठान्तरादिसंवलितम्

# वनपर्व-१

सम्पादकः

सि. आर्. प्रदीपसिंहाचार्यः, चतुर्वेदः

उपसम्पादकाः

देवीप्रसादाचार्यः, आर् विठोबाचार्यः, श्रीनिधि.वि

प्रकाशनम्

वेद-वेदान्ताध्ययनशोधसंस्थानम्.
वसन्तकुञ्ज, नवदेहली.
2020

विश्वविद्याग्रन्थमाला- 8

**श्रीमन्महाभारतम्** **श्रीमन्महाभारततात्पर्यनिर्णय-महाभारतलक्षालङ्कारानुसारि-**

**वनपर्व-१** **प्राचीनतौळवपाठ-पाठान्तरादिसंवलितम्**

**सम्पादकः** : सि. आर् प्रदीपसिंहाचार्यः, चतुर्वेदः
**उपसम्पादकाः** : देवीप्रसादाचार्यः, आर् विठोबाचार्यः, श्रीनिधि.वि

**प्रकाशनम् :** **वेद-वेदान्ताध्ययनशोधसंस्थानम्.**
**वसन्तकुञ्ज, नवदेहली.**

**© सर्वे अधिकाराः स्वायत्तीकृताः**

**प्रथममुद्रणम् :** **2020**

**ISBN :** **978-81-998716-8- 7**

**पृष्ठसङ्ख्या :** **10+318**

**प्रतयः :** **250**

**मूल्यम् :** **200 रूप्यकाणि**

**मुखचित्रविन्यासः:** **कार्तिकः**

**मुद्रणालयः:** **वाणिप्रेस्. मैसूरु**

# Vedic Vedantic Studies & Research Institute

# Śrīmanmahābhāratam

## Vanaparva vol-1

**"Following the Mahābhāratatātparyanirṇaya and Lakṣālaṅkāra; including the Ancient Tulu Recension and Variant Readings.**


**Edited by:**

**C. R. Pradeepa simha achaya, chaturveda.**

**Sub-editors**

Devīprasādācārya, R. Viṭhobācārya, Śrīnidhi, v.



**Published by:**

**Vedic Vedantic Studies & Research Institute**

**(Eetablished under SRI RAMA VITTALA SHIKSHANA SEVA SAMITI New Delhi)**

Sri Krishna Dhama, Plot No-3, Phase-II, Institutional Area,
vasant Kunj, New Delhi-110070

**2020**

**Vishvavidyagranthamala -8**

## Śrīmanmahābhāratam - Vanaparva vol-1

"Following the Mahābhāratatātparyanirṇaya and Lakṣālaṅkāra;
including the Ancient Tulu Recension and Variant Readings.

**Edited by:** **C. R**. vd. **Pradeepa simha achaya, chaturveda.**

**Sub-editors :** **Devīprasādācārya, R. Viṭhobācārya, Śrīnidhi, v.**

**Published by:** **Vedic Vedantic Studies & Research Institute**
(Eetablished under SRI RAMA VITTALA SHIKSHANA SEVA SAMITI New Delhi)
Sri Krishna Dhama, Plot No-3, Phase-II, Institutional Area,

**ISBN :** **978-81-998716-8-7**

**Edition:** **2020**

**copies :** **250**

©: **Publishers**

**Price:** **200**

**pages** **10 + 332**

**printed by:** **Vanipress.Mysore**

# जगद्गुरुश्रीमन्मध्वाचार्यमूलमहासंस्थानम्

**पेजावरअधोक्षजमठः,उडुपि**

## अनुग्रहसन्देशः

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥

श्रीमन्महाभारतं न केवलं कौरव-पाण्डवानां कथा, अपि तु धर्म-अधर्मयोः नित्यसङ्घर्षस्य निदर्शनम्। तत्र 'वनपर्व' (अरण्यपर्व) पाण्डवानां जीवने अत्यन्तं महत्त्वपूर्णप्रसङ्गः । राज्यभ्रष्टाः, वनवासिनः च सन्तः पाण्डवाः कथमपि सत्यं धर्मं च न त्यक्तवन्तः इति अस्मात् प्रसङ्गात् लब्धः मुख्यः सन्देशः। "धर्मो रक्षति रक्षितः" इति वचनस्य प्रत्यक्षम् उदाहरणं वनपर्वणि दृश्यते।

इदानीं वेदवेदान्ताध्ययनशोधसंस्थानेन वनपर्वणः अयं प्रथमः भागः प्रकाश्यते। अस्मिन् भागे वनपर्वणः अरण्यपर्व-किर्मीरवधपर्व-कैरातपर्वाणि संयोजितानि। द्यूते पराजयेन खिन्नानां पाण्डवानां वनप्रवेशः, तत्र ऋषिभिः सह संवादः, किर्मीरसंहारः, अर्जुनस्य किरातरूपिणा रुद्रेण सह समागम इत्यादयो विषया अत्र निरूपिताः।

अस्य ग्रन्थस्य सम्पादनकार्यं अस्माकं संस्थानस्य प्रधानसम्पादकैः, शास्त्रज्ञैः विद्वान् श्रीप्रदीपसिंहाचार्यैः अत्यन्तं निष्ठया कृतम्। तैः सह सहसम्पादकरूपेण श्री आर् विठोबाचार्यः, श्री.वि.श्रीनिधिआचार्यश्च परिश्रमं कृतवन्तौ। एतेषां विदुषां शास्त्रसेवा अभिनन्दनार्हा।

अनेन ग्रन्थप्रकाशनेन लोके धर्मजागृतिः, ज्ञानप्रसारश्च भवतु। ग्रन्थस्य सम्पादकानां, प्रकाशकानां तथा सर्वेषां पाठकानां च श्रीमन्मध्ववल्लभ-अस्मदुपास्यश्रीरामविठ्ठलपूर्णानुग्रहः सदा भवत्वित्याशास्महे

इति नारायणस्मृतयः

**श्रीश्रीविश्वप्रसन्नतीर्थश्रीपादाः**

# निदेशकवचांसि

श्रीमन्महाभारतस्य शतसाहस्र्यां संहितायां 'वनपर्व' (अरण्यपर्व) इति भागः पाण्डवानां जीवनसंघर्षस्य, आध्यात्मिकसाधनायाः च दर्पण इव वर्तते। राज्यसुखात् भ्रष्टाः पाण्डवाः वनेषु कथं संयमेन, धर्मनिष्ठया च कालम् अनाययन् इत्यत्र निरूपितम्।

अद्य वेदवेदान्ताध्ययनशोधसंस्थानेन वनपर्वणः अयं प्रथमः भागः विदुषां पुरतः सोत्साहं समुपस्थाप्यते।

अस्मिन् ग्रन्थभागे 'किरातपर्व' इति अत्यन्तं रोमाञ्चकारी, महत्त्वपूर्णश्च । भाविमहायुद्धस्य सन्नाहरूपेण अर्जुनेन कृता घोरतपस्या, तस्य धैर्यपरीक्षायै व्याधरूपेण आगतस्य परमेश्वरस्य लीला, तयोः द्वन्द्वयुद्धं, अन्ते च अर्जुनाय 'पाशुपतास्त्रप्रदानम्' — इत्यादयः प्रसङ्गाः अस्मिन् भागे सविस्तरं वर्णिताः। "कष्टेन विना महत् फलं न लभ्यते" । तथा च "दैवानुग्रहेणैव पौरुषं फलति" इति नीतिरत्र स्पष्टीभवति।

अस्य महार्हग्रन्थस्य प्रकाशने अस्माकं संस्थानस्य प्रेरणाशक्तिः, मार्गदर्शकाः च श्रीपेजावरमठाधीश्वराः, परमपूज्य श्रीश्रीविश्वप्रसन्नतीर्थश्रीचरणाः। पूज्यपादानां शास्त्रसंरक्षण-विषयिणीम् आसक्तिं, शोधसंस्थानं प्रति तेषां वात्सल्यं च स्मरन्तः वयं तेषां पादपद्मयोः सविनयं साष्टाङ्गप्रणामान् कृतज्ञतां च निवेदयामः।

ग्रन्थस्यास्य प्रधानसम्पादकाः, शास्त्रमर्मज्ञाः विद्वान् श्रीप्रदीपसिंहाचार्याः अतीव श्रद्धया, संशोधनेन च ग्रन्थमिमं सम्पादितवन्तः। तान् प्रति वयं भूयसीं कृतज्ञतां व्याहरामः। तथा अस्मिन् कार्ये पाठशोधनादिना बहु साहाय्यं कृतवद्भ्यः सहसम्पादकेभ्यः , देवीप्रसादाचार्य,श्रीविठोबाचार्य, श्रीश्रीनिधि-वि-महोदयेभ्यः च वयं कार्तज्ञ्यं प्रकटीकुर्मः।

अनेन ग्रन्थप्रकाशनेन महाभारतजिज्ञासूनां महान् उपकारो भविष्यतीति अस्माकं दृढः विश्वासः। श्रीहरिवायुगुरुणां अनुग्रहेण सतां ज्ञानसमृद्धिः भूयात्।

विद्वान् डा। धनञ्जयाचार्यः
निदेशकः,

# सम्पादकीयम्

श्रीमन्महाभारतस्य कथावस्तुनि 'वनपर्व' (अरण्यपर्व) इति भागः पाण्डवानां जीवनस्य परीक्षाकालः । राजसुखं परित्यज्य वनेषु भ्रमन्तः पाण्डवाः कथमपि धर्मं न जहुः इति अत्रत्यः मुख्यः सन्देशः। अद्य वेदवेदान्ताध्ययनशोधसंस्थानेन वनपर्वणः अयं प्रथमः भागः विदुषां पुरतः समुपस्थाप्यते। अस्मिन् भागे पर्वणः उपपर्वत्रयं (किरातपर्वपर्यन्तम्) समाविष्टम्।

भाविकुरुक्षेत्रयुद्धे विजयप्राप्तये दिव्यास्त्राणाम् आवश्यकतां जानन् व्यासः, अर्जुनं प्रति तपः आचरितुम् आदिदेश। तदनुसारं इन्द्रकीलपर्वते अर्जुनेन घोरं तपः आचरितम्। तस्य परीक्षां कर्तुं, अनुग्रहं च दातुं भगवान् शङ्करः 'किरातवेषेण' आगतः। तत्र वराहरूपिणः मूकदानवस्य संहारविषये अर्जुन-किरातयोः विवादः जातः, ततः घोरं युद्धं च प्रवृत्तम्।

भक्तस्य अर्जुनस्य क्षात्रतेजसः परीक्षां कृत्वा, अन्ते च शिवः स्वस्वरूपं प्रदर्श्य तस्मै 'पाशुपतास्त्रं' प्रायच्छत्। "शस्त्रेण रक्षिते राष्ट्रे शास्त्रचिन्ता प्रवर्तते" इति न्यायेन, दुष्टशिक्षणाय शक्तिः (अस्त्रं) अपि आवश्यकी । तथा च सा शक्तिः ईश्वराधीना भवेत् इति तत्त्वं किरातपर्वणि स्पष्टीभवति।

एतादृशस्य वीररसप्रधानस्य, भक्तिरसपूर्णस्य च ग्रन्थस्य सम्पादने गुर्वनुग्रह एव शरणम् । अस्य महतो ग्रन्थस्य प्रकाशने परमपूज्याः, श्रीपेजावरमठाधीश्वराः, श्रीश्रीविश्वप्रसन्नतीर्थ-श्रीचरणा एव मुख्यप्रेरणास्रोतोभूताः। तेषां सततप्रोत्साहनेन, आशीर्वादेन च इदं कार्यं सम्पन्नम्। पूज्यपादानां चरणकमलयोः सश्रद्धं साष्टाङ्गप्रणामान् समर्पयामि।

तथैव, अस्मिन् कार्ये सर्वविधं सहकारं,दत्तवद्भ्यः वेदवेदान्ताध्ययनशोधसंस्थानस्य निदेशकेभ्यः श्रीधनञ्जयाचार्येभ्यः अहं विशेषरूपेण कृतज्ञतां निवेदयामि।

अस्य ग्रन्थस्य सम्पादनकार्ये पाठशोधने, विषयसंग्रहणे सहसम्पादकैः देवीप्रसादाचार्यैः, श्रीविठोबाचार्यैः,तथा श्रीश्रीनिधि-वि-आचार्येण च महता परिश्रमेण साहाय्यं कृतम्। तत् सर्वथा श्लाघनीयम्। तेभ्यः सर्वेभ्यः मम धन्यवादाः।

अन्ते, अयं ग्रन्थः महाभारतजिज्ञासूनां, विदुषां, शोधच्छात्राणां च ज्ञानवृद्धये भूयात् इति प्रार्थये

विद्वद्वशंवदः

प्रदीपसिंहाचार्यः , चतुर्वेदः

# किञ्चिन्निवेदनम्

'देशे देशे तथा ग्रन्थान् दृष्ट्वा कतिपयान्' इत्यादि श्रीमदाचार्यैः तात्पर्यनिर्णये अभिहितम् । तेन महाभारते नानाविधाः पाठभेदाः सन्तीति अवगम्यते । पूना महानगरगतभण्डार्कर् प्राच्यविद्यासंशोधनालयेन षट्त्रिंशद्वर्षपर्यन्तं महाभारतमूलपाठमधिकृत्य अधीत्य मुद्रितं च तत् क्रिटिकलूएडिषन्मुखेन । तदेव इदानीम् अत्यन्तप्राचीनपाठान्तरसंवलितः महाभारतपाठः इति अनेकेषां विदुषाम् अभिप्रायः । परन्तु, ततोऽपि अधिकप्राचीनतमपाठः उडुपीनगरस्थनानामठीय-ताळपत्रग्रन्थेषु इदानीं समुपलब्ध इति महान् सन्तोषः ।

पञ्चदशाधिकाः महाभारतताळपत्राः इदानीम् अस्मद्धस्तपथं गताः । तत्पर्यालोचनया मूलपाठनिर्धारणे वयं प्रभवाः स्मः । ताळपत्रगतपाठाः वाविळ्ळप्रेस्द्वारा मुद्रितमहाभारतपाठस्य अत्यन्तसंवादि । यत्र विसंवादस्तत्रापि तात्पर्यनिर्णयानुरोधि पाठ एवात्रादृतः । तदेवं अस्मिन् शुद्धपाठसमीक्षासमये अस्माभिः मूलश्लोकतया पलिमारुमठीयताळपत्रगतपाठः आदृतः । श्लोकसङ्ख्याविषये प्रायः वावीळ्ळक्रम आदृतः । क्वचित् मूलश्लोकाः वावीळ्ळपाठे अदृश्यमाना अपि ताळपत्रे, टि.आर् पाठे, बोरि पाठेपि विद्यमानाः अर्थ-तात्पर्यानुरोधात् अस्मिन् संस्करणे आदृताः ।

एतत्संस्करणाध्ययने अस्माभिरादृतः अध्येतृभिरवश्यं वेदितव्यः विना यद्वेदेनेनात्रादृतक्रमानधिगमस्तदत्रैवं निरूप्यते ।

*. क्रिटिकल् एडिषन् मध्ये तालपत्रेषु वाविळ्ळे वा अविद्यमानाः श्लोकाः 'अधिकः/ अथवा ins' इति निर्दिष्टः । तद्यथा -

एतदिच्छाम्यहं श्रोतुं वदतो द्विजसत्तम ।
आनुपूर्व्येण ये चान्ये राजानो वंशधारिणः ।।

(२) व्यासतो for वदतो (क); विस्तरेण द्विजोत्तम (ग); द्विजोत्तमः; तपोधन;

after line 1 ins (६९६) वर्णसङ्करजो धर्मः कथं तं नास्पृशत्तदा ।
जरासञ्चारणं चापि अन्यदेहेषु नः श्रुतम् ।। (अधिकः घपाठे)

* बोरि क्रिटिकल् पुस्तके appendix निर्दिष्टाः केचनश्लोकाः appendix इत्येव श्लोकाधस्तनभागे निर्दिष्टाः ।

*. क्वचित्तु soubstitute इति पाठान्तर एव निर्दिष्टाः ।

*. श्लोकसङ्ख्याविषये अयं क्रमः अदृतः । प्रारम्भगतसङ्ख्या आपर्वम् अनुवर्तते । अध्यायान्ते आहत-अध्याय-श्लोकसङ्ख्या निर्दिष्टा यथा 'अस्मिन्नध्याये श्लोकाः सन्ति' इत्येवम् ।

*. भागवतमहाभारतयोः ताळपत्रेषु अयमपि एकः पाठभेदः दरीदृश्यते । भागवतपाठेषु शुक उवाच; परीक्षिदुवाच; राजोवाच इत्यादि पठ्यते क्वचित् । क्वचित् श्रीशुकः इत्येव । महाभारते तु सर्वत्र उवाच इति नैव पठ्यते । कुम्भकोणमुद्रितपुस्तके एवं बोरि पुस्तकेपि उवाचशब्दः पठ्यते । अयं नास्माभिरादृतः । केवलं जनमेजयः; भीमसेनः इत्याद्येव ।

* बोरिपुस्तके मध्ये मध्ये अध्यायाः यत्र परिसमाप्यन्ते तत्र वाविळ्ळपुस्तके अध्यायः नैव समाप्यते । एवं टि. आर् कृष्णाचार्यपाठेपि । अत्र प्राचीनतौळवपाठ एव आदृतः । यत्र द्वयोरध्यायोः एकीभावः तत्र बोरिपुस्तकपत्रसङ्ख्या क्वचिद्दत्ता; क्वचिन्नैव ।

*. line interpretation; आनुपूर्वीव्यत्यासः' यत्र दृश्यते तदपि सूचितः । तत्र निर्देशक्रमः एकरूपतया नैव निर्दिष्टः ।

*. पर्वारम्भे महाभारततात्पर्यनिर्णयगताः तत्पर्वकथासङ्ग्रहश्लोकाः उपनिबद्धाः ।

*. महाभारतकथाविषयानुक्रमणिकापि श्लोकानुसारेण प्रत्यध्यायं विस्तरतो निवेशिता

१*.यद्यपि महाभारतलक्षालङ्कारः एम्. एस्. पि द्वारा मुद्रितः । अत्र विद्यमानाध्याय-श्लोकसङ्ख्यादि न वावीळ्ळ-टि.आर् पाठानुसारी इति केवलं विषयमात्रमत्र निवेशितम् । अध्यायसङ्ख्यादि तौळवपाठानुसार्येवेति चावगन्तव्यम् ।।

*.लक्षालङ्कारे व्याख्याताः श्लोकाः क्वचित् वावीळ्ळपुस्तके नोपलभ्यन्ते । टि.आर् कृष्णाचार्यपाठे उपलभ्यन्त इति तेपि मूलश्लोकतया क्वचिद् ग्राह्या भवन्तीत्यस्माकमाशयः । महन्तः प्रष्टव्याः

*. मूलश्लोकाः बृहदक्षरै राराज्यन्ते । अधिकश्लोकाः अल्पाक्षरैः मूलश्लोकमध्य एव अर्थानुगुणाः विषयविशेषगर्भिताः मूलश्लोकानां पूर्वं पश्चाद्वा, पूर्वार्ध-उत्तरार्धमध्ये वा अनङ्कितसङ्ख्याः निवेशिताः । एतेषां महाभारतान्तर्गतत्वं वा अनन्तर्गतत्वं वा न निश्चेतुं प्रभवामः ।।

*.तत्र पाठान्तरदानसमये पूना(बोरि)पाठान्तराणि अपि निर्दिष्टानि । तद्यथा-

एवं पाठान्तरदानसमये आदृताः अपरेपि विशेषाः एवं निर्दिष्टाः –

सर्वमूलग्रन्थटीका-टिप्पणीषु महाभारतपाठः

* श्रीमन्मध्वाचार्यैः तत्र तत्र महाभारतवचनानि 'भारते, मोक्षधर्मपर्वणि' इत्यादिरूपेण नामनिर्देशमात्रेणसूचितानि।तानिकेचनउपलभ्यन्ते,नोपलब्धानिबहूनिइत्यनेकेषांप्रवादः। अस्माभिः अस्मिन् संस्करणे श्रीमदाचार्योदाहृतवचननां आकरमपि पर्व-अध्याय-श्लोकसङ्ख्या-निर्देशपूर्वकमाकरः प्रादर्शि । यथा -गीताभाष्ये 'अनन्तग अनन्त' इत्येवोदाहृतम् । अस्माभिः अस्य शान्तिपर्वान्तर्गतत्वं संशोध्य '(सर्वमूलो-) गीताभाष्योदाहृत-महाभारतवचनानि 'इति सङ्गृह्य पर्वारम्भे स्थलनिर्देशपूर्वकं १२-१३१-५ इत्येवं निर्दिश्यते ।।

* सर्वमूलेषु- महाभारतवचनतया अनुदाहृतान्यपि प्रमणवचनानि 'इतिच' इत्येवं रूपेण निबद्धानि । यथा गीताभाष्ये 'पृथिवी धर्ममूर्धनि' इति च ' इति। एतादृशानि वाक्यान्यपि अस्मदीयमहाभारतसंशोधनावसरे संशोध्य आकरप्रदर्शनपूर्वकं निर्दिष्टानि ।

* किञ्च महाभारतवाक्यानि टिप्पणीषु तत्र तत्र प्रासङ्गिकतया उदाहृतानि ।

एवं भागवतयादुपत्ये -शर्यातिकथाप्रसङ्गे आदिपर्ववचनमुदाहृतम् - 'यथोक्तमादिपर्वणि- जिगीषया ततो देवा वव्रिरे.. इत्यारभ्य 'दुहिता वृषपर्वणः ' इत्यन्तः ८० श्लोकाः ।

भरतराट्कथाप्रसङ्गेपि - आदिपर्ववचनम् -'तां विशोध्य तदा राजा देवदूतेन भारत... इत्यारभ्य 'मया शुभे' इत्यन्तो भागः ।

विश्वामित्रप्रसङ्गे गदापर्ववचनमुदाहृतम् -'सतु वव्रे वरं राजन् ब्राह्मणः स्यामहं त्विति । तथेति चावदद् ब्रह्मा सर्वलोकपितामहः इति गदापर्वणि' इति ।।

एवं उद्योगपर्ववचनम् -'प्रतिगृह्य ततो धर्मः... विश्वामित्रस्तथाभवत् ।

एवं शान्तिपर्ववचनम् -च्यवनाद्वरदानेन रुचिकस्य ... ब्राह्मण्यं समवाप्तवान् ।।'

एतादृशग्रन्थसम्पादनकाले सहकृतवभ्द्यः समेभ्यः विदूवभ्द्यः धन्न्यवादः ।।

सम्पादकमण्डली

# १.आरण्यकपर्व

## श्रीमन्महाभारततात्पर्यनिर्णये

## आरण्यकपर्वकथासङ्ग्रहः

द्वाविंशोध्याये -

आगन्तुकामान् पुरवासिनस्ते संस्थाप्य कृच्छ्रेण कुरुप्रवीराः ।
रात्रौ प्रविष्टा गहनं वनं च किर्मीरमासेदुरथो नराशम् ॥ १ ॥

महाभारते- वनपर्वणि १- ९ अध्याया

### प्रथमोऽध्यायः

द्यूतजितानां पाण्डवानां द्रौपद्या सह वनं प्रति प्रस्थानम् ॥ १ ॥ तदनु पौरैः दुर्योधनगर्हणपूर्वकं पाण्डवैस्सहारण्यवासेच्छया तदनुगमनम् ॥ २ ॥ युधिष्ठिरेण प्रार्थनया तेषां पुरं प्रति निवर्तनपूर्वकं सायं गङ्गातीरगतवटमेत्य तत्रानुगतब्राह्मणैस्सह सुखेन रात्रियापनम् ॥ ३ ॥

**जनमेजयः**

**एवं द्यूतजिताः पार्थाः कोपिताश्च दुरात्मभिः ।**
**धार्तराष्ट्रैः सहामात्यैर्निकृत्या द्विजसत्तम ॥ १ ॥**

**श्राविताः परुषा वाचः सृजद्भिर्वैरमुत्तमम् ।**
**किमकुर्वत कौरव्या मम पूर्वपितामहाः ॥ २ ॥**[1]

**कथं चैश्वर्यविभ्रष्टाः सहसा दुःखमेयुषः ।**
**वने विजह्रिरे पार्थाः शक्रप्रतिमतेजसः ॥ ३ ॥**[2]

---

(१)(२) सृजन्ती; सुहृद्भिः (for सृजद्भिः), (३) अकुर्वत, कौन्तेया (for कौरव्या ),
(२)(१) वै (for चै ), कथमै$^0$ for चै)$^0$श्वर्यभूयिष्ठाः (२) ईयुषः (for एयुषः) (३) वने विजह्रुः पार्थास्ते,

**के चैनानन्ववर्तन्त प्राप्तान्व्यसनमुत्तमम् ।**
**किमाचाराः किमाहाराः क्व च वासो महात्मनाम्** ॥ ४ ॥[१]

**कथं द्वादश वर्षाणि वने तेषां महात्मनाम् ।**
**व्यतीयुर्ब्राह्मणश्रेष्ठ शूराणामरिघातिनाम्** ॥ ५ ॥[२]

**कथं च राजपुत्री सा प्रवरा सर्वयोषिताम् ।**
**पतिव्रता महाभागा सततं सत्यवादिनी** ॥ ६ ॥[३]

**वनवासमदुःखार्हा दारुणं प्रत्यपद्यत ।**
**एतदाचक्ष्व मे सर्वं विस्तरेण तपोधन** ॥ ७ ॥[४]

**श्रोतुमिच्छामि चरितं भूरिद्रविणतेजसाम्।**
**कथ्यमानं त्वया विप्र परं कौतूहलं हि मे** ॥ ८ ॥[५]

वैशम्पायनः

**एवं द्यूतजिताः पार्थाः कोपिताश्च दुरात्मभिः ।**
**धार्तराष्ट्रैः सहामात्यैर्निर्ययुर्गजसाह्वयात्** ॥ ९ ॥[६]

**वर्धमानपुरद्वारेणाभिनिष्क्रम्य पाण्डवाः ।**
**उदङ्मुखाः शस्त्रभृतः प्रययुः सह कृष्णया** ॥ १० ॥[७]

**इन्द्रसेनादयश्चैतान् भृत्याः परि चतुर्दश ।**

---

(१)(१) वै तान्; चैतान् (for चैनान् ), (२) प्राप्य-ङ,अन्वगच्छन्त,(३) आहाराः, आचाराः,
(२)(१) कथं च द्वादश समा-कृपाठः,(२) महामुने-कृ पाठः; तरस्विनां (for महात्मनाम्, वने निवसतां सतां, (४) अनिवर्तिनां; परघातिनां (अरि$^0$)
(३)(३) सत्य$^0$ (for पति$^0$ ), (४) द्रौपदी, (for सततं ) संशितव्रता, प्रिय$^0$, ब्रह्म$^0$, (for सत्यं),
(४)(१) वने वासमनर्हा च , (२)सा कथं (for दारुणं)
(५)(३) वेत्तुम् (for श्रोतुम्), तत्सर्वं (for चरितं) (४) $^0$चेतसां,
(६)(१) ततो (for एवं) (४) नियुज्य, (for निर्ययुः) नाग$^0$ (for गज$^0$ ),
(७)(१)गृह for $^0$पुर), $^0$द्वारादभि-कृपाठः , तेनघ (for ते तदा ) (३) जातदुःखाः (for उद$^0$)

**रथैरनुययुः शीघ्रैः स्त्रिय आदाय सर्वशः ॥ ११ ॥**[१]

**ततस्ते पुरुषव्याघ्रा रथानास्थाय भारत ।**

**ददृशुर्जाह्नवीतीरे प्रमाणाख्यं महावटम् ॥ १२ ॥**[२]

**व्रजतस्तान्विदित्वा तु पौराः शोकाभिपीडिताः ।**

**गर्हयन्तोऽसकृद्भीष्मविदुरद्रोणगौतमान् ।**

**ऊचुर्विगतसन्त्रासाः समागम्य परस्परम् ॥ १३ ॥**[३]

पौराः

**नेदमस्ति कुलं सर्वं न वयं न च नो गृहाः ।**

**यत्र दुर्योधनः पापः सौबलेयेन पालितः ॥ १४ ॥**[४]

**कर्णदुःशासनाद्यैश्च राज्यमेतच्चिकीर्षति ॥ १५ ॥**[५]

**नो चेत् कुलं न चाचारो न धर्मोऽर्थः कुतः सुखम् ।**

**यत्र पापसहायोऽयं राज्यमेव बुभूषते ॥ १६ ॥**

लक्षालङ्कारः- राज्यमेव बुभूषत इत्यत्र 'भू प्राप्तवात्मनेपदी वा' इति वचनात् प्राप्तुमिच्छतीत्यर्थः ॥

---

(१)(१)चैव-कृपाठः; चैतान् (for चैनान्) (२) भृत्यवर्गाश्चतुर्दश,(३) शीघ्रं (४) चादाय (for आदाय )

(२)(२) आदाय (for आस्थाय) सर्वशः (for , भारत)

(३)(१) गतानेतान्; प्रजग्मुस्तान् (for व्रजतस्तान्) (२) शोकेन (for शोकाभि°) कर्शिताः; शोकसमन्विताः (समाप्लुताः) (३) ते शपन्तो (for गर्ह°) तदा (for (अ)सकृद् ,°भीष्मं (for भीष्म°) (५) ऊचुर्वै समयं (°रं) कृत्वा, (४)समासाद्य; ते समन्त्र्य; ते सङ्गम्य; समवेत्य (for समागम्य)

(४)(४) सौबलेनाभि ($^0$नु) पालितः-कृपाठः, $^0$लेन च सङ्गतः; $^0$लेन समन्वितः.

(५)(१) $^0$नाभ्यां च- कृपाठः, (२)राज्यं शासितुमिच्छति,

**दुर्योधनो गुरुद्वेषी त्यक्ताचारसुहृज्जनः ।**
**अर्थलुब्धोऽतिमानी च नीचः प्रकृतिनिर्घृणः ॥ १७ ॥**(१)

**नेयमस्ति मही कृत्स्ना यत्र दुर्योधनो नृपः ।**
**साधु गच्छामहे सर्वे यत्र गच्छन्ति पाण्डवाः ॥ १८ ॥**(२)

**सानुक्रोशा महात्मानो विजितेन्द्रियशत्रवः ।**
**ह्रीमन्तः कीर्तिमन्तश्च धर्माचारपरायणाः ॥ १९ ॥**

**वैशम्पायनः**

**एवमुक्त्वानुजग्मुस्ते पाण्डवांस्तान्समेत्य च ।**
**ऊचुः प्राञ्जलयः सर्वे तान् कुन्तीमाद्रिनन्दनान् ॥ २० ॥**(३)

पौराः

क्व गमिष्यथ भद्रं वस्त्यक्त्वास्मान्दुःखभागिनः ।
**वयमप्यनुयास्यामो यत्र यूयं गमिष्यथ ॥ २१ ॥**(४)

**अधर्मेण जिताञ्छ्रुत्वा युष्मां स्त्यक्तघृणैः परैः ।**
**उद्विग्नाः स्मो भृशं सर्वे नास्मान्हातुमिहार्हथ ॥ २२ ॥**(५)

**भक्तानुरक्तान्सुहृदः सदा प्रियहिते रतान्।**
**कुरुराजाधिष्ठिते राज्ये न विनश्येम सर्वशः ॥ २३ ॥**(६)

---

(१)(१) मातापितृ$^0$ (for दुर्योधनो ), सदामर्षी; गुणद्वेषी, (२) त्यक्ताचारः कुरूद्वहः ; त्यक्तधर्मः प्रियानृतः, (३) लुब्धस्तब्धो (for अर्थ$^0$) (ऽ)भि$^0$ (for ऽति$^0$ ) (४) नीचप्रकृति$^0$; नीचः परम$^0$.

(२)(१) सर्वा (for कृत्स्ना) त्यजेम हि महीं कृत्स्नां, (३) तत्र (for साधु ) यत्र (for सर्वे), गच्छामः सहिताः सर्वे, (४) पाण्डवा जितमन्यवः.

(३)(१)तान् (for ते, समन्यवः, समेत्य तु, (३) तत्र (for सर्वे, (४)कौन्तेयान्पाण्डुनन्दनान्-कपाठः; कौन्तेयान्माद्रि$^0$- कृपाठः; पौरास्तान्पाण्डु°,

(४)(१) कथं यास्यथ, (३)तत्रैव (forअप्यनु° )

(५)(३) सु (for स्म ), (४) त्यक्तुम् (for हातुम् ),

(६)(१) भक्तान्सुसुहृदः सर्वान्; (२) तथा; सर्वे ; (for सदा), स्थितान् ; रताः (for रतान्) सदा प्रियहितेप्सितान् -घ; सर्वे नित्यसमाहिताः (३) देशे (for राज्ये), (४) न रंस्यामश्चिरं वयं ; न हि

**श्रूयतां चाभिधास्यामो गुणदोषान्नरर्षभाः ।**
**शुभाशुभाधिवासेन संसर्गः कुरुते यथा ॥ २४ ॥[१]**

**वस्त्रमापस्तिलान् भूमिं गन्धो वासयते यथा।**
**पुष्पाणामधिवासेन तथा संसर्गजा गुणाः ॥ २५ ॥[२]**

**मोहजालस्य योनिर्हि मूढैरेव समागमः ।**
**अहन्यहनि धर्मस्य योनिः साधुसमागमः ॥ २६ ॥[३]**

**तस्मात्प्राज्ञैश्च वृद्धैश्च सुस्वभावैस्तपस्विभिः ।**
**सद्भिश्च सह संसर्गः कार्यः शमपरायणैः ॥ २७ ॥[४]**

**येषां त्रीण्यवदातानि विद्या योनिश्च कर्म च ।**
**ते सेव्यास्तैः समास्या हि शास्त्रेभ्योऽपि विशिष्यते ॥ २८ ॥[५]**

लक्षालङ्कारः- ते सेव्यास्तैः समास्या हि इत्यत्र समास्या समागमः । 'आस उपवेशने' इति धातोः स्वार्थे यत्प्रत्यये कृते तप एव तपस्योतिवत्, समसनमेव समस्येतिवच्च सहोपवेशनमेव समास्या ।।

**निरारम्भा ह्यपि वयं पुण्यशीलेषु साधुषु ।**
**पुण्यमेवाप्नुयामेह पापं पापोपसेवनात् ॥ २९ ॥[६]**

---

स्थास्याम सर्वशः,
(१)(१)श्रूयन्तां -कृपाठः (२) गुणान्दोषान्; गुणदोषौ; गुणं दोषं, नराधिपाः (for नर$^0$ ) (३) शुभाशुभविशेषांश्च (४) संसर्गः; संशयः (for संसर्ग ),
(२)(१) अपोवस्त्रं -कृपाठः, आपः अम्भः; अद्भिः ; (for आपः), तिला भूमिं,
(३) (१) मूलनाशस्य ; (२) सह (for एव)
(४) (२) शुद्धभावैः, स्थिरभावैः-ङ
(५) (२) विद्या योनिः; विद्या धर्मः ; (३) ते सेव्यास्तैः ; समस्या हि ; समस्ता हि, तान्सेवेत विशेषेण ; (४) सर्वेभ्योपि ; गरीयसी-घ,कृपाठः; शास्त्रं येषां हि कारणं,
(६)(१) निरानन्दा ; (३) पुण्यार्थं वस्तुमिच्छामः (४) पापं पापेन सेवनात् ; पापं स्यात्पाप$^0$; पापं पापानु$^0$;

**असतां दर्शनात्स्पर्शात्सम्भाषणसहासनात्।**
**धर्माचाराः प्रहीयन्ते न च सिद्‌ध्यन्ति मानवाः।। ३० ।।[१]**

**बुद्धिश्च हीयते पुंसां नीचैः सह समागमात्।**
**मध्यमैर्मध्यतां याति श्रेष्ठतां याति चोत्तमैः ।। ३१ ।।[२]**

अनीचैर्नाप्यविषयैर्नाधर्मिष्ठैर्विशेषतः ।[३]

**ये गुणाः कीर्तिता लोके धर्मकामार्थसम्भवाः ।**
**लोकाचाराच्च सम्भूता वेदोक्ताः शिष्टसम्मताः ।। ३२ ।।[४]**

**ते युष्मासु समस्ताश्च व्यस्ताश्चैवेह सद्गुणाः ।**
**इच्छामो गुणवन्मध्ये वस्तुं श्रेयोऽभिकाङ्क्षिणः ।। ३३ ।।[५]**

**युधिष्ठिरः**

**धन्या वयं यदस्माकं स्नेहकारुण्ययन्त्रिताः ।**
**असतोऽपि गुणानाहुर्ब्राह्मणप्रमुखाः प्रजाः ।। ३४ ।।[६]**

**तदहं भ्रातृसहितः सर्वान्विज्ञापयामि वः ।**
**नान्यथा तद्धि कर्तव्यमस्मत्स्नेहानुकम्पया ।। ३५।।**

**भीष्मः पितामहो राजा जननी विदुरश्च मे।**
**सुहृज्जनश्च प्रायो मे नगरे नागसाह्वये ।। ३६ ।।[७]**

---

(१) (१) दर्शन⁰ (for दर्शनात्), (२) सञ्जल्पाच्च ; सञ्जल्पेन (संसर्गेण;) (for सञ्जल्पन-कृपाठः) (३) धर्माचारात् (४) सिध्यन्ति न च-कृपाठः;
(२)(३) मध्यैश्च (for मध्यमैः ) मध्यैर्मध्यस्थ⁰ ; तां याति (४) श्रेष्ठैः श्रेष्ठत्वमाप्नुयुः.
(३)(पं- (१)न नीचैर्नाप्यविदुषैर्नाधर्मज्ञैर्वा,)
(४)(३) लोकाचारेषु -कृपाठः; लोकाचाराश्च -घ,
(५)(२) व्यस्ताश्चैव ; महद्गुणाः -ख; (३) गुणवस्त्वेव ;
(६)(१) यदस्मान् वै - कृ पाठः.
(७)(२) विदुरो जननी-कृपाठः; तदा (for च मे ), (३) कृपाठः.वा यो- (for प्रायो).

**ते त्वस्मद्धितकामार्थं पालनीयाः प्रयत्नतः ।**
**युष्माभिः सहिताः सर्वे शोकसन्तापविह्वलाः ॥ ३७ ॥**[१]

**निवर्तध्वं गता दूरं ममागमनकाङ्क्षिणः ।**
**स्वजनो न्यासभूतो मे कार्या स्नेहान्विता मतिः ॥ ३८ ॥**[२]

**एतद्धि मम कार्याणां परमं हृदि सं स्थितम्।**
**सुकृता तेन मे तुष्टिर्मे सत्कारश्च भविष्यति ॥ ३९ ॥**[३]

**वैशम्पायनः**

**तथानुमन्त्रितास्तेन धर्मराजेन ताः प्रजाः ।**
**चक्रुरार्तस्वरं घोरं हा राजन्निति दुःखिताः ॥ ४० ॥**[४]

**गुणान्पार्थस्य संस्मृत्य दुःखार्ताः परमातुराः ।**
**अकामाः सन्न्यवर्तन्त समागम्याथ पाण्डवैः ॥ ४१ ॥**[५]

**विनिवृत्तेषु तु पौरेषु रथानास्थाय पाण्डवाः ।**
**आजग्मुर्जाह्नवीतीरे प्रमाणाख्यं महावटम् ॥ ४२ ॥**[६]

**ततो दिवसशेषेण वटं गत्वा तु पाण्डवाः ॥**
**ऊषुस्तां रजनीं वीराः संस्पृश्य सलिलं शुचि ॥ ४३ ॥**[७]

---

(१)(१)ह्य (for त्व), (२) सेव ; (for पाल) (३) सहिताः सर्वे; सहितैः सर्वे,(४) विह्वलैः ; कर्शितैः
(२)(१) निवर्ततागता; निवर्तध्वं गता ; (२) $^0$तापिताः ; $^0$शालिना ; $^0$पाशतः ; ममागमनकाङ्क्षिणः -कृपाठः; (३) स्वजने $^0$भूते मे -कृपाठः,
(३)(३) कृतिर्नानेन ; कृता तेन तु ; कृता स्वनेन-ख; कृतेनानेन ; संस्कृतानेन तुष्टिर्मे; तु विभो ; (४) च कृतो भवेत् ; $^0$महान् ); परमो भवेत्; (for च भवि$^0$)
(४)(१) तथा तु मन्त्रिताः ; तथानुयन्त्रिताः ; तथा तु यन्त्रिताः ; (२) वै (for ताः) , ता वै राजन्प्रजास्तदा ; राजं (for ज्ञ$^0$) $^0$स्ता वै प्रजास्तदा-घ ; (३) $^0$स्वनं, सर्वाः (for घोरं) , (४) संहताः (for दुःखिताः ),
(५)(४) च (for (अथ) पाण्डवान्- कृपाठः ;
(६)(१) निवृत्तेषु तु (अथ (for तु, च) -कृपाठः; (२) रथम्, ; (३) आजग्मुः ; सञ्जग्मुः; प्रययुः.
(७)(१) तत्ते; ते तं-कृपाठः ;

उदकेनैव तां रात्रिमूषुस्ते दुःखकर्षिताः ।।
अनुजग्मुश्च तत्रैतान् स्नेहात्केचिद्द्विजातयः ।। ४४ ।।[१]

साग्नयोऽनग्नयश्चैव सशिष्यगणबान्धवाः ।
स तैः परिवृतो राजा शुशुभे ब्रह्मवादिभिः ।। ४५ ।।[२]

तेषां प्रादुष्कृताग्नीनां मुहूर्ते रम्यदारुणे।
ब्रह्मघोषपुरस्कारः सञ्जल्पः समजायत ।। ४६ ।।

लक्षालङ्कारः- रम्यदारुण इत्यत्र साधूनां रम्ये दैत्यानां दारुणे ब्राह्मे मुहूर्त इत्यर्थः।

राजानं तु कुरुश्रेष्ठं ते हं समधुरस्वराः ।
आश्वासयन्तो विप्राग्र्याः क्षपां सर्वां व्यनोदयन् ।। ४७ ।।[३]

लक्षालङ्कारः- क्षपां सर्वामनोदयन् इत्यत्र अनोदयन् 'नुद प्रेरणे' इति धातोः गन्तुं प्रेरितवन्त इत्यर्थः ।

राजा तु भ्रातृभिः सार्धं तथा सर्वैः सुहृद्गणैः ।
अशेत तां निशां राजन् दुःखशोकसमाहितः ।। ४८ ।।[४]

अस्मिन् आरण्यकपर्वणि १ अध्याये ४८ श्लोकाः सन्ति

आरण्यकपर्वणि प्रथमोऽध्यायः

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां आरण्यकपर्वणि पौरप्रत्यागमने प्रथमोऽध्यायः ।। १ ।।

## 03-01-002

(१)(२) (अ) थ (for तु ) शोककर्शिताः-ग; नरपुङ्गवाः, $^{0}$कर्षिताः,
(२)(१)अभि (for अनु), तत्रैव ; तत्रैनान् -ख; (२) च निर्वृतो (forपरि$^{0}$)घ-शुश्रूशुर्, for शुशुभे),
(३) (१) तं (for तु) (३) विप्रेन्द्राः (for विप्राग्र्याः); (४) सर्वे (for सर्वां ) ;
(४)(२)सुहृज्जनैः ;(३) राजा-कृपाठः,(४) समन्वितः ;

# द्वितीयोऽध्यायः

युधिष्ठिरेण वने स्वानुयायिनो ब्राह्मणान् प्रति स्वस्य हतसर्वस्वतया तद्भरण-पूर्वकं दुष्करत्वकथनपूर्वकं प्रतिनिवर्तनप्रार्थना ।। १ ।। ब्राह्मणैः स्वयमेवात्मभरण-पूर्वकं स्वसहवासमात्रे अर्थिते युधिष्ठिरेण स्वस्य तद्भरणाशक्तिचिन्तनेन विषादाधिगमः ।। २ ।। शौनकेन युधिष्ठिरे प्रति ब्राह्मणभरणाय तपसा सिद्धिसम्पादनचोदना ।। ३ ।।

**वैशम्पायनः**

प्रभातायां तु शर्वर्यां तेषामक्लिष्टकर्मणाम् ।
वनं यियासतां विप्रास्तस्थुर्भिक्षाभुजोऽग्रतः ।।
तानुवाच ततो राजा कुन्तीपुत्रो युधिष्ठिरः ।। १ ।।[१]

**युधिष्ठिरः**

वयं हि हृतसर्वस्वा हृतराज्या हृतश्रियः ।
फलमूलाशनाहारा वनं यास्याम दुःखिताः ।। २ ।।[२]
वनं च दोषबहुलं बहुव्यालसरीसृपम्।
परिक्लेशश्च वो मन्ये ध्रुवं तत्र भविष्यति ।। ३ ।।[३]
ब्राह्मणानां तु सङ्क्लेशो दैवतान्यपि सादयेत्।
किं पुनर्मामितो विप्रा निवर्तध्वं यथेष्टतः ।। ४ ।।[४]

**ब्राह्मणाः**

---

(१)(६)धर्म० (for कुन्ती० )
(२)(३) शना' (for मिषा ) (४) गच्छाम -कृपाठः(for यास्याम),
(३)(२) समावृतं ; समाकुलं ; (३) क्लेशं ; (४) ध्रुवस्तत्र ,
(४)(१) तु (च); परिक्लेशो-कृपाठः, (२) शातयेत् ; सन्दहेत् ; (३) मामथो ; सामतो ; मादृशान् (for मामितो)

गतिर्या भवतां राजंस्तां वयं गन्तुमुद्यताः ।
नार्हथास्मान्परित्यक्तुं भक्तान्सद्धर्मदर्शिनः ॥ ५ ॥[१]

अनुकम्पां हि भक्तेषु देवता ह्यपि कुर्वते।
विशेषतो ब्राह्मणेषु सदाचारावलम्बिषु ॥ ६ ॥

**युधिष्ठिरः**

ममापि परमा भक्तिर्ब्राह्मणेषु सदा द्विजाः ।
सहायविपरिभ्रंशस्त्वयं सादयतीव माम् ॥ ७ ॥

**लक्षालङ्कारः-** सहायविपरिभ्रंश इत्यत्र सहायभूतधनधान्यादिद्रव्याभावः ।

आहरेयुर्हि ये सर्वे फलमूलमृगांस्तथा ।
त इमे शोकजैर्दुःखैर्भ्रातरो मे विमोहिताः ॥ ८ ॥[२]

द्रौपद्या विप्रकर्षेण राज्यापहरणेन च ।
दुःखान्वितानिमान्क्लेशैर्नाहं योक्तुमिहोत्सहे ॥ ९ ॥[३]

**ब्राह्मणाः**

अस्मत्पोषणजा चिन्ता मा भूत्ते हृदि पार्थिव ।
स्वयमाहृत्य वान्नानि चोपयोक्षामहे वयम् ॥ १० ॥[४]

अनुध्यानेन जप्येन विधास्यामः शिवं तव ।

---

(१)(३) नार्हसि -कृपाठः; तत्तथा (for नार्हथ); (४) सद्धर्मचारिणः ; धर्मात्मदर्शिनः ; धर्मार्थ० , भक्यास्मान् वनचारिणः,

(२)(१) इमे (इदं) ; येपि ; हि ये सर्वे (for हि मे येऽपि) (२) फलमूलं ; फलं मूलं (फलमूल) ; फलमूलतृणं तथा ; फलं मूलमधुस्तथा

(३)(३) दुःखार्दितान् ; इह (for इमान्) ; चैव (for क्लेशैः) (४) तान्योक्तम् (for ०योक्तमिह),

(४)विप्राः (३) चान्नानि ; (०द्यां) ; वन्यं तु ; वन्यास्त्वां (for वन्यानि) ०; स्वयमाहृतवन्याः ; स्म,
(४) ह्यनुयास्याम त्वा ; उपयोक्ष्यामहे ; ह्यनुयास्यामहे ; यातु यास्या० ; त्वानु'; (अ) प्यनु० ,

कथाभिश्चानुकूलाभिः सह रंस्यामहे वने ॥ ११ ॥[१]

**युधिष्ठिरः**

एवमेतन्न सन्देहो रमेयं ब्रह्मणैस्सह ।
मानभावात्तु पश्यामि प्रत्यादेशमिवात्मनः ॥ १२ ॥[२]

कथं द्रक्ष्यामि वः सर्वान्स्वयमाहृतभोजनान्।
मद्भक्तान् क्लिश्यतोऽनर्हान्धिक्पापान्धृतराष्ट्रजान्॥ १३ ॥[३]

**वैशम्पायनः**

इत्युक्त्वा स नृपति शोचन्निषसाद महीतले ॥ १४ ॥

तमध्यात्मरतो विद्वान्शौनको नाम वै द्विजः ।
योगे साङ्ख्ये च कुशलो राजानमिदमब्रवीत् ॥ १५ ॥[४]

**शौनकः**

शोकस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥ १६ ॥[५]

न हि ज्ञानविरुद्धेषु बह्वपायेषु कर्मसु।

---

(१)(१) जात्येन ; (२) विदधामः ; (३) च चा (अ) ०नुरूपाभिः ; चाभिरम्याभिः (४) सर्वे (for सह) वयं (for वने),

(२) (१) एव (for एतन्) (२) रमेहं (०यं) सततं द्विजैः ; रमेहं सह ब्राह्मणैः, न चोक्तमनृतं द्विजैः (३)नूनं कथं नु यास्यामि ,

(३)(२) स्वयमाहृत्यभोजिनः ; ब्राह्मणान्कृतभोजिनः ; स्वयमाहृत्य भोजनान् (३) मद्भक्त्या ; (४) द्विषतो (for धिक्पापान्),

(४)(१) नृपतिः (for स नृपः) (२) निपपात (for निष०) ; (३) गतिर् ; रतो (for रतिर्) तमध्यात्मा मुनिर्विद्वान् ; (३) साङ्ख्ये योगे ;३(४) को द्विजसत्तमः

(५)अ-क-हर्ष शौनक उ ; (२) हर्ष (for भय०), (३) मूढान्, (४) पण्डितान् ,

श्रेयोघातिषु सज्जन्ते बुद्धिमन्तो भवद्विधाः ।। १७ ।।(१)

लक्षालङ्कारः- नहि ज्ञाननिरुद्धेषु इत्यत्र ज्ञाननिरुद्धेषु ज्ञानं निरुद्धं यैस्तानि तथोक्तानि ।

अष्टाङ्गां बुद्धिमाहुर्हि सर्वाश्रेयोऽविघातिनीम्।
श्रुतिस्मृतिसमायुक्तां राजन्स त्वय्यवस्थिता ।। १८ ।।(२)

लक्षालङ्कारः- अष्टाङ्गां बुद्धिमाहुः हि इत्यत्र 'शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा । ऊहाऽपोहोऽर्थविज्ञानं तत्वज्ञानं च धीगुणा' इति कामन्दीये प्रोक्तान्यष्टाङ्गानि । ग्रहणं मननं, धारणं ध्यानम्, ऊहा, उत्प्रेक्षा, अपोहः मिथ्याज्ञाननिरसनं, अर्थविज्ञानम् अर्थानां विशेषेण ज्ञानं, तत्वज्ञानं सामान्यज्ञानमिति विवेकः । सर्वश्रयोविघातिनी□ सर्वश्रेयसाम् अविघातिनीम् ।

After Sl, 17: D2,After 16: B,P,No, 8

शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा ।
ऊहापोहोऽपि विज्ञानं तत्त्वज्ञानं च धीगुणाः ।

अर्थकृच्छ्रेषु दुर्गेषु व्यापत्सु स्वजखे च ।
शारीरमानसे चैव न सीदन्ति सुखे बुधाः ।। १९ ।।(३)

श्रूयतां चाभिधास्यामि जनकेन यथा पुरा।
आत्मव्यवस्थानकरा गीताः श्लोका महात्मना।। २० ।।(४)

मनोदेहसमुत्थाभ्यां दुःखाभ्यामर्दितं जगत्।

---

(१)(१) च; चेत् (for हि); २) बहुदोषेषु; ०पापेषु (३)मूलं (for श्रेयो),(४) बहुश्रुताः(for भव०),
(२)(१) हि (या०) (२) सर्वाश्रेयोभि० ; विपाटनीं; सर्वश्रेयोविघातिनीं ; सर्वश्रेयोविधायिनीं (३)समायुक्ता ; मतिस्मृतिसमायुक्ता (०क्तां) ; (४) सा राजन् ,
(३)(१) दुःखे (for दुर्गे) ; (२) ह्या (for व्या०) स्व (वि) ०जनेषु ; व्यसनेषु (for स्वजनस्य) (अ) पि (for च) (३) शारीरैः (for शारीर०) शारीरमानसैर्दुःखैर्न (for ०सेष्वेव) (४) न सीदन्त्यसुखे बुधाः, भवद्विधाः.
(४)(१) च (३) ०पराः धर्म० (४) श्लोका गीताः ; गाथा गीताः

तयोर्व्याससमासाभ्यां शमोपायमिमं शृणु ।। २१ ।।[१]

व्याधेरनिष्टसंस्पर्शाच्छ्रमादिष्टविवर्जनात्।

दुःखं चतुर्भिः शारीरं कारणैः सम्प्रवर्तते ।। २२ ।।[२]

व्याधयोऽत्र शरीरेऽस्मिन्वातपित्तकफोद्भवाः ।

अजीर्णप्रभवाः सर्वे दुःखाः पापोद्भवास्तथा ।

तदाशु प्रतिकाराच्च सततं चाविचिन्तनात् ।

आधिव्याधिप्रशमनं क्रियायोगबलेन च तु ।। २३ ।।[३]

**लक्षालङ्कारः-** तदाशु प्रतिकारात् इत्यत्र अतः कारणात् मतिमन्तो वैद्याः विदाख्यवैद्याः तस्य दुःखस्य आशु प्रतिकारात् परिहाररूपात् सततं चिन्तनात् कर्मसाक्षिणः श्रीहरेः चिन्तनात् फलेन क्रियायोगसन्तुष्टहरिप्रसादाख्यफलेन च आधिव्याधिप्रशमनं क्रियायोगं हर्यर्पणबुद्ध्या क्रियमाण नित्यनैमित्तिककर्मकौशलं प्रायेण शमं शमयतीति शमः प्रागुक्त-शरीरदुःखशमनौषधं कुर्वते ।।

मतिमन्तो व्यथोपेता शमं प्रायेण कुर्वते ।

मानसस्य प्रियाख्यानैः सम्भोगोपनये नृणाम् ।। २४ ।।[४]

**लक्षालङ्कारः-** मानसस्य चित्तस्य, प्रियया सह आख्यानं सल्लापः सम्भोगाश्च सहभोजनक्रीडाविलासाद्याः तेषाम् उपनये समागमे सतीत्यर्थः ।।

मानसेनैव हि दुःखेन शरीरमुपतप्यते ।

---

(१)(१) मोह० (for देह० ) (३) तयोश्चैव विनाशाय ,

(२)(१) संयोगात् ; (३) एतत् (for दुःखं), एतच्छरीरं कौन्तेय ,

(३) कृ-पाठः(१) तदा तत् ।; सदा तत् (for तदाशु) (२) च वि (परि) वर्जनात् (for चावि०), त्वमेव, ; (४)बलेन; फलेन (for द्व्येन (घ) च (for तु

(४)(१)व्यथोपेताः (for ह्यतो वैद्याः) ; (२) प्रागेव -ग(for , प्रायेण), (३) मानसाख्यं-ग, ०ख्यानात् ; (४) सम्भोगाप०. (४) पनयैर्नृणाम्-ग .

अयःपिण्डेन तप्तेन कुम्भसंस्थमिवोदकम् ॥ २५ ॥[१]

मानसं शमयेत्तस्माज्ज्ञानेनाग्निमिवाम्बुना ।
प्रशान्ते मानसे दुःखे शारीरमुपशाम्यति ॥ २६ ॥[२]

लक्षालङ्कारः-. यत् मानसं मनःसम्बन्धि दुःखं तेन ज्ञानेन ज्ञानयोगेन । क्रियायोगेन शारीरं दुःखं, ज्ञानयोगेन मानसं दुःखं शमयेदिति भावः ॥

मनसो दुःखमूलं तु स्नेह इत्युपलभ्यते ।
स्नेहात्तु सज्जते जन्तुर्दुःखयोगमुपैति च ॥ २७ ॥[३]

स्नेहमूलानि दुःखानि स्नेहजानि भयानि च ।
शोकहर्षौ तथाऽऽयासः सर्वं स्नेहात् प्रवर्तते ॥ २८ ॥[४]

स्नेहकारुण्यरागौ च प्रजास्वीर्ष्यादयस्था ।
अश्रेयस्कावुभावेतौ पूर्वस्तत्र गुरुः स्मृतः ॥ २९ ॥[५]

लक्षालङ्कारः- उभौ ईर्ष्यानयौ ।

कोटराग्निर्यथाशेषं समूलं पादपं दहेत्।
धर्मार्थिनं तथाल्पोऽपि रागदोषो विनाशयेत् ॥ ३० ॥[६]

विप्रयोगे न तु त्यागी दोषदर्शी समागमात्।

---

(१)(१) (ए) व (for हि ),
(२)(२) अम्भसा (for अम्बुना) ; (३) दुःखे (for ह्यस्य)
(३)(१) हि (for तु), (२) अभिधीयते (for उपलभ्यते ) (३) च (for तु) (४) दुःखमोहम् ; दुःखे सुखम् ; दुःखमूलम्
(४)(३) शोको हर्षः (४) स्नेहात्सर्वं ;स्नेहात्प्रर्व०
(५)(१) ०भावोनुरागश्च ; कारुण्यरागौ च (०ण्यभावाच्च ) ; (२)-(प्रजज्ञे विषये तथा-ग) विषये ; विषयः(for वैषयः) मित्रेषु च धनेषु च; प्रजास्वीर्ष्या (०स्विष्टो) ०दयस्तथा ०स्पृहा),
(६)(३) ख-इदमर्धं नास्ति, धर्मार्थौ तु (for ०र्थिनं ) ; (४) रागद्वेषौ ;०द्वेषो ;रागो द्वेषश्च नाशयेत्

विरागं भजते जन्तुर्निर्वैरो निष्परिग्रहः ।। ३१ ।।[१]

लक्षालङ्कारः-विप्रयोगेन विषयवियोगेन त्यागी दोषत्यागी समागमात् विषय-समागमात् ।

तस्मात्स्नेहं स्वपक्षेभ्यो मित्रेभ्यो धनसञ्चयात्।
स्वशरीरसमुत्थं च ज्ञानेन परिवर्जयेत् ।। ३२ ।।[२]
ज्ञानान्वितेषु मुख्येषु शास्त्रज्ञेषु कृतात्मसु।
न तेषु सज्जते स्नेहः पद्मपत्रेष्विवोदकम् ।। ३३ ।।[३]

लक्षालङ्कारः- ज्ञानान्वितेषु दुःखेषु इत्यत्र दुःखेषु जातेषु सत्सु ज्ञानान्वितेष्विति सम्बन्धः ।

रागाभिभूतः पुरुषः कामेन परिकृष्यते।
इच्छा सञ्जायते तस्य ततस्तृष्णा प्रवर्तते ।। ३४ ।।[४]

लक्षालङ्कारः- रागाभिभूतः पुरुष इत्यत्र रागो विषयेषु स्नेहः, कामः स्त्रीसम्भोगासक्तिः इच्छा अशनायापिपासादिरूपा, तृष्णा अलम्बुद्धिरहिता 'यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः । नालमेकस्य तत्सर्वम्' इति वाक्योक्तप्रकारेण अर्थाकाङ्क्षा ।

तृष्णा हि सर्वपापिष्ठा नित्योद्वेगकरी नृणाम्।
अधर्मबहुला चैव घोरा पापानुबन्धिनी ।। ३५ ।।[५]
या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः ।

---

(१)(२) समागतान् ; समागमो, समागमे -कृपाठः; (३) विकारं ; वैराग्यं (for विरागं) ; (४) निरवग्रहः -कृपाठ.

(२)(१) न लिप्सेत (सुपक्षेभ्यः) ; न लिप्सेत(for स्वपक्षेभ्यः ); (२) मित्रेषु च धनेषु च; धनधान्यं च सञ्चयात् ; (३) च (for तु ) ; (४) विनिवर्तयेत्,

(३)(१) सिद्धेषु ; युक्तेषु (for मुख्येषु) ; (२) सूक्तेषु च (for शास्त्र०),

(४)(२) क्लिश्यते ; तुष्यते ; शुष्यते ; तप्यते ; (३) चास्य ; ह्यस्य (for तस्य) (४) विवर्धते ; प्रजायते (for प्रव०),

(५)(१) (अ)पि (for हि) (२) नित्योद्योग०; स्मृता (for नृणाम्); (४) घोररूपानु०,

योऽसौ प्राणान्तिको रोगस्तां तृष्णां त्यजतः सुखम् ।। ३६ ।।

अनाद्यन्ता तु सा तृष्णा अन्तर्देहगता नृणाम्।
विनाशयति भूतानि अयोरिज इवानलः ।। ३७ ।।(१)

यथाऽयः स्वसमुत्थेन वह्निना नाशमृच्छति।
तथाऽकृतात्मा लोभेन सहजेन विनश्यति ।। ३८ ।।(२)

राजतः सलिलादग्नेश्चोरतः स्वजनादपि।
भयमर्थवतां नित्यं मृत्योः प्राणभृतामिव ।। ३९ ।।

After Sl, 38ab, G2 ins,:

अर्थिभ्यः कालतस्तस्मान्नित्यमर्यवतां भयम् ।। ३९ ।।(३)

यथा ह्यामिषमाकाशे पक्षिभिः श्वापदैर्भुवि।
भक्ष्यते सलिले मत्स्यैस्तथा सर्वत्र वित्तवान् ।। ४० ।।(४)

अर्थ एव हि केषाञ्चिदनर्थं भविता नृणाम् ।। ४१ ।।

अर्थश्रेयसि चासक्तो न श्रेयो विन्दते नरः ।
तस्मादर्थागमाः सर्वे मनोमोहविवर्धनाः ।। ४२ ।।(५)

लक्षालङ्कारः- अर्थश्रेयसि द्रव्यरूपे श्रेयसि पुरुषार्थे, श्रेयः मोक्षम् ।

कार्पण्यं दर्पमानौ च भयमुद्वेग एव च ।। ४३ ।।

---

(१)(२) ह्य (for अ०) ; (३) भूतानि ; (for सम्भूता) ; (४) अयोरज ; आपो (अयो०) वज् ; लौहं रज ; अयो घोर ; अयोरुज ; अयोराज ; अयोजलम् (for अयोनिज) अयोनिजमिवानलं,
(२)(१) यथा च ; यथायः ; यथैव ; यथायः ; यथागः(for यथैधः) सुसमिद्धेन (for स्वसमु०) ; (२) अर्हति ; अर्छ० (for ऋच्छ०) ; (३) तथा तु स्वात्मलोभेन ,
(३)(२) वतो (for वतां) (क-ख-नास्तीदमर्धम् )
(४)(३) भुज्यते ; (for भक्ष्यते ) (४) सर्वत्र (for सर्वेण-ख),
(५)(२) अनर्थं ; जायते ; भजते ; भवते (for भविता ); लोकेनर्थाय कल्पते ; (३) अर्थे (for अर्थे) ; (४) परं (for नरः) ; (६)मनोदोष० ; मदमोह० ; ०निबन्धनाः ,

अर्थजानि विदुः प्राज्ञा दुःखान्येतानि देहिनाम्।[१]

अर्थस्योत्पादने चैव पालने च तथा क्षये ।।४४ ।।

नाशे दुःख व्यये दुःखं घ्नन्ति चैवार्थकारणात् ।।[२]

अर्था दुःखं परित्यक्तुं पालिताचापि तेऽसुखाः ।

दुःखेन चाधिगम्यन्ते तेषां नाशं न चिन्तयेत्।। ४५ ।।[३]

लक्षालङ्कारः- अर्था दुःखं परित्यक्तुः इत्यत्र परित्यक्तुः पुरुषस्य अर्थाः दुःखं दिशन्तीति योग्यक्रियाध्याहारः ।

असन्तोषपरा मूढाः सन्तोषं यान्ति पण्डिताः ।

अतो नास्ति पिपासायाः सन्तोषः परमं सुखम् ।

तस्मात्सन्तोषमेवेह परं पश्यन्ति पण्डिताः ।। ४६ ।।[४]

लक्षालङ्कारः- अतः कारणात् विवित्सायाः 'विद्लृलाभे' इति धातोः धनलाभेच्छायाः सुखं नास्ति ।

अनित्यं यौवनं रूपं जीवितं द्रव्यसञ्चयः ।

आरोग्यं प्रियसंवासो गृद्ध्येदेषु न पण्डितः ।। ४७ ।।[५]

त्यजेत सञ्चयांस्तस्मात् तज्जं क्लेशं सहैतुकम् ।

---

(१)(३) हि केषाञ्चित् (for विदुःप्राज्ञा); (४) एव हि (for एतानि) ,

(२) (२) ( अ) थ (for च); रक्षणे (for च क्षये) ; आर्जितानां तु रक्षणे ; (३) सङ्गाच्चैव; सहन्ति ; (ते) च त्यागश्चैव; संयोगाच्च; सङ्गे चैव (for नाशेदुःखं) ; महद् (for व्यये ) ;नाशे दुःख व्यये क-ख-पालने च क्षये तथा, (४) चाप्यर्थ; चाम्प्यन्य; चैवात्मं,

(३)(१) दुःखाः (for दुःखं) ; त्यक्ताः (for त्यक्तुं) ; (२) चैव (for चापि); शत्रवः -ग(for तेऽसुखाः ) ; (४) तस्मान्नाशं ; नाशं तेषां,

(४)(१) रता (for परा); (३) विवित्सायाः (for पिपासा०); ; वरं (for धनंख),

(५)(१) परमं (for यौवनं ) ; (२) द्रव्यसञ्चयाः ; रक्षां (for धन०); सञ्चयः ; द्रव्यमेव च ऐश्वर्यं); (४) तत्र (for एषु ),

न हि सश्चयवान्कश्चिद् दृश्यते निरुपद्रवः ।। ४८।।[१]

अतश्च धर्मिभिः सद्भिः न चेहार्थः प्रशस्यते ।

प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ।। ४९ ।।[२]

After Sl, 47ab,

पुनः पुम्भिरनीहार्थः श्रेयो ह्यस्पर्शनं नृणाम् [३]

युधिष्ठिरैवमर्थेषु न स्पृहां कर्तुमर्हसि ।

धर्मेण यदि ते कार्यं विमुक्तेप्सुः भवार्थतः ।। ५० ।।[४]

लक्षालङ्कारः- विमुक्तेप्सुः 'भावे क्तः' इति वचनात् विमुक्तं विमोक्षं प्राप्तुमिच्छुः विमुक्तेप्सुः ।

## युधिष्ठिरः

नार्थोपभोगलिप्सार्थमियमर्थेप्सुता मम ।

भरणार्थं तु विप्राणां ब्रह्मन्काङ्क्षे न लोभतः ।। ५१ ।।[५]

कथं ह्यस्मद्विधो ब्रह्मन्वर्तमानो गृहाश्रमे।

भरणं पालनं चापि न कुर्यादनुयायिनाम् ।। ५२ ।।[६]

संविभागो हि भूतानां सर्वेषामेव शिश्यते।

---

(१)(१) त्यजेद्धि ; च, क-सहेत कः , ख-घ-सहेतुकः (for त ) ; सश्चयं ;(२) सहेतुकः );, तज्ञः क्लेशात्सहेत्ततः ; तत्क्लेशान्न सहेत च ; तज्जम् (for तज्ञः) ; ऋजुः ; (जातान्) ; क्लेशान्सहेत च; (वः ; कः); तज्जः क्लेशः सहेतुकः ; (३) सश्चयकृत् ; (४) जायते ; निरुपप्लवः ,

(२)(१) पुन० (for अत० ) ; धार्मिकैः, पुम्भिः) (२) अनीहार्थे ; ,

(३)धर्मार्था ; ०र्थः ; यस्य चित्ते भवेदीहा ; तस्यानीहा गरीयसी ; तु (for हि); श्रेयो (for दूराद्) ; न स्पर्शनं ; ह्यस्प०; नृणां (परं) (for वरम्) ,

(४)(१) त्वम० (for एवम् ) ; सर्वेषु ,

(५)(१) नात्मोप ; आत्मोपं ; न ब्रह्मन् ; नास्मत्पोषणलिप्सार्थं ; आत्मोपभोगेति पाठो निर्मूलः ; (२) नेयम् (for इयम्) ; (३) विधानतः ; (for न लो),

(६)(१) हि ; विप्र ; (for ब्रह्मन्),

तथैव याचमानेभ्यः प्रदेयं गृहमेधिना ।। ५३ ।।[१]

तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता।
सतामेतानि गेहेषु नोच्छिद्यन्ते कदाचन ।। ५४।।

देयमार्तस्य शयनं सति श्रान्तस्य चासनम्।
तृषितस्य च पानीयं क्षुधितस्य च भोजनम् ।। ५५ ।।[२]

लक्षालङ्कारः- सति श्रान्तस्य इत्यत्र सति देयवस्तुनि विद्यमाने सति ।

चक्षुर्दद्यान्मनो दद्याद्वाचं दद्याच्च सूनृताम् ॐ।
प्रत्युद्गम्याभिगमनं कुर्यान्न्यायेन चार्चनम् ।। ५६।।[३]

उत्थाय चासनं दद्यादेष धर्मः सनातनः ।।[४]

अग्निहोत्रमनड्वांश्च ज्ञातयोऽतिथिबान्धवाः ।
पुत्रा दाराश्च भृत्याश्च निर्दहेयुरपूजिताः ।। ५७ ।।[५]

लक्षालङ्कारः- अग्निहोत्रमनड्वांश्च इत्यत्र योऽनड्वान् ये ज्ञातयः तान् । अतिथिबान्धवा इत्यत्र अतिथिः पूर्वेद्युः पूजितः, अपूजिता अतिथयः निर्दहेयुरिति सम्बन्धः ।

आत्मार्थं न पचेदन्नं न वृथा घातयेत्पशून् ।
न चैकः स्वयमश्नीयाद्विधिवद्यन्न निर्वपेत् ।। ५८।।[६]

लक्षालङ्कारः- विधिवत् यन्न निर्वपेत् न जुहुयात् तच्च नाश्नीयात् ।

---

(१)(२) दृश्यते ; सिध्यति; शस्यते ; इष्य०; जायं (for शिष्यं) ; (३) तथैवापच ०; (त्सु०) ०मानेषु ; तथैव या० (प) ०चमानेभ्यः (घ); तथैवायाच० ; तथैवापि च मान्येभ्यः,
(२)(२) तथा ; स्थिति (तिः) ; पथि ; परि (for स्थित), सति-घ
(३) (२) सुभाषितां ,
(४)(३) प्रत्युत्थाया (ना ) भि० ; (४) अघ्यार्न्यायेन ; चार्चनां ; चार्चनात् ,
(५)(२) जामयो (for ज्ञातयो ); (३) पुत्र (त्रा) दारा भृताश्चैव ; दाराश्च भृत्याश्च ,
(६)(१) नात्मार्थे ; तु पचेद् (for पाचयेद् -ख); (२) पशुं, ; न च तत्-ख-); (४) वर्ज न; ०वच्चैव (for ०वद्यन्न),

श्वभ्यश्च श्वपचेभ्यश्च वयोभ्यश्चावपेद्भुवि।
वैश्वदेवं हि नामैतत्सायं प्रातश्च विधीयते ।। ५९ ।।[१]

विघसाशी भवेत्तस्मान्नित्यं चामृतभोजनः ।
विघसो भुक्तशेषं तु यज्ञशेषं तथामृतम् ।। ६० ।।[२]

After Sl,58,

एते श्लोकाः ५५ श्लोकात्परमपि पठ्यते ।

चक्षुर्दद्यान्मनो दद्याद्वाचं दद्याच्च सूनृताम् ।
अनुव्रजेदुपासीत स यज्ञः पञ्चदक्षिणः ।। (३)
यो दद्यादपरिक्लिष्टमन्नमध्वनि वर्तते।
श्रान्तायादृष्टपूर्वाय तस्य पुण्यफलं महत् ।।
देवान् मनुष्यांश्च भिक्षूनतिथिपञ्चमान् ।

एतां यो वर्तते वृत्तिं वर्तमानो गृहाश्रमे।
तस्य धर्मं परं प्राहुः कथं वा विप्र मन्यसे ।। ६१ ।।[४]

**शौनकः**

अहो बत महत्कष्टं विपरीतमिदं जगत् ।
येनापत्रपते साधुरसाधुस्तेन तुष्यति ।। ६२ ।।

शिश्नोदरकृते चाज्ञः करोति विघसं बहु ।

---

(१)(३) इदं (for एतत्) ; (४) च दीयते ; प्रदी० ; प्रवर्तते (for विधी)
(२)(१) नित्यं (for तस्मान्) ; (३) विघसो ; भुक्तशेषं (षसू) ; भृत्यशेषस्; (४) यज्ञशिष्टं ; यज्ञशेषस्य,
(३)(पं१) पञ्चयशः सदक्षिणः ;(पं-२) तिष्ठ(for वर्त०),,
(४)(१) एवं यो ; for एतां यो),

मोहरागवशाक्रान्त इन्द्रियार्थवशानुगः ॥ ६३ ॥[१]

लक्षालङ्कारः- शिश्नोदरकृते चाज्ञ इत्यत्र विघसं यथेष्टमन्नं भृत्यानां दिने दिने दत्त्वा अवशिष्टं यथा भवति तथा । वैराग्यादिमहाभाग्यं त्यक्त्वा अन्यायार्जितवित्तेन भृत्यान् पुष्णंस्तिष्ठतीति भावः ।

ह्रियते बुध्यमानोऽपि मनो हारिभिरिन्द्रियैः ।
विमूढसञ्ज्ञो दुष्टाश्वैरुद्भ्रान्तैरिव सारथिः ॥ ६४॥[२]

षडिन्द्रियाणि विषयं समागच्छन्ति वै यदा।
तदा प्रादुर्भवत्येषां पूर्वसङ्कल्पजं मनः ॥ ६५ ॥[३]

मनो यस्येन्द्रियस्येह विषयान्याति सेवितुम्।
तस्यौत्सुक्यं सम्भवति प्रवृत्तिश्चोपजायते ॥ ६६ ॥[४]

ततः सङ्कल्पवीर्येण कामेन विषयेषुभिः ।
विद्धः पतति लोभाग्नौ ज्योतिर्लोभात्पतङ्गवत् ॥ ६७ ॥[५]

ततो दारैर्विहारैश्चर्मोहितश्च यथेप्सया।
महामोहे सुखे मग्नो नात्मानमवबुध्यते ॥ ६८ ॥[६]

लक्षालङ्कारः- महेप्सया महत्या प्राप्तुमिच्छया ।

---

(१)(१) (अ) याज्ञः ; त्वज्ञः ; चाज्ञः (for ऽप्राज्ञः); (२) विघसं (०घातं) ; (३) वशाक्रान्तः; (समापन्नः); (४) इन्द्रियाणां ,

(२)(१) ज्ञानं ; ज्ञायं ; जानं (for बुध्यं); (२) नरो ; (४) उद्भ्रान्तै रिव, ,

(३)(२)यदा तदा ; (४) पूर्व (for पूर्व),

(४)स्यैव ; स्येह (for ग्राम); धावति (for चोदितम् ); मनो यस्येद्रियस्येह विषयान्या ( चं या)ति सेवितुं ; (बोधितुं ; नोदितं); (४) चैव जायते ; चैव विद्यते ; चापि जायते (for चोपं)

(५)(१) विजेन (for वीर्येण); (३) शोकां (for लोभां),

(६)(१) ततो विहारैराहारैः ; (२) लोभितश्च; क्षोभितं ; महेच्छया ; यथेच्छया ; महेप्सया; यथेच्छया ; ( ३) (मोह) सुखे ; मोहे मुखे ,

एवं पतति संसारे तासु तास्विह योनिषु।
अविद्याकर्मतृष्णाभिर्भ्राम्यमाणोऽथ चक्रवत् ।। ६९।।

ब्रह्मादिषु तृणान्तेषु भूतेषु परिवर्तते।
जले भुवि तथाऽऽकाशे जायमानः पुनः पुनः ।। ७० ।।

अबुधानां गतिस्त्वेषा बुधानामपि मे शृणु।
ये धर्मे श्रेयसि रता विमोक्षरतयो जनाः ।। ७१ ।।(१)

तदिदं वेदवचनं कुरु कर्म त्यजेति च ।
तस्मात् सर्वानिमान् धर्मान्नाभिमानात्समाचरेत् ।। ७२ ।।(२)

लक्षालङ्कारः-. कुरु कर्म त्यजेति च इत्यत्र निवृत्तिकर्म कुरु, प्रवृत्तिकर्म त्यज इति वेदवचनमिति सम्बन्धः ।

इज्याध्ययनदानानि तपः सत्यं क्षमा दमः ।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः ।। ७३ ।।(३)

लक्षालङ्कारः- सत्यं यथार्थविज्ञानम् ।

तत्र पूर्वश्चतुर्भागः पितृयाणपथे स्थितः ।
कर्तव्यमिति यत्कार्यं नाभिमानात्समाचरेत् ।। ७४ ।।(४)

उत्तरं देवयानं तु सद्भिराचरितः सदा।
अष्टाङ्गेनैव मार्गेण विशुद्धात्मा समाचरेत् ।। ७५ ।।(५)

---

(१)(३) धर्म (for धर्मे); (४) मतयो (for रतयो); नराः (for , जनाः)
(२)(१) देव० (for वेद०); जेति धि ; (३)धर्मान् , इमान् सर्वान्
(३)(२) दया (for दमः) ; (४) मतः (for स्मृतः)
(४)(१) अत्र ; ततः (for तत्र) ; चतुर्मार्गं ; चतुवर्गः-कृपाठः ; (२) ०यानपदे ; ०याणपथे ; हितः ; स्मृतः ; तत्सर्वमविशेषतः ; (३) तत् (for यत्); (४) न मत्सरात् (for समाचरेत्)
(५)उत्तरश्च चतुर्भिज्ञो नामहात्मसु ०ति सदा; उत्तरा० यानस्तु ०चरितं तदा (तथा),

सम्यक्सङ्कल्पयोगाच्च सम्यक्चेन्द्रियगोचरात् ।
सम्यग्व्रतविशेषाच्च सम्यक्च गुरुसेवनात् ।। ७६ ।।[१]

लक्षालङ्कारः- सम्यक् चेन्द्रियगोचरात् इत्यत्र सम्यक् इन्द्रियाणां गोषु विद्यासुचरात् सञ्चारणादित्यर्थः ।

सम्यगाहारयोगाच्च सम्यक्चाध्ययनागमात्।
सम्यक्कर्मोपसन्न्यासात् सम्यक्चित्तनिरोधनात् ।। ७७ ।।[२]

**लक्षालङ्कारः-** सम्यक् कर्मोपसन्न्यासात् इत्यत्र कर्मणां हरिपादारविन्दे उपसन्न्यासात् समर्पणात् ।

एवं कर्माणि कुर्वन्ति संसारविजिगीषवः ।।
रागाद्वेषविनिर्मुक्ता ऐश्वर्यं देवता गताः ।। ७८ ।।
रुद्राः साध्यास्तथाऽऽदित्या वसवाोअश्वनावपि।
योगैश्वर्येण संयुक्ता धारयन्ति प्रजा इमाः ।। ७९ ।।[३]
तथा त्वमपि कौन्तेय शममास्थाय पुष्कलम्।
तपसा सिद्धिमन्विच्छ योगसिद्धिं च भारत ।। ८० ।।[४]
पितृमातृमयी सिद्धिः प्राप्ता कर्ममयी च ते।
तपसा सिद्धिमन्विच्छ द्विजानां भरणाय वै ।। ८१।।[५]
सिद्धा हि यद्यदिच्छन्ति कुर्वते तदनुग्रहम्।

---

(१)(१) सम्बन्धात्) ; (२) च, (३) सत्य० (for सम्यग्); व्रतनिषेवाच्च ; प्रीतिविशेषाच्चः; (४) सम्यग्गुरुनिषेवणात्; सम्यग्गुरुषु सेवया ,
(२)(२) च चाध्यां ०; स्वाध्यां० (for चाध्यं ) ; (३) सम्यक् (for एवं),
(३)(२) ऐश्वर्यवशमागताः ; (३) रु० (इं०) द्रादित्यास्तथा साध्याः ; (४) (ऽ) ष्टा० (for ऽथा०); तथाश्विनौ (for (अ श्विनावपि), अश्विनौ वसवस्तथा ; इमाः प्रजाः
(४) (२) तप आ० (for शममा०)
(५) (३) यतस्व राजञ्छान्तानां,

तस्मात्तपः समास्थाय कुरुष्वात्ममनोरथम् ॥ ८२ ॥[१]

अस्मिन् आरण्यकपर्वणि २ अध्याये ८२ श्लोकाः सन्ति

आरण्यकपर्वणि द्वितीयोऽध्यायः

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां आरण्यकपर्वणि पाण्डवानां प्रव्रजने द्वितीयोऽध्यायः ॥ २ ॥

श्रीमन्महाभारततात्पर्यनिर्णये द्वाविंशोध्याये -

विचिन्त्य तेषां भरणाय धर्मजः सम्पूज्य सूर्यस्थितमच्युतं प्रभुम् ।
दिनेक्षयान्नं पिठरं तदाप रत्नादिदं कामवरान्नदं च ॥ ५ ॥

महाभारते- वनपर्वणि ३- अध्यायः

# 03-01-003

# तृतीयोऽध्यायः

३. युधिष्ठिरेण ब्राह्मणभरणाय धौम्यचोदनया सूर्यस्तुतिः ॥१॥ स्तोत्रैः प्रसन्नेन सूर्येण युधिष्ठिराय अक्षयपात्रदानम् ॥२॥

## वैशम्पायनः

शौनकेनैवमुक्तस्तु कुन्तीपुत्रो युधिष्ठिरः ।
पुरोहितमुपागम्य भ्रातृमध्येऽब्रवीदिदम् ॥ १ ॥[२]

## युधिष्ठिरः

प्रस्थितंताननुयातान् नो ब्राह्मणा वेदपारगाः ।

---

(१)(२) अनुग्रहात्

(२)(४) भ्रातृभिः सहितोऽब्रवीत् ; मध्ये वचोऽब्रवीत् ,

न चास्मि पालने शक्तो बहुदुःखसमन्वितः ॥ २ ॥[१]

परित्यक्तुं न शक्नोमि दानशक्तिश्च नास्ति मे।
कथमत्र मया कार्यं भगवंस्तद्ब्रवीहि मे ॥ ३ ॥[२]

**वैशम्पायनः**

मुहूर्तम् मनसा ध्यात्वा धर्मेणान्वीक्ष्य तां गतिम्।
युधिष्ठिरमुवाचेदं धौम्यो धर्मभृतां वरः ॥ ४ ॥[३]

**धौम्यः**

पुरा सृष्टानि भूतानि पीड्यन्ते क्षुधया भृशम्।
ततोऽनुकम्पया तेषां सविता स्वपिता इव ॥ ५ ॥[४]

सान्त्वयित्वा ततो देवः प्राणिकार्ये युयोज च ।

गत्वोत्तरायणं तेजो रसानुद्धृत्य रश्मिभिः ।
दक्षिणायनमावृत्तो महीं निविशते रविः ॥ ६ ॥[५]

**लक्षालङ्कारः-** गत्वोत्तरायणम् इत्यत्र रश्मिभिः उग्ररश्मिभिः लोकात् जनात् तेजः सामर्थ्यं उद्धृत्य, निदाघकाले सन्तप्तानां बहुतरसामर्थ्याभावादिति भावः ।

क्षेत्रभूते ततस्तस्मिन्नोषधीरोषधीपतिः ।
दिवस्तेजः समुद्धृत्य जनयामास वारिणा ॥ ७ ॥[६]

---

(१)(१) प्रस्थितानुयातारो (०न्तो ); (३) पोषणे
(२)(१) परिमोक्तुं ; न शक्तोस्मि ; न युक्तोस्मि ; (४) तु प्र (for तद्); ब्रवीहि ; तद्वन्महि भगवन्मम,तद्ब्रूहि भगवन्मम
(३)(१) अपि स ; अथ स; इव स) (for मनसा, (२) (उद्वीक्ष्य (for अन्विष्य),
(४) (४) पितेव हि ; पिता यथा (for पिता इव); सवितारं ; पितामहः
(५)(१) देवो ; ऽ तेषां (for तेजो) (२) लोकान् ; लोकाद् (for रसान्); (४) तु प्रावृषद् ; प्रविशते (for निवि०); महीं वर्षति वारिणा (भिः),
(६)(१) क्षेमं (for क्षेत्रं); (२) औषधीं ; (३) रवेसू ; दिवस् ,

निषिक्तश्चन्द्रतेजोभिः सूयते जगतो रविः ।
ओषध्यः षड्रसा मेध्यास्तदन्नं प्राणिनां भुवि ॥ ८ ॥[१]

एवं भानुमयं ह्यन्नं भूतानां प्राणधारणम्।
नाथोयं सर्वभूतानां तस्मात्तं शरणं व्रज ॥ ९ ॥[२]

राजानो हि महात्मानो योनिकर्मविशोधिताः ।
उद्धरन्ति प्रजाः सर्वास्तप आस्थाय पुष्कलम् ॥ १० ॥[३]

भौमेन कार्तवीर्येण वैन्येन नहुषेण च ।
तपोयोगसमाधिस्थैरुद्धता ह्यापदः प्रजाः ॥ ११ ॥[४]

**लक्षालङ्कारः-** भौमेन कार्तवीर्येण इत्यत्र भौमेन सार्वभौमेन ।

तथा त्वमपि धर्मात्मन् कर्मणा च विशोधितः ।
तप आस्थाय धर्मेण द्विजातीन्भर कौरव ॥ १२ ॥[५]

(अत्र अधिकपाठः टि.आर् पाठानुसारेण । अन्वयः क्वचित् व्यत्यस्तः ।) सूर्याष्टोत्तर-शतनामस्तोत्रं, सूर्यस्तुतिः उभावपि निरूपितौ )

एवमुक्तस्तु धौम्येन तत्कालसदृशं वचः
धर्मराजो विशुद्धात्मा तप आतिष्ठदुत्तमम् ॥

विप्रत्यागसमाधिस्थः संयतात्मा दृढव्रतः ।*
ततस्त्वध्यापयामास मन्त्रं सर्वार्थसाधकम्।

---

(१)(१)निषक्तश्॒ ; निक्षितं ; निषिक्तं; (२) क्षीयते (for सू०); (अ)त्र गतो ; स्वयोनौ निर्गते; (तो) रविः ; (३) ओषधीः ,

(२)(२) प्रजानां (for भूतनां); (३) पितैवं ; पितेव ; पितैष,

(३)(२) शुभे कर्मणि संस्थिताः ; (३) धारयन्ति (for उद्धं ),

(४)(१)धौम्येन (हैमेन); भैमेन; भोमेन ; गयेन ; (२) वैष्येन; (४) चापदि; ह्यापदि,

(५)(१)धर्मशः; कौन्तेय (for धर्मात्मन् ); (४) भारत),

अष्टाक्षरं परं मन्त्रमार्तस्य सततं प्रियम् ।

पुष्पोपहारैर्बलिभिरर्चयित्वा दिवाकरम् ।

योगमास्थाय धर्मात्मा वायुभक्षो जितेन्द्रियः

गाङ्गेयं वार्युपस्पृष्य प्राणायामेन तस्थिवान् ।।

After Sl,14ab (transposed), K2 B Dc Dn, D2,4,6 ins,:

सोऽवगाह्य जलं राजा देवस्याभिमुखोऽभवत्।।

जनमेजय उवाच

कथं कुरूणामृषभः स तु राजा युधिष्ठिरः ।

विप्रार्थमाराधितवान्सूर्यमद्भुतदर्शनम् ।।

After the ref,, S (except M2) ins,& Variant of 14 abcd:

पुष्पोपहारैर्बलिभिर्बहुशश्च यथाविधि ।

सर्वात्मभूतं सम्पूज्य यतप्राणो जितेन्द्रियः ।(१)

After Sl, 15, S (except M2)ins,:

मयि स्नेहोऽस्ति चेत्त्यन्यद्यनुग्रहभागहम् ।

भगवन्नास्ति चेद् गुह्यं तच्च मे ब्रूहि साम्प्रतम् ।

वैद्युतो जाठरश्चाग्निरैन्धनस्तेजसां पतिः ।

After Sl, 25ab, N (K1,4 missing) ins,:

देहकर्ता प्रशान्तात्मा विश्वात्मा विश्वतोमुखः ।

चराचरात्मा सूक्ष्मात्मा मैत्रेयः करुणान्वितः ।।(२)

---

(१)(१)स्तवेन (तेपेन) केन विप्रर्षे (प्रैष); (२) स्तुत्वा (for स तु), (४) विक्रमः ; दर्शनं (for विक्रमम् ),

(२)(४)मैत्रेयः; करुणान्वितः ; मैत्रेण वपुरन्वितः,

एतद्वै कीर्तनीयस्य सूर्यस्यामिततेजसः ।

After Sl, 25ab, missing) ins,:

धर्मराजो विशुद्धात्मा तप आतिष्ठदुत्तमम् ।।१३।।

पुष्पोपहारैर्बलिभिरर्चयित्वा दिवाकरम् ।

सोऽवगाह्य जलं राजा देवस्याभिमुखोऽभवत्।

योगमास्थाय धर्मात्मा वायुभक्षो जितेन्द्रियः ।।

गाङ्गेयं वार्युपस्पृश्य प्राणायामेन तस्थिवान् ।। १४।।

शुचिः प्रयतवाग्भूत्वा स्तोत्रमारब्धवांस्ततः ।

युधिष्ठिरः

त्वं भानो जगतश्चक्षुस्त्वमात्मा सर्वदेहिनाम्।

त्वं योनिः सर्वभूतानां त्वमाचारः क्रियावताम्।।

त्वं गतिः सर्वसाङ्ख्यानां योगिनां त्वं परायणम्।

अनावृतार्गलद्वारं त्वं गतिस्त्वं मुमुक्षताम्।।

त्वया सन्धार्यते लोकस्त्वया लोकः प्रकाश्यते।

त्वया पवित्रीक्रियते निर्व्याजं पाल्यते त्वया।।

त्वामुपस्थाय काले तु ब्राह्मणा वेदपारगाः ।

स्वशाखाविहितैर्मन्त्रैरर्चन्त्यृषिगणार्चितम्।।

तव दिव्यं रथं यान्तमनुयान्ति वरार्थिनः ।

सिद्धचारणगन्धर्वा यक्षगुह्यकपन्नगाः ।।

त्रयस्त्रिशंच्च वै देवास्तथा वैमानिका गणाः ।

सोपेन्द्राः समहेन्द्राश्च त्वामिष्ट्वा सिद्धिमागताः ।।

उपयान्त्यर्चयित्वा तु त्वां वै प्राप्तमनोरथाः ।

दिव्यमन्दारमालाभिस्तूर्णं विद्याधरोत्तमाः ।।
गुह्याः पितृगणाः सप्त ये दिव्या ये च मानुषाः ।
ते पूजयित्वा त्वामेव गच्छन्त्याशु प्रधानताम्।।
वसवो मरुतो रुद्रा ये च साध्या मरीचिपाः ।
वालखिल्यादयः सिद्धाः श्रेष्ठत्वं प्राणिनां गताः ।।
सब्रह्मकेषु लोकेषु सप्तस्वप्यखिलेषु च ।
न तद्भूतमहं मन्ये यदर्कादतिरिच्यते।।
सन्ति चान्यानि सत्त्वानि वीर्यवन्ति महान्ति च ।
न तु तेषां तथा दीप्तिः प्रभावो वा यथा तव ।।
ज्योतींषि त्वयि सर्वाणि त्वं सर्वज्योतिषां पतिः ।
त्वयि सत्यं च सत्त्वं च सर्वे भावाश्च सात्त्विकाः ।।
त्वत्तेजसा कृतं चक्रं सुनाभं विश्वकर्मणा।
देवारीणां मदो येन नाशितः शार्ङ्गधन्वना।।
त्वमादायांशुभिस्तेजो निदाघे सर्वदेहिनाम्।
सर्वौषधिरसानां च पुनर्वर्षासु मुञ्चसि।।
तपन्त्यन्ये दहन्त्यन्ये गर्जन्त्यन्ये तथा घनाः ।
विद्योतन्ते प्रवर्षन्ति तव प्रावृषि रश्मयः ।।
न तथा सुखयत्यग्निर्न प्रावारा न कम्बलाः ।
शीतवातार्दितं लोकं यथा तव मरीचयः ।।
त्रयोदशद्वीपवतीं गोभिर्भासयसे महीम्।
त्रयाणामपि लोकानां हितायैकः प्रवर्तसे।।
तव यद्युदयो न स्यादन्धं जगदिदं भवेत्।

न च धर्मार्थकामेषु प्रवर्तेरन्मनीषिणः ।।
आधानपशुबन्धेष्टिमन्त्रयज्ञतपःक्रियाः ।
त्वत्प्रसादादवाप्यन्ते ब्रह्मक्षत्रविशां गणैः ।।
यदहर्ब्रह्मणः प्रोक्तं सहस्रयुगसम्मितम्।
तस्य त्वमादिरन्तश्च कालज्ञैः परिकीर्तितः ।।
मनूनां मनुपुत्राणां जगतोऽमानवस्य च ।
मन्वन्तराणां सर्वेषामीश्वराणां त्वमीश्वरः ।।
संहारकाले सम्प्राप्ते तव क्रोधविनिःसृतः ।
संवर्तकाग्निस्त्रैलोक्यं भस्मीकृत्यावतिष्ठते।।
त्वद्दीधितिसमुत्पन्ना नानावर्णा महाघनाः ।
सैरावताः साशनयः कुर्वन्त्याभूतसम्प्लवम् ।।
कृत्वा द्वादशधाऽऽत्मानं द्वादशादित्यतां गतः ।
संहृत्यैकार्णवं सर्वं त्वं शोषयसि रश्मिभिः ।।
त्वामिन्द्रमाहुस्त्वं रुद्रस्त्वं विष्णुस्त्वं प्रजापतिः ।
त्वमग्निस्त्वं मनः सूक्ष्मं प्रभुस्त्वं ब्रह्म शाश्वतम् ।।
त्वं हंसः सविता भानुरंशुमाली वृषाकपिः ।
विवस्वान्मिहिरः पूषा मित्रो धर्मस्तथैव च ।।
सहस्ररश्मिरादित्यस्तपनस्त्वं गवाम्पतिः ।
मार्तण्डोऽर्को रविः सूर्यः शरण्यो दिनकृत्तथा।।
दिवाकरः सप्तसप्तिर्धामकेशी विरोचनः ।
आशुगामी तमोघ्नश्च हरिताश्वश्च कीर्त्यसे।।
सप्तम्यामथवा षष्ठ्यां भक्त्या पूजां करोति यः ।

अनिर्विण्णोऽनहङ्कारी तं लक्ष्मीर्भजते नरम्।।
न तेषामापदः सन्ति नाधयो व्याधयस्तथा।
ये तवानन्यमनसः कुर्वन्त्यर्चनवन्दनम्।।
सर्वरोगैर्विरहिताः सर्वपापविवर्जिताः ।
त्वद्भावभक्ताः सुखिनो भवन्ति चिरजीविनः ।।
त्वं ममाप्यन्नकामस्य सर्वातिथ्यं चिकीर्षतः ।
अन्नमन्नपते दातुमभितः श्रद्धयार्हसि।।
ये च तेऽनुचराः सर्वे पादोपान्तं समाश्रिताः ।
माठरारुणदण्डाद्यास्तांस्तान्वन्देऽशनिक्षुभान्।।
क्षुभया सहिता मैत्री याश्चान्या भूतमातरः ।
ताश्च सर्वा नमस्यामि पान्तु मां शरणागतम् ।।
इमं स्तवं प्रयतमनाः समाधिना पठेदिहान्योऽपि वरं समर्थयन्।
तत्तस्य दद्याच्च रविर्मनीषितं तदाप्नुयाद्यद्यपि तत्सुदुर्लभम्।।
यश्चेदं धारयेन्नित्यं शृणुयाद्वाप्यभीक्ष्णशः ।
पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम्।।
विद्यार्थी लभते विद्यां पुरुषोऽप्यथवा स्त्रियः ।
उभे सन्ध्ये पठेन्नित्यं नारी वा पुरुषो यदि।।
आपदं प्राप्य मुच्येत बद्धो मुच्येत बन्धनात्।
एतद्ब्रह्मा ददौ पूर्वं शक्राय सुमहात्मने।।
शक्राच्च नारदः प्राप्तो धौम्यस्तु तदनन्तरम्।
धौम्याद्युधिष्ठिरः प्राप्य सर्वान्कामानवाप्तवान्।।

सङ्ग्रामे च जयेन्नित्यं विपुलं चाप्नुयाद्वसु।
मुच्यते सर्वपापेभ्यः सूर्यलोकं स गच्छति ।।

**वैशम्पायनः**

ततो दिवाकरः प्रीतो दर्शयामास पाण्डवम्।
एवं स्तुतो महाराज भास्करो लोकभावनः । -पाठान्तरम्
दीप्यमानः स्ववपुषा ज्वलन्निव हुताशनः ।। १५।।

**आदित्यः**

यत्तेऽभिलषितं किञ्चित्तत्त्वं सर्वमवाप्स्यसि।
अहमन्नं प्रदास्यामि सप्त पञ्च च ते समाः ।। १६ ।।(१)
फलमूलामिषं शाकं संस्कृतं यन्महानसे।
चतुर्विधं तदन्नाद्यमक्षय्यं ते भविष्यति।।

धनं च विविधं तुभ्यमित्युक्त्वान्तरधीयत ।।
गृह्णीष्व पिठरं ताम्रं मया दत्त नराधिप ।। १७।।(२)
यावद्वाञ्चच्छति पाञ्चाली पात्रेणानेन सुव्रत।।(३)
इतश्चतुर्दशे वर्षे भूयो राज्यमवाप्स्यसि ।। १८।।(४)
एवमुक्त्वा तु भगवांस्तत्रैवान्तरधीयत।।

**वैशम्पायनः**

लब्ध्वा वरं तु कौन्तेयो जलादुत्तीर्य धर्मवित्।

---

(१)(विवस्वानुवाच; सूर्य उ० ; (१) किञ्चित् ; कामं (for राजन्); (२) तत्त्वं सर्वम् ; तत्सर्वं त्वम् (for सर्वमेतद्); तत्सर्वं समवा० ; (४) नव वर्षाणि त्रीणि च ,
(२)(१)यव्यं (for शाकं),
(३)(१)वत्सर्यति ; च इच्छति (for वा०च्छति); सम्भृता (for सुव्रत),
(४)(३)चतुर्विधं (for च विविधं),

जग्राह पादौ धौम्यस्य भ्रातृंश्च स्वजताच्युतः।। २० ।।[१]

**युधिष्ठिरः**

त्वत्प्रसादाद् द्विजश्रेष्ठ यदिष्टं प्रासवानहम् ।

द्रौपद्या सह सङ्गम्य पश्यमानस्तया प्रभुः ।
महानसे तदन्नं तु साधयामास पाण्डवः ।। २१ ।।[२]

संस्कृतं प्रसवं याति वचमन्नं चतुर्विधम्।
अक्षय्यं वर्धते चान्नं तेन भोजयते द्विजान् ।। २२।।[३]

भुक्तवत्स्थ विप्रेषु भोजयित्वानुजानपि ।
शेषं विघससञ्ज्ञं तु पश्चाद्भुङ्क्ते युधिष्ठिरः ।
युधिष्ठिरं भोजयित्वा शेषमश्नाति पार्षती ।।२३।।[४]

द्रौपद्यां भुज्यमानायां तदन्नं क्षयमेति च ।

(अयं श्लोकः म.भा.तानि अनुगुणः मूले भवितुमर्हति ।)

एवं दिवाकरात्प्राप्य दिवाकरसमधुतिः।
कामान्मनोऽभिलषितान्ब्राह्मणेभ्योऽददात्प्रभुः ।।२४।।[५]

पुरोहितपुरोगाश्च तिथिनक्षत्रपर्वसु।
यज्ञियार्थाः प्रवर्तन्ते विधिमन्त्रप्रमाणतः ।। २५।।[६]

---

(१)((४) भ्रातृभिः स्वजनेन च ; भ्रातृंश्च परिषस्वजे ,
(२)(१)द्या समुपागम्य ; (२)वन्द्यमानो ; पच०(for पश्य०; तया ; ययौ ,(अ)पयात्(for ऽश्व ); (३) तदानीं ; तदान्नं,
(३)(१)यच्च (for याति ); संस्कृतं तच्च भवति ; (२) धन्यम् ; स्वल्पम् ; पक्कम् , वन्यम्); (४) (अ) भोजयत (for भोज०),
(४)(१)भुक्रवत्सु च (२) द्विजान् ; (अ)नुगान्; (६)द्रौपदी (for पार्षती),
(५)(२)समप्रभः ; पात्रं हैरण्यमुत्तमं ; (३) आत्मां (for मनो०); कामात्मानोभिलषितान्, (४) (अ) ददात् (for ददौ),
(६)(३)यज्ञे पार्थाः ; यज्ञार्थाय; यज्ञार्थे स० ; इज्यार्थे स्म; (च; -०भ्यः)(for यज्ञि०); इज्यार्थे

ततः कृतस्वस्त्ययना धौम्येन सह पाण्डवाः ।
द्विजसङ्घैः परिवृताः प्रययुः काम्यकं वनम् ।। २६।।

**जनमेजयः**

पुष्पोपहारबलिभिर्बहुशश्च यथाविधि।
सर्वात्मभूतं सम्पूज्य यतप्राणो जितेन्द्रियः ।।२७।।
स्तवेन केन विप्रर्षे स तु राजा युधिष्ठिरः ।
विप्रार्थमाराधितवान्सूर्यमद्भुतविक्रमम् ।।२८।।
मयि स्नेहोऽस्ति चेद्ब्रह्मन्यदनुग्रहभागहम्।
भगवान्नास्ति चेद्गुह्यं तच्च मे ब्रूहि साम्प्रतम् ।।२९।।

**वैशम्पायनः**

शृणुष्वावहितो राजन्शुचिर्भूत्वा समाहितः ।
क्षणं च कुरु राजेन्द्र गुह्यं वक्ष्यामि ते हितम् ।।३०।।
क्षणं च कुरु राजेन्द्र सम्प्रवक्ष्याम्यशेषतः ।।(१)

धौम्येन तु यथाप्रोक्तं पार्थाय सुमहात्मने।
**नाम्नामष्टशतं पुण्यं तच्छृणुष्व महामते** ।।३१।।(२)

**धौम्यः**

सूर्योऽर्यमा भगस्त्वष्टा पूषाऽर्कस्सविता रविः ।
गभस्तिमानजः कालो मृत्युर्धाता प्रभाकरः ।।३२।।(3)

---

समर्तन्ते; (४) विधिवन्मन्त्रकोविदाः ,
(१)(४) सम्प्र (for सर्व); गुह्यं वक्ष्यामि ते हितं,
(२)(१)पूर्वं (for प्रोक्तं); (२) अष्टोत्तरं (for अष्टशतं ); नामाष्टशतमाख्यातं ; (४) महाद्युते ; शतं तच्छ्रुणु भूपते,
(३) धोम्य उं (धौम्यः); सूर्याय नमः,

पृथिव्यापश्च तेजश्च खं वायुश्च परायणम्।
सोमो बृहस्पतिश्शुक्रो बुधोऽङ्गारक एव च ।। ३३ ।।

इन्द्रो विवस्वान्दीप्तांशुश्शुचिश्शौरिश्शनैश्चरः ।
ब्रह्मा विष्णुश्च रुद्रश्च स्कन्दो वैश्रवणो यमः ।। ३४ ।।[१]

वैद्युतो जाठरश्चाग्निः ऐन्धनस्तेजसां पतिः ।
धर्मध्वजो वेदकर्ता वेदाङ्गो वेदवाहनः ।। ३५ ।।[२]

कृतं त्रेता द्वापरश्च कलिस्सर्वामराश्रयः ।
कला काष्ठा मुहूर्ताश्च पक्षा मासा ऋतुस्तथा ।। ३६ ।।[3]

संवत्सरकरोऽश्वत्थः कालचक्रो विभावसुः ।
पुरुषश्शाश्वतो योगी व्यक्ताव्यक्तस्सनातनः ।। ३७ ।।[4]

लोकाध्यक्षस्सुराध्यक्षो विश्वकर्मा तमोनुदः ।
वरुणस्सागरोंशुश्च जीमूतो जीवनोऽरिहा ।। ३८ ।।[5]

भूताश्रयो भूतपतिस्सर्वभूतनिषेवितः ।
मणिस्सुवर्णो भूतादिः कामदस्सर्वतोमुखः ।। ३९ ।।

स्रष्टा संवर्तको वह्निः सर्वस्यादिरलोलुपः
अनन्तः कपिलो भानुः[६]

---

(१)(१)विश्वात्मा (for दीप्तांशुः); (४)वै वरुणो (for वैश्र०),
(२)(२)निधिः(for पतिः),
(३)(१)द्वापरं च ; (२) सर्वमलाश्चयः; (४)पक्षो मास ऋतुश्च यः ;क्षणा यामा लवाः क्षपाः ; पक्षमासा ऋतेशयः; क्षपा याम-(मा) स्तथा क्षणः; (णाः) ; क्षपा यामा नवाः क्षणाः,
पक्षा मासा क्षपाः क्षणाः; पक्षा मासास्त्वहर्निशौ ; पक्षा मासत्वहर्निशं,
(४) (२)कालचक्रं,
(५)(१)काला (for लोका०); सुरा० (for प्रजा० ) (३); (ऽ)०शश्च, (ऽ)०भश्च (for ०ऽशुश्च ) ,
(६)करोचलः ; करोमलः (for ०रलोलुपः),
(३)मनः (मनुः) ;(कल्पः); सुपर्णो ; (४)दः कामगो विभुः

जयो विशालो वरदश्शीघ्रगः प्राणधारणः ।[1]

जयो विशालो वरदः सर्वधातुनिषेवितः ।

धन्वन्तरिर्धूमकेतुः आदिदेवोऽदितेस्सुतः ॥ ४० ॥[2]

द्वादशात्माऽरविन्दाक्षः पिता माता पितामहः ।

स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपम् ॥ ४१ ॥[3]

देवकर्ता प्रशान्तात्मा विश्वात्मा विश्वतोमुखः ।

चराचरात्मा सूक्ष्मात्मा मैत्रेण वपुषाऽन्वितः ॥ ४२ ॥

एतद्वै कीर्तनीयस्य सूर्यस्यैव महात्मनः ।

नाम्नामष्टशतं पुण्यं शक्रेणोक्तं महात्मना ॥ ४३ ॥

नामाष्टशतकं चेदं प्रोक्तमेतत्स्वयम्भुवा ॥ (४)

शक्राच्च नारदः प्राप्तो धौम्यश्च तदनन्तरम्।

धौम्याद्युधिष्ठिरः प्राप्य सर्वान्कामानवाप्तवान् ॥ ४४ ॥ [5]

सुरपितृगणयक्षसेवितं निशिचरसिद्धगणैश्च वन्दितम्।

वरकनकहुताशनप्रभं त्वमपि मनस्यभिधेहि भास्करम् ॥ ४५ ॥

सूर्योदये यस्सुसमाहितः पठेत्स पुत्रलाभं धनरत्नसञ्चयान्।

लभेत जातिस्मरतां सदा नरे धृतिं च मेधां च स विन्दते वराम् ॥ [6]

---

(१)(१)भूताशयो ; (२)लोकनमस्कृतः; (भूतहिते रतः); भूतपतिर्विभुः; भूतनिषेवकः,

(२)(१)विषादो ; धाता (for शालो);(२)निषेविता ; सर्वभूत० ; धारकः,

(३)(२)मही नभः (for पितां ); (४) त्रिविाष्टपं

(४)(२)सूर्यस्यामिततेजसः ; (२)प्रोक्तं (for पुण्यं); (३)अष्टोत्तरं शतं नाम्नां नामाष्टशतकं चेदं ; (४) शक्रेण सुमहात्मना ,

(५)(१)प्राप्य (for प्राप्तो) (२) तु (for च); (३) प्राप; (for प्राप्य); (४) अवाप्नुयात् ,

(६)(१)सु (for तु); (२)दारान् ; कामान् (for लाभं), (३)सदा नरः; धृतिं (for स्मूर्तिं) ; पुमान् (for पराम्) ,

इमं स्तवं देववरस्य कीर्तयेच्छृणोति वा यस्सुमनास्समाहितः ।
स मुच्यते शोकदवाग्निसागराल्लभेत कामान्मनसा यथेप्सितानि ।।[1]

**अस्मिन् पर्वणि ३अध्याये ४७ श्लोकाः सन्ति**

**आरण्यकपर्वणि तृतीयोऽध्यायः**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां आरण्यकपर्वणि पाण्डवानां प्रव्रजने तृतीयोऽध्यायः ।। ३ ।।

**श्रीमन्महाभारततात्पर्यनिर्णये द्वाविंशेध्याये -**

बभार तेनैव युधिष्ठिरस्तान् प्रत्येकशस्त्रिंशतदासदासिकान् ।
सुवर्णपात्रेषु हि भुञ्जते ये गृहे तदीये बहुकोटिदासिके ।। ६ ।।
सत्सङ्गमाकाङ्क्षिण एव तेऽवसन् पार्थैः सहान्ये च मुनीन्द्रवृन्दाः ।
शृण्वन्त एभ्यः परमार्थसाराः कथा वदन्तश्च पुरातनास्तथा ।। ७ ।।
एवं गजानां बहुकोटिवृन्दांस्तथा रथानां च हयांश्च वृन्दशः ।
विसृज्य रत्नानि नरांश्च वृन्दशो वने विजह्रुर्दिवि देववत् सुखम् ।।८ ।।
गवां च लक्षं प्रददाति नित्यशः सुर्वणभारांश्च शतं युधिष्ठिरः ।
सभ्रातृकोऽसौ वनमाप्य शक्रवन्मुमोद विप्रैः सहितो यथासुखम् ।। ९ ।।
पार्थेषु यातेषु किमत्र कार्यमिति स्म पृष्टो विदुरोऽग्रजेन ।
आहूय राज्यं प्रतिपादयेति प्राहैनमाहाथ रुषाऽऽम्बिकेयः ।। १० ।।

**महाभारते- वनपर्वणि ४ अध्यायः**

# 03-01-004

# ४. चतुर्थः अध्यायः

(१)(१)कीर्तयेत् (for योनरः); (२) शृणोति वा यः (for प्रकीर्तयेच्छचि०) , शुद्धमनाः (for शुचिसुमनाः); (३) वि; प्र (for स); (४) मनसो ,

पाण्डवेषु वनं गतेषु सत्सु हितं पृष्टेन विदुरेण धृतराष्ट्रं प्रति पाण्डवानां पुना राज्ये स्थापनविधानम् ।। १ ।। ततो धृतराष्ट्रधिक्कृतेन विदुरेण पाण्डवान् प्रति प्रस्थानम् ।। २ ।।

### वैशम्पायनः

वनं प्रविष्टेष्वथ पाण्डवेषु प्रज्ञाचक्षुस्तप्यमानोऽम्बिकेयः ।
धर्मात्मानं विदुरमगाधबुद्धिं सुखासीनो वाक्यमुवाच राजा ।। १ ।। (१)

### धृतराष्ट्रः

प्रज्ञा च ते भार्गवस्येव शुद्धा धर्मं च त्वं परमं वेत्थ सूक्ष्मम् ।
समश्च त्वं सम्मतः कौरवाणां पथ्यं चैषां मम चैव ब्रवीहि ।। २ ।। (२)
एवं गते विदुर यदद्य कार्यं पौराश्च मे कथमस्मान् भजेरन् ।
ते चाप्यस्मान्नोद्धरेयुः समूलान् न कामये तांश्च विनश्यमानान् ।। (३)

सौबलेनैव पापेन दुर्योधनहितैषिणा ।
क्रूरमाचरितं कर्म न मे प्रियमनुष्ठितम् ।। (४)
उत्तरं प्राप्तकालं च किमन्यन्मन्यते क्षमम् ।।
नास्ति धर्मे सहायत्वमिति मे दीयते मनः ।
यत्र पाण्डुसुताः सर्वे क्लिश्यन्ति वनमागताः ।। (५)

### विदुरः

---

(१)(४)सुखासीनं ,
(२)(१) हि (for च); वृद्धा (for शुद्धा); (२)वेत्सि; वेद (for वेत्थ); (३) कामश्च (for समं); (४) तेषां ; चेदं (for चैषां); ()ह ब्रूहि (for ब्रवीहि),
(३)(१)वीर (for विदुर); (२) त्वेते; मे; च ते (for चेमे); (४) तत् त्वं, ब्रूयाः साधु कार्याणि वेत्सि,
(४)तथैवं हि कृते- पां
(५)पं(२)क्षत्तर् (for कर्म),

त्रिवर्गोऽयं धर्ममूलो नरेन्द्र  राज्यं चेदं धर्ममूलं वदन्ति।

धर्मे राजन्वर्तमानः स्वशक्त्या पुत्रान्सर्वान्पाहि पाण्डोः सुतांश्च ।। ४।।(१)

स वै धर्मो विप्रलुप्तः सभायां पापात्मभिः सौबलेयप्रधानैः ।

आहूय कुन्तीसुतमक्षवत्यां पराजैषीत्सत्यसन्धं सुतस्ते ।। ५।।(२)

एतस्य ते दुष्प्रणीतस्य राजन् शेषस्याहं परिपश्याम्युपायम्।

यथा पुत्रस्तव कौरव्य पापान्मुक्तो लोके प्रतितिष्ठेत साधु ।। ६।।(३)

तद्वै सर्वं पाण्डुपुत्रा लभन्तां यत्तद्राजन्नभिसृष्टं त्वयाऽऽसीत्।

एष धर्मः परमो यत्स्वकेन राजा तुष्येन्न परस्वेषु गृध्येत् ।। ७।।(४)

यशो न नश्येज्ज्ञातिभेदश्च न स्याद्धर्मो न स्यान्नैव चैवं कृते त्वाम्।(५)

एतत्कार्यं तव सर्वप्रधानं तेषां तुष्टिः शकुनेश्चावमानः ।

एवं शेषं यदि पुत्रेषु ते स्यादेतद्राजंस्त्वरमाणः कुरुष्व ।। ८ ।।(६)

अथैतदेवं न करोषि राजन् ध्रुवं कुरूणां भविता विनाशः ।

न हि क्रुद्धो भीमसेनोऽर्जुनो वा शेषं कुर्याच्छात्रवाणामनीके ।। ९ ।।(७)

येषां योद्धा सव्यसाची कृतास्त्रो धनुर्येषां गाण्डिवं लोकसारम् ।

---

(१)(४)पाण्डो (for कुन्ती),

(२)(१)विप्रल (लु) ब्धः; युक्तः; नष्टः; (३) आत्मप्रधानसुतमक्षं,

(३)(२)शेषं नान्यं (for शेषस्याहं); (३) तिष्ठते साधुवृत्तः; साधुः,

(४)(२)इति; अभि०; विनि०; अग्नि (for अति०),

(५)(२)जह्याद्धर्मो (for धर्मो न स्यात्),

(६)(१)सर्वं ; धर्म (for सर्व-); (२) ०वमानात्; (३) एतच्छ्रे यस्तव (for एवं शेषं यदि); पुत्रस्य (for पुत्रेषु) ;

(७)(१)तथै० (for अथै०),

येषां भीमो बाहुशाली च योद्धा तेषां लोके किं नु दुष्प्रापमस्ति ।। [(१)]

येषां राजा धर्मपुत्रो महात्मा तोषां लोके किं नु दुष्मापमस्ति ।।

उक्तं पूर्वं जातमात्रे सुते ते मया यत्ते हितमासीत्तदानीम् ।

पुत्रं त्यजेममहितं कुलस्य हितं परं न च तत्त्वं चकर्थ ।। १० ।।

लक्षालङ्कारः- चकर्थ, इदानीम् इत्यत्र प्रश्नं चकर्थेति योग्यपदाध्याहारः ।।

इदानीं ते हितमुक्तं न चेत् त्वमेवं कर्ता परितप्तासि पश्चात् ।। ११।।[(२)]

यद्येतदेवमनुमन्ता सुतस्ते सम्प्रीयमाणः पाण्डवैरेकराज्यम् ।

तापो न ते भविता प्रीतियोगात् तस्मान्निगृह्णीष्व सुतं सुखाय ।। १२ ।।

दुर्योधनं मानिनं पापबुद्धिं पाण्डोः पुत्रं प्रकुरुष्वाधिपत्ये ।। १३ ।।[(३)]

ध्रुवं विनाशस्तव पुत्रेण धीमन्सबन्धुवर्गेण सहैव राजभिः।

चतुर्दशे चैव वर्षे नरेन्द्र कुलक्षयं प्राप्स्यसि राजसिंह ।।

तस्मात्कुरुष्वाधिपत्ये नरेन्द्र युधिष्ठिरं धर्मवतां वरिष्ठम् ।

अजातशत्रुर्हि विमुक्तरागो धर्मेणेमां पृथिवीं शास्तु राजन् ।

ततो राजन् पार्थिवाः सर्व एव वैश्या इवास्मानुपतिष्ठन्तु सद्यः ।। १४ ।।

दुर्योधनः शकुनिः सूतपुत्रः प्रीत्या राजन् पाण्डुपुत्रान् भजन्तु ।

---

(१)(१)गोप्ता ; यन्ता; आस्ते; शास्ता (for योद्धा); (४) नाप्राप्य; न प्राप्यं)

(२)(२)तद् (for ते); (३) एनम् (for ०मम); (४) हितं परं (इदं च) (for (इ)त्येतदृ राजन्); तदा; तथा (for च तत्); (३)त्वं तच्चकर्थ; नन्ववेत्थ ; इदं च राजन् , इदानीं ते);एवं कर्ता (for कर्तासि राजन्),

(३)(१)एतत् एवं ; वै न चे(तस्माः); निगृह्णीष्व सुतं सुखाय;नि (for न); (३) अथापरं; ०थोपकारो; यथापरो; दुर्योधनं त्वहितं वै (तं); निगृह्य; यत्तापस्करं भवति हितं निगृह्णीष्व;(१)दुर्योधनमहितं वै विसृज्य; दुर्योधनं सहितं संनिगृह्य ;दुर्योधनं वै त्वहितं (चैव हि तं) निगृह्य; (२)अपज्वरो भवति० (सि०); हि तं प्रगृह्य ; निगृह्य पुत्रं मानिनं पापबुद्धि० राज्ये (for पत्ये),

दुःशासनो याचतु भीमसेनं सभामध्ये द्रुपदस्यात्मजां च ।। १५ ।।[(१)]

युधिष्ठिरं त्वं परिसान्त्वयस्व राज्ये चैनं स्थापयस्वाभिपूज्य।

त्वया पृष्टः किमहमन्यद्वदेयमेतत्कृत्वा कृतकृत्योऽसि राजन् ।। १६ ।।[(२)]

**धृतराष्ट्रः**

एतद्वाक्यं विदुरोक्तं सभायामिह प्रोक्तं पाण्डवान्प्राप्य मां च ।

हितं तेषामहितं मामकानामेतत्सर्वं मम नोपैति चेतः ।। १७ ।। [(३)]

लक्षालङ्कारः- एतद्वाक्यं विदुरोक्तम् इत्यत्र हे विदुर एतद्वाक्यं सभायां द्यूतसभायम् उक्तं, मां प्राप्य पाण्डवानुद्दिश्य इह रहसि प्रोक्तं तदेव वाक्यं प्रोक्तं मम चेतः नावैति न प्राप्नोति ।।

इदं त्विदानीं कृतमेव निश्चितं तेषामर्थे पाण्डवानां यदात्थ ।

तेनाद्य मन्ये नासि हितो ममेति कथं हि पुत्रं पाण्डवार्थे त्यजेयम् ।।[(४)]

लक्षालङ्कारः- इदं त्विदानी□ कृतम् इत्यत्र येन कारणेन तेषां पाण्डवानामर्थे यथार्थम् अर्थं पाण्डवप्रयोजनं यथा अनतिक्रम्य इदं पाण्डवानामर्धराज्यदानं त्वया इदानी□ निश्चितमेव कृतम् । तेन कारणेन त्वं मम अहित इति मन्ये । पाण्डवार्थे पुत्रं त्यजेयमित्येतत् कथं हि, न कथञ्चिदिति पदयोजना ।।

असंशयं तेऽपि ममैव पुत्रा दुर्योधनस्तु मम देहात्प्रसूतः ।

स्वं वै देहं परहेतोस्त्यजेति को नु ब्रूयात्समतामन्ववेक्षन् ।। १९ ।।[(५)]

(१)(२)पाण्डुपुत्रं ;भजन्तु,

(२)(२)स्थापयित्वा०, स्वराज्ये (अ)भि०); राजन्वचोभिः कुशलैः प्रपूज्य ;(४) भवाद्य for ऽसि राजन् )

(३)(१)श्रुतं; श्रुत्वा (for एतद्); सर्व (for वाक्यं'); तत् (for ते); (४) नावैति ; नैवेति (for नोपैति),

(४)(१)गत एव ; कृतमेव ; मनसैव कुत एव) गत एव-कृपाठः; (२) यथात्थ ; यदा तु; यदर्थ० (for यदात्थ); (३) केना० (for तेना०); नाशहेतोः नास्ति हितो ; नासि भीतो; नासि मतो; नासि भूतो ; ह्यहितो (for नासि हितो); (४) हि पुत्रं नाहं; तथा हि पुत्रं; कथं नु

(५)(३) त्वं वै; स्वं चैव; स्वकं; स्वकं वै (for स्वं वै),

आत्मोक्तं (for स्वं वै देहं); (४) अन्ववेक्ष्य;- कृपाठः; को तु-कृपाठः

स मां जिह्मं विदुर सर्वं ब्रवीषि मन्युं च तेऽहमधिकं धारयामि ।
यथेच्छकं गच्छ वा तिष्ठ वा त्वं सुसान्त्व्यमानाप्यसती स्त्री जहाति ।।(१)

**वैशम्पायनः**

एतावदुक्त्वा धृतराष्ट्रोऽन्वपद्यदन्तर्वेश्म सहसोत्थाय राजा ।
नेदमस्तीति विदुरो भाषमाणः सम्प्राद्रवद्यत्र पार्था बभूवुः ।। २१ ।।(२)

लक्षालङ्कारः - नेदमस्ति इत्यत्र इदं सन्धिकार्यं नास्तीति भाषमाण इत्यर्थः ।।

अस्मिन् आरण्यकपर्वणि ४ अध्याये २१श्लोकाः सन्ति

आरण्यकपर्वणि चतुर्थोऽध्यायः

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायाम् आरण्यकपर्वणि
विदुरवाक्यप्रत्याख्याने चतुर्थोऽध्यायः ।। ४ ।।

श्रीमन्महाभारततात्पर्यनिर्णये द्वाविंशोध्याये -

ज्ञातं प्रतीपोऽसि ममाऽत्मजानां न मे त्वया कार्यमिहास्ति किञ्चित् ।
यथेष्टतस्तिष्ठ वा गच्छ वेति प्रोक्तो ययौ विदुरः पाण्डुपुत्रान् ।। ११ ।।

महाभारते- वनपर्वणि ५ अध्यायः

# 03- 01- 005

# ५.पञ्चमोऽध्यायः

विदुरस्य काम्यकवने पाण्डवसमागमः । तेन तेषु तत्र स्वागमनकारणनिवेदनम् ।।

---

(१)(१)मां (for मा); जिह्मं सर्वं; त्वं (for सर्वं); सतां मतं विदुर जिह्मं ब्रवीषि,
(२) मानश्च); (३)यथेष्टकं ग-ख ; तस्माद्यथेच्छं (for यथेच्छकं); गच्छ तिष्ठ साधो (for वा त्वं);
(४) सु, सुसान्त्विताापि (पि); संसान्त्व (त्व्य)० माना०,
साध्यमाना (for सुसान्त्व्यमाना); हि (अ)पि),
(२)(१)एवम् (for एतावद्); (२) राजा; तस्मात् (for राजन्); (३)अथ,

**वैशम्पायनः**

पाण्डवास्तु वने वासमुद्दिश्य भरतर्षभाः ।
प्रयुः जाह्नवीकूलात् कुरुक्षेत्रं सहानुगाः ॥ १ ॥[१]

सरस्वतीदृषद्वत्यौ यमुनां च निषेव्य ते।
ययुर्वनेनैव वनं सततं पश्चिमां दिशम् ॥ २ ॥

ततः सरस्वतीकूले समेषु मरुधन्वसु।
काम्यकं नाम ददृशुर्वनं मुनिजनप्रियम् ॥ ३ ॥[२]

तत्र ते न्यवसन्वीरा वने बहुमृगद्विजे।
अन्वास्यमाना मुनिभिः सान्त्व्यमानाश्च भारत ॥ ४ ॥

विदुरस्त्वथ पाण्डूनां सदा दर्शनलालसः ।
जगामैकरथेनैव काम्यकं वनमृद्धिमत् ॥ ५ ॥[३]

ततो यात्वा विदुरः काम्यकं तच्छीघ्रैरश्वैर्वाहितः स्यन्दनेन।
ददर्शासीनं धर्मात्मानं विविक्ते सार्धं द्रौपद्या भ्रातृभिर्ब्राह्मणैश्च ॥[४]

ततोऽपश्यद्विदुरं तूर्णमेकमभ्यायान्तं सत्यसन्धः स राजा ।
अथाब्रवीद्भ्रातरं भीमसेनं किं नु क्षत्ता वक्ष्यति नः समेत्य ॥ ७ ॥[५]

चिन्नायं वचनात्सौबलस्य समाह्वाता देवनायोपयाति ।

---

(१)(२)भरतर्षभ ; (३) जाह्नवीतीरात्; ०तीरे
(२)(१)सरस्वतीतीरे; (२) समेता; त्य(for षु),
(३)(१)अथ (for अपि); (२) तथा; सदा (for तदा),
(४) (१)यातो; गत्वा (ययौ); यात्वाथ; यात्वा तु (for यात्वा ); कानने;काम्यकं (for काननं);
(२) ०वाहितः (for ०वाहिना); (३) धर्मात्मानं (for धर्म०); -(४) भ्रातृभिः ब्राह्मणैः,
(५) (१)०मभ्युमन्तम् तूर्णमाराद्-घ); एकम् (for आराद्); (२) तदायान्तं; अभ्यागतं; सत्यसन्धं;
(३) भीमसेनं समीक्ष्य (for भ्रातरं भीम०),

कच्चित्क्षुद्रः कुशाली चायुधानि जेष्यत्यस्मान्पुनरेवाक्षवत्याम् ।। ८ ।।(१)

समाहूतः केनचिदाह्वाय नाहं शक्तो भीमसेनापयातुम्।

गाण्डीवे च संशयिते कथाश्चिद् राज्यप्राप्तिः संशयिता भवेन्नः ।। ९ ।।(२)

लक्षालङ्कारः - आह्वाय द्यूतयुद्धाय । गाण्डीवे संशयित इत्यत्र गाण्डीवे कथश्चित् संशयिते सं सम्यक् शयिते ग्लहार्थं तेषां गृहे शयनं प्रापिते सति नः राज्यप्राप्तिः संशयिता सन्दिग्धा भवेत् । तस्मादायुधानां ग्लहं सर्वथा न करोमीति भावः ।।

## वैशम्पायनः

तत उत्थाय विदुरं पाण्डवेयाः प्रत्यगृह्णन्नृपते सर्व एव ।

स तैः समेतैः सत्कृतः पाण्डवेयैः यथोचितं पाण्डुपुत्रान्समेयात् ।।१०।।(३)

समाश्वस्तं विदुरं ते नरर्षभास्ततोऽपृच्छन्नागमनाय हेतुम्।

स चापि तेभ्यो विस्तरतः शशंस यथावृत्तो धृतराष्ट्रोऽम्बिकेयः ।।११।।(४)

## विदुरः

अवोचन्मां धृतराष्ट्रोऽभिगुप्तमजातशत्रो परिगृह्याभिपूज्य ।

एवं गते समतामभ्युपेत्य पथ्यं तेषां मम चैव ब्रवीहि ।। १२ ।।(५)

मयाप्युक्तं यत्क्षेमं कौरवाणां हितं पथ्यं धृतराष्ट्रस्य चैव ।

---

(१) (१)वचसा (for ०नात्); (२) ०ह्वातुं; यातः(for याति); (३)कुशली, शकुनिर्); चा० (for ना०); (४) अस्माकं (for अस्मान्),

(२) (१)आव्रजेति; आद्रवेति ); (२) उपयातुं (for अप०); (३) गाण्डीवे - वा; च चेत् (for वा); कथं नु (घ); कथं तु; कदाचिद्; कथं तद् (for कथश्चिद्); (४)पुनः (for राज्य०-),

(३) (३) (ततः); समेतैः(तः), (सहितैः); स च तानाजमीढो (४) पाण्डवेयैः ,

(४)(१)वै विदुरं (for विदुरं ते); वै(for ते); (२) आगमनस्य,

(५) (१)मा (for मां); स; न; (ऽ), (ऽ); (२) प्रतिं (for परिं); (४) चैषां (for तेषां); चैवेह ब्रूहि ; च ब्रूहि सौम्य (for चैव ब्रवीहि),

तद्वै पथ्यं तन्मनो नाभ्युपैति ततश्चाहं क्षेममन्यन्न मन्ये ।। १३ ।।(१)

परं श्रेयः पाण्डवेया मयोक्तं न मे तच्च श्रुतवानाम्बिकेयः ।

यथाऽऽतुरस्येव हि पथ्यमौषधं न रोचते स्मास्य तदुच्यमानम् ।। १४।।(२)

न श्रेयसे यततेऽजातशत्रो स्त्री श्रोत्रियस्येव गृहे प्रदुष्टा ।

ध्रुवं न रोचेद्भरतर्षभस्य पतिः कुमार्या इव षष्टिवर्षः ।। १५ ।। (३)

ध्रुवं विनाशो नृप कौरवाणां न वै श्रेयो धृतराष्ट्रः परैति।

यथा च पर्णे पुष्करस्यावसिक्तं जलं न तिष्ठेत्पथ्यमुक्तं तथास्मिन् ।।(४)

ततः क्रुद्धो धृतराष्ट्रोऽब्रवीन्मां यत्र श्रद्धा तात तत्र प्रयाहि।

नाहं भूयः कामये त्वां सहायं महीमिमां पालयितुं पुरं वा ।। १७ ।। (५)

सोऽहं त्यक्तो धृतराष्ट्रेण राजना त्वां शांसितुं तूर्णमुपागतोहम्।

युक्तं सर्वं यन्मयोक्तं सभायां तद्धार्यतां यत्प्रवक्ष्यामि भूयः ।। १८ ।।(६)

क्लेशैस्तीव्रैर्युज्यमानः सपत्नैः क्षमां कुर्वन्कालमुपासते यः ।

---

(१) (१)मयाप्युक्तः; मया ह्युक्तः; मया तूक्तं सत्त्विदं; स च यत् (for यत्क्षमं); (२) युक्तं (for पथ्यं); (३) (४)न रुचित्वमभ्युपैति; तद्वै , तस्मै, न चाभ्युपैति; तद्वै तस्मै (स्य); चेतसि नाभ्यु०,

(२) (१)मयोक्तो; (२)तद्वाक्यं (for मे तच्च); (३) औषधं(-ध) अन्नंक-ख); (४) तस्य; ह्यस्य; चास्य (for स्मास्य),

(३) (१) नीयते)(-ध); (३) ध्रुवं न (for ब्रवन्न); नावैति लावण्यवयोपपन्ना; ध्रुवं न रोचेद्भरतं; (४) पतिं कुमारीव हि षष्टिवर्षं,

(४) (१)एवं (for ध्रुवं); नैकप्रकारैरनुनीयमानः (२) धृतराष्ट्रं (३) च यथा पत्रे (for पर्णे); अवसिक्तं (अभिषिक्तं); (for इव सिक्तं),

(५) (२)यस्मिन्; यदि (for यत्र ); तात (तव); तत्र प्रयाहि; तत्र तात (च त्वं); भारत); (३) त्वा (for त्वां); सभायां (for सहायं); (४) पालयानः सुदुष्टचित्तं (for ०चेष्टं); विपरीत-चेष्टं (बुद्धि०),

(६) (१)राज्ञा (for राजन्); (२) प्रशासि-(भाषि) तुं त्वाम्; त्वां शायितुम् ; त्वां श्रावितुम् त्वां शासितुम् (-ध); उपागतम्; यातो नरेन्द्र; यातोस्मि राजन् (for यातस्त्वरावान्) (३) तद्वै -ख); (४) च (for प्र); चान्यत् (for भूयः),

संवर्धयन्स्तोकमिवाग्निमात्मवान्स वै भुङ्क्ते पृथिवीमेक एव ।। १९ ।।(१)

यस्याविभक्तं वसु राजन्सहायैस्तस्य दुःखेऽप्यंशभाजः सहायाः ।

सहायानामेष सङ्ग्रहणेऽध्युपायः सहायाप्तौ पृथिवीप्राप्तिमाहुः ।। २० ।।(२)

लक्षालङ्कारः- यस्याविभक्तम् इत्यत्र आ समन्तात् विभक्तमिति पदच्छेदः ।

तस्मात्सत्यं सततं वै ब्रुवाणो लोकस्य हृद्यो भवतीति सद्यः ।

सत्यं श्रेष्ठं पाण्डव विप्रलापं तुल्यं चान्नं सह भोज्यं सहायैः ।

आत्मा चैषामग्रतो नातिवर्तेत् एवंवृत्तिवर्धते भूमिपालः ।। २१ ।।(३)

लक्षालङ्कारः- निष्प्रलापाः 'प्रलापोऽनर्थकं वच' इत्यभिधानात् व्यर्थवाक्यरहिताः हे पाण्डवाः तस्मिन् सत्ये सत्यपि एवंप्रवृत्तिर्यस्य स राजा (वर्धत इति) ।

मित्रैः पुत्रैर्भूमिहस्त्वश्वभूरि महीमिमां पालयितुं पुरस्तात् ।

## युधिष्ठिरः

एवं करिष्यामि यथा ब्रवीषि परां बुद्धिमुपगम्याप्रमत्तः ।

यच्चाप्यन्यद्देशकालोपपन्नं तद्वै वाच्यं तत्करिष्यामि कृत्स्नम् ।।२२ ।।(४)

अस्मिन् आरण्यकपर्वणि ५ अध्याये २२ श्लोकाः सन्ति

आरण्यकपर्वणि पञ्चमोऽध्यायः

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां आरण्यकपर्वणि

---

(१) (१)योज्यं (for युज्य); समन्तात् (for सपत्नैः); (२) अवेक्षते (for उपासते),

(२) (२)दुःखस्यांशं (for दुःखेऽप्यंशं); (३) अपि (for अभि०); (४) सहायावाप्तौ, सहायावाप्तिः; सहायप्राप्ति० (for सहायाप्तौ),

(३) (१)श्रेयं (for श्रेष्ठं ); पाण्डवा; निष्प्रलापः विप्रलापं ; निष्मभावं (२) तस्मिन् (तस्मात्) (for तुल्यं); (३) मा (for न); स्म पूज्यो ; (अ)भिवर्तेद् (अ)ति०); (४) एवंवृत्ति ; ०वृत्तं वर्तते (for वर्धते),

(४)(१)तथा (for एवं); भविं०(for करि०); (४)सर्वं; राजन्; भूयः (for कृत्स्नम्),

विदुरनिर्वासे पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमन्महाभारततात्पर्यनिर्णये द्वाविंशेध्याये -

तस्मिन् गते भ्रातृवियोगकर्शितः पपात भूमौ सहसैव राजा ।
सञ्ज्ञामवाप्याऽदिशदाशु सञ्जयं जीवामि चेदाशु ममाऽनयानुजम् ॥ १२ ॥

महाभारते- वनपर्वणि ६ अध्यायः

# 03-01-006
# ६.षष्ठोऽध्यायः

विदुरविप्रयोगखिन्नेन धृतराष्ट्रेण तदाह्वानाय सञ्जयप्रेषणम् ॥ १ ॥ सञ्जयाहूतेन विदुरेण पुनर्धृतराष्ट्रं प्रत्यागमनम् ॥ २ ॥

**वैशम्पायनः**

गते तु विदुरे राजन्नाश्रमं पाण्डवान्प्रति।
धृतराष्ट्रो महाप्राज्ञः पर्यतप्यत भारत ॥ १ ॥(१)

विदुरस्य प्रभावं च सन्धिविग्रहकारितम् ।
विवृद्धिं च परां मत्वा पाण्डवानां भविष्यति।

स सभाद्वारमागम्य विदुरस्मारमोहितः ।
समक्षं पार्थिवेन्द्राणां विसंज्ञः प्रापतद् भुवि ॥ २ ॥(२)

**लक्षालङ्कारः-** विदुरस्मारमोहित इत्यत्र स्मारः स्मरणम् ।

पपात सहसा राजा छिन्नद्रुम इवावशः ।

---

(१)आश्रमं; पाण्डवान्; (४) परि (for पर्य० ); दुर्मनाः (for भारत),
(२)(१)आगस्य; आसाद्य (for आगम्य); सभाद्वारमुपागम्य; (२)स्नेह० स्मारं; स्नेहेत्यपपाठः, (४) विसञ्ज्ञः (विदुरः); पपाताविष्टचेतनः

स तु लब्ध्वा चिरात् सञ्ज्ञां समुत्थाय महीतलात्।
समीपोपस्थितं राजा सञ्जयं वाक्यमब्रवीत् ॥ ३ ॥[१]

भ्राता मम सुहृच्चैव साक्षाद्धर्म इवापरः ।
तस्य स्मृत्याद्य सुभृशं हृदयं दीर्यतीव मे ॥ ४ ॥[२]

तमानयस्व धर्मज्ञं मम भ्रातरमाशु वै।
इति ब्रुवन्स नृपतिः कृपणं पर्यदेवयत् ॥ ५ ॥[३]

पश्चात्तापाभिसन्तप्तो विदुरस्मारकर्षितः ।
भ्रातृस्नेहादिदं राजा सञ्जयं वाक्यमब्रवीत् ॥ ६ ॥[४]

गच्छ सञ्जय जानीहि भ्रातरं विदुरं मम।
ध- यदि जीवति रोषेण मया पापेन निर्धुतः ।
मया मूढेन निकृतः कच्चिज्जीवति वा न वा ॥ ७ ॥[५]

लक्षालङ्कारः- निकृतः 'निकृतः स्याद्विप्रकृतः' इत्यभिधानात् अपकृतः, निरस्त इति यावत् ।

न हि तेन मम भ्रात्रा सुसूक्ष्ममपि किञ्चन।
व्यलीकं कृतपूर्वं वै प्राज्ञेनामितबुद्धिना ॥ ८ ॥[६]

लक्षालङ्कारः- व्यलीकं कृतपूर्वम् इत्यत्र 'अलीकं त्वप्रियेऽनृतम्' इत्यभिधानात् व्यलीकम् अप्रियम् ॥

---

(१)(१)तु लब्ध्वा; ततः पुनः); (२)धरासनात् (for मही०); (३)राजन् (for राजा); भ्रातृस्नेहादिदं राजा; समीपे संस्थिते राजन्,

(२)(३)तं च (for तस्य); स्मृत्या (for स्मृत्वा०); तप्यती (for दीर्यती); हृदयं दीर्यते मम; मनो वै दयिते च मे,

(३)(४)करुणं घ ,

(४)(२) मोहितः; (३)स्नेहान्वितो,

(५)(२)भ्रातरं बिदुरं; मया(for मम); मम भ्रातरमाशु वै; निर्हूतः;निन्दितः; निर्वृतः (for निर्धुतः) मया पापान्निषेधितः;(३)मूढेन निकृतः कश्चिद्यदि(कच्चिदद्य); जीवति वा न वा

(६)(३)तु, वै(for मे); (४) कृतं (अ)मितं)

स व्यलीकं कथं प्राप्तो मत्तः परमबुद्धिमान् ।
त्यक्ष्यामि जीवितं प्राज्ञ तं गच्छानय सञ्जय ॥ ९ ॥[१]

तस्य तद्वचनं श्रुत्वा राज्ञस्तमनुमान्य च ।
सञ्जयो बाढमित्युक्त्वा प्राद्रवत्काम्यकं वनम् ॥ १० ॥[२]

सोऽचिरेण समासाद्य तद्वनं यत्र पाण्डवाः ।
रौरवाजिनसंवीतं ददर्शाथ युधिष्ठिरम् ॥ ११ ॥

विदुरेण सहासीनं ब्राह्मणैश्च सहस्रशः ।
भ्रातृभिश्चाभिसङ्गुप्तं देवैरिव शतक्रतुम् ॥ १२ ॥[३]

युधिष्ठिरमथाभ्येत्य पूजयामास सञ्जयः ।
भीमार्जुनयमाश्चापि तथैव प्रत्यपद्यत ॥ १३ ॥[४]

राज्ञा पृष्टः स कुशलं सुखासीनश्च सञ्जयः ।
शशंसागमने हेतुमिदं चैवाब्रवीद् वचः ॥ १४ ॥[५]

लक्षालङ्कारः- शशंसागमने हेतुम् इत्यत्र आगमने हेतुं धृतराष्ट्रं पाण्डवदर्शनाख्यमहाफललाभात् शशंस 'शंस स्तुतौ' इति धातोः अस्तौषीत् ॥

**सञ्जयः**

राजा स्मरति ते क्षत्तर्धृतराष्ट्रोऽम्बिकासुतः ।

---

(१)(१) व्यलीकं च (for स व्यलीकं); (२)परं (बलं); (for कथं); (३) त्यक्त्वा हि ; त्यक्ष्यामि; त्यक्तास्मि (for न जह्याज्),

(२)(४)प्रति (for वनम्); (३)जगाम सञ्जस्तूर्णं यत्रास्ते विदुरो वने-अधिकपाठः-ध

(३)(१)समा० (for सहा०); (२) समन्ततः (for सह०); (३) चापि सङ्गुप्तं; सहितं गुप्तं (for चाभिस०); (४) पुरन्दरं (for शत०),

(४)(१)उपागम्य (for अथाभ्येत्य); (३) ०यमाश्चपि; (४) तदा सं (for तदर्हं); तद्युक्तं प्रतिपेदिरे,

(५)(१)राज्ञः (for राज्ञा); च; सु (for स); (४) इदं वचनमब्रवीत्,

तं पश्य गत्वा त्वं क्षिप्रं सञ्जीवय नराधिपम् ।। १५ ।।[१]

सोऽनुमान्य कुरु श्रेष्ठान् पाण्डवान् कुरुनन्दनान्।
नियोगाद्राजसिंहस्य गन्तुमर्हसि सत्तम ।। १६ ।।[२]

**वैशम्पायनः**

एवमुक्तस्तु विदुरो धीमान्स्वजनवत्सलः।
युधिष्ठिरस्यानुमते पुनरायाद्गजाह्वयम् ।। १७ ।।[३]

सोऽभिगत्वा तदा वेश्म राज्ञः समभिवाद्य च ।
उपातिष्ठन्महात्मानं राजानं प्रत्यवर्तत ।। १८ ।।

तमब्रवीन्महातेजा धृतराष्ट्रः प्रतापनान् ।
दिष्ट्या प्राप्तोऽसि धर्मज्ञ दिष्ट्या स्मरसि मेऽनघ ।। १९ ।।[४]

अद्य रात्रौ दिवा चाहं त्वत्कृते भरतर्षभ।
प्रजागरे प्रपश्यामि विचित्रं देहमात्मनः ।। २० ।।[५]

सोऽङ्कमारोप्य विदुरं मूर्धन्याघ्राय चैव ह ।
क्षम्यतामिति चोवाच यदुक्तोऽसि मयानघ ।। २१ ।।[६]

धृतराष्ट्रो महाराज भ्रातृस्नेहादुवाच ह ।*

---

(१)(१) त्वां स्मरते (for स्मरति ते); (३)धर्मज्ञ; त्वरितं; सुक्षिप्रं; स क्षिप्रं (for त्वं क्षिप्रं); (४) च पार्थिवम्); त्वच्छोकाकुलितेन्द्रियं,

(२)(१)नरश्रेष्ठ; कुरून् सर्वान्; नरश्रेष्टान्; (२)कुन्ति०; कुरुनन्दन; (४) भारत; सत्तम (for मानद),

(३) (२) वल्लभः -कृपाठः (for वत्सलः); (४) पुरमागाद् (for पुनरायाद्);

(४)(१)महाराजः; महाप्राज्ञः, आगतं विदुरं ज्ञात्वा, (दृष्ट्वा); (२)राजा वचनमब्रवीत्; धृतराष्ट्रोम्बिकासुतः (४) काङ्क्षमाणस्य दर्शनं,

(५)(१)रात्रौ for चाहं,

(६)(१) आनीय, आदाय); स समादाय चैवैनं; (२) , मूर्घ्नि चाघ्राय चैव हि; वै भृशं; भारत,

युधिष्ठिरस्तु कुशली भ्रातृभिः सह तिष्ठति ।
अथ रात्रि दिनं चाहं स्वकृते भरतर्षभ ।

प्रीतस्त्वमेव मे नित्यं भ्राता सर्वगुणान्वितः ॥[१]

**विदुरः**

क्षान्तमेव मया राजन्गुरुर्मे परमो भवान् ।
एषोऽहमागतः शीघ्रं त्वद्दर्शनपरायणः ॥ २२ ॥[२]

भवन्ति हि कुरुश्रेष्ट पुरुषा धर्मचेतसः ।
दीनानुपातिनो राजन्नात्र कार्या विचारणा ॥ २३ ॥[३]

**लक्षालङ्कारः-** धर्म एव वेतनं जीवनोपायो येषां ते धर्मवेतनाः । दीनानुपातिन इत्यत्र दीनाननुसृत्य पतन्तीति दीनानुपातिनः ॥

पाण्डोः पुत्रा यादृशा ते तादृशा मे सुता तव।
दीना इति हि मे बुद्धिरभिपन्नाद्य तान् प्रति ॥ २४ ॥ [४]

**वैशम्पायनः**

अन्योन्यमनुनीयैवं भ्रातरौ द्वौ महाद्युती ।
विदुरो धृतराष्ट्रश्च लेभाते परमां मुदम् ॥ २५ ॥[५]

**अस्मिन् आरणअयकपर्वाणि ६ अध्याये २५ श्लोकाः सन्ति**

---

(१)(३)हो० (for चो०); (४) (अ)नघः तदा (for रुषा ),
(२)(१)एतन्(for एव ); महाराज (for मया राजन्); (२) मे (forनः); कः कोपः प्रभविष्णवे (३) (अ) स्मि (अ)हम् (for ह्यस्मि); शीघ्रं (for क्षिप्रं-घ); (४) आदेशात्तव सुव्रत (भारत forसुव्रत),
(३)(१)पुरुषव्याघ्र; हि नर० माद्य (२) धर्मचेतनाः (चोदिताः); (३) दीनानुपातिनो, दीनाभिपातिनो, ०वादिनो; (४) तत्र (for नात्र), दिनानुकन्पिनो -घ
(४)(१) सुता); ते); (२) तादृशास्तव भारत; भवतः सुताः; ०शास्ते सुता मम (३) इतीव मे; इति च, मे, () प्रति (for अभि०),
(५)(१)अनुनीयं वै; उपनीयं वै; अनुनाय्योभौ; अभिनीयैवं; (२) तौ) महामती,

आरण्यकपर्वणि षष्ठोऽध्यायः

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायाम् आरण्यकपर्वणि विदुरप्रत्यागमने षष्ठोऽध्यायः ॥ ६ ॥

### श्रीमन्महाभारततात्पर्यनिर्णये द्वाविंशोध्याये -

इतीरितः सञ्जयः पाण्डवेयान् प्राप्याऽनयद् विदुरं शीघ्रमेव ।
सोऽप्यागतः क्षिप्रमपास्तरोषो ज्येष्ठं ववन्देऽथ स चैतमाश्लिषत् ॥ १३ ॥
अङ्कं समारोप्य स मूर्ध्नि चैनमाघ्राय लेभे परमां मुदं तदा ।
क्षत्तारमायान्तमुदीक्ष्य सर्वे ससौबला धार्तराष्ट्रा अमर्षात् ।
सम्मन्त्र्य हन्तुं पाण्डवानामुतैकं छन्नोपधेनैव ससूतजा ययुः ॥ १४ ॥

महाभारते- वनपर्वणि ७ अध्यायः

# 03- 01- 007

## ७.सप्तमोऽध्यायः

विदुरस्य पुनरागमनेन खिद्यता दुर्योधनेन कर्णादिभिरालोचनम् ॥ १ ॥ कर्णादिषु समालोच्य पाण्डवजिघांसया प्रस्थितेषु तदा समागतेन व्यासेन तेषां प्रतिषेधनम् ॥

### वैशम्पायनः

श्रुत्वा च विदुरं प्राप्तं राज्ञा च परिसान्त्वितम्।
धृतराष्ट्रात्मजो राजा पर्यतप्यत दुर्मतिः ॥ १ ॥
स सौबलं समानाय्य कर्णदुःशासनौ तथा।
अब्रवीद्वचनं राजा प्रविश्याबुद्धिजं तमः ॥ २ ॥[१]

(१)(१)स सौबलेयमानाय्य; (२) तथा (for अपि); (३) मधुरं वाक्यं (for वचनं राजा),

### दुर्योधनः

एष प्रत्यागतो मन्त्री धृतराष्ट्रस्य सम्मतः ।
विदुरः पाण्डुपुत्राणां सुहृद्विद्वान् हिते रतः ।। ३ ।।(१)

यावदस्य पुनर्बुद्धिं विदुरो नापकर्षति ।
पाण्डवानयने तावन्मन्त्रयध्वं हितं मम ।। ४ ।।(२)

अथ पश्याम्यहं पार्थान् प्राप्तानिह कथञ्चन ।
पुनः शोषं गमिष्यामि निरासून् निष्परिग्रहान् ।। ५ ।।(३)

**लक्षालङ्कारः-** निरासून्निष्परिग्रहान् इत्यत्र निरासून् 'असु निरसने' इति धातोः शत्रुनिरसनशीलान् ।।

विषमुद्बन्धनं चैव शस्त्रमग्निप्रवेशनम्।
करिष्ये न हि तान् वृद्धान्पुनर्द्रष्टुमिहोत्सहे ।। ६ ।।(४)

**लक्षालङ्कारः-** उद्बन्धनं रज्ज्वा ऊर्ध्वं बन्धनम् । वृद्धान् अभिवृद्धान् ।।

### शकुनिः

किं बालिशमतिं राजन्नास्थितोऽसि विशाम्पते।
गतास्ते समयं कृत्वा नैतदेवं भविष्यति ।। ७ ।।(५)

सत्यवाक्ये स्थिताः सर्वे पाण्डवा भरतर्षभ ।

---

(१)(२)धीमतः
(२)(३)पाण्डवार्थे च यूयं तान्,
(३)(२)प्राप्तान् इह ; (३) शोकं (for शोषं); (४) निरम्बून् निरसुर; निराशो (for निरंसुर्), निष्परि (for निरव०); वारणो वा नवग्रहः; निरसुरिति निरासुरिति च पाठो चिन्त्यौ *
(४)(१)क्षिप्रम् (for विषम्), उग्रं वनं (for उग्रं);,चापि; वापि),
(२)विषम् (for शस्त्रम्) (३)वृद्धान्; क्रुद्धान्; सर्वान् (for ऋद्धान्),
(५)(१)बालिशां मतिम् ; (३) वैं(for ते),

पितुस्ते वचनं तात न ग्रहीष्यन्ति कर्हिचित् ॥ ८ ॥[१]

अथवा ते ग्रहीष्यन्ति पुनरेष्यन्ति वा गृहम्।
निरस्य समयं भूयः पणोऽस्माकं भविष्यति ॥ ९ ॥[२]

अथागमिष्यन्ति पुनः पाण्डवा वारणाह्वयम् *[३]

सर्वे भवामो मध्यस्था राज्ञश्छन्दानुवर्तिनः ।
छिद्रं बहु प्रपश्यन्तः पाण्डवानां सुसंवृताः ॥ १० ॥[४]

**दुःशासनः**

एवमेतन्महाप्राज्ञ यथा वदसि मातुल ।
नित्यं हि मे कथयतस्तव बुद्धिर्हि रोचते ॥ ११ ॥
तथा तद्भविता राजन्नान्यथा तद्भविष्यति ॥ ११ ॥[५]

नागमिष्यन्ति ते वीरा अकृत्वा कालसंविदम्।
आगच्छेयुश्च ते मोहात्पुनर्द्यूतं न संशयः ॥[६]

**कर्णः**

काममीक्षामहे सर्वे दुर्योधन तवेप्सितम्।
ऐकमत्यं हि नो राजन् सर्वेषामेव लक्षते ॥ १२ ॥[७]

**वैशम्पायनः**

एवमुक्तस्तु कर्णेन राजा दुर्योधनस्तदा।

---

(१)(१)सत्याः, सस्ये (for सत्य०); (२)०र्षभाः (३) जातु ; राजन् (for तात),
(२)(१)नैव ते समयं कृत्वा; (२) पुरम्--घ। ते (for वा); (३) सर्वे - कृपाठः
(३)(३)सर्वे - पुनः (for भूयः),
(४)(१)भवाम, ध-ख (४) सुसंयताः,
(५)(४)वि (for हि),
(६)(१)नासमेष्यति, राजन् ; धीरा (for वीरा); (२)आगमिष्यन्ति चेन्मोहात्पुनर्द्यूतेन तान् जय;- ग ।
(७)(१)कालम् (for कामम्); ईशा; ईप्सां (for एकं (for ऐकं); (४) लक्षये, लक्ष्यते,

नातिहृष्टमनाः क्षिप्रमभवत् स पराङ्मुखः ।। १३ ।।

उपलभ्य ततः कर्णो विवृत्य नयने शुभे।

रोषाद्दुःशासनं चैव सौबलं च तावुभौ ।। १४ ।।(१)

उवाच परमक्रुद्ध उद्यम्यात्मानमात्मना।

**कर्णः**

अहो मम मतं यत्तु तन्निबोध नराधिपाः ।। १५ ।।(२)

प्रियं सर्वे चिकीर्षामो राज्ञः किङ्करवामहे ।

न चास्य शक्नुमः सर्वे ह्यवस्थातुं ह्यतन्द्रिताः ।। ६ ।।(३)

वयं तु शस्त्राण्यादाय रथानास्थाय दंशिताः ।

गच्छामः सहिता हन्तुं पाण्डवान् वनगोचरान् ।। १७ ।। (४)

तेषु सर्वेषु शान्तेषु गतेष्वविदितां गतिम्।

निर्विवादा भविष्यन्ति धार्तराष्ट्रास्तथा वयम् ।। १८ ।। (५)

यावदेव परिद्यूना यावच्छोकपरायणाः ।

यावन्मित्रविहीनाश्च तावद्गच्छाम माचिरम् ।। १९ ।। (६)

**वैशम्पायनः**

तस्य तद्वचनं श्रुत्वा पूजयन्तः पुनः पुनः ।

---

(१)(१)उपलक्ष्य, (४) सौबलं च तमेव च,

(२)(२)आत्मवान् (for आत्मना) (३)अथो (for अहो) (४) भूमिपाः

(३)(१)सदा ; क्षिप्रं (for प्रियं); प्रियं; ,सर्वं (for सर्वे), करिष्यामो-घ यति, ष्यामो,
(२)किङ्करवद्धयं; किं करवाणिते; किं करवाम वै ; किं करपाणायः; (३) रणेस्य (for न चास्य);स्थातुं (for सर्वे); शश्वद् (for स्थातुम्),(३/४)सर्वे स्थातुं ०द्यां (-प्य) ०तन्द्रिताः,

(४)(१) ते वयं शस्त्रमादाय -दंसिताः; (३)गच्छाम,

(५)(१)सर्वे शान्ते०, (३) , निर्विशङ्का,

(६)(३)मन्त्र० (for ०मित्र); (४) शक्यं, तावच्छक्यत्वमागताः; तावच्छक्या मतं ममतस्य

प्रहृष्टमनसः सर्वे प्रत्यूचुः सूतजं तदा ।। २० ।।(१)

**दुःशासनादयः**

एतत्कृत्यतमं राज्ञः कौरवस्य महात्मनः ।। २१ ।। (२)

**वैशम्पायनः**

एवमुक्त्वा सुसङ्क्रुद्धा रथैः सर्वे पृथक् पृथक्।
निर्ययुः पाण्डवान् हन्तुं सङ्घशः कृतनिश्चयाः ।। २२ ।।(३)
तान्प्रस्थितान् परिज्ञाय कृष्णद्वैपायनः प्रभुः ।
आजगाम विशुद्धात्मा दृष्ट्वा दिव्येन चक्षुषा ।। २३ ।।(४)
प्रतिषिध्याथ तान्सर्वान् भगवाँल्लोकपूजितः ।
प्रज्ञाचक्षुषमासीनमुवाचाभ्येत्य सत्वरम् ।। २४ ।। (५)

**अस्मिन् पर्वणि ७ अध्याये २४श्लोकाः सन्ति**

**आरण्यकपर्वणि सप्तमोऽध्यायः**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायाम्
आरण्यकपर्वणि व्यासागमने सप्तमोऽध्यायः ।। ७ ।।

**श्रीमन्महाभारततात्पर्यनिर्णये द्वाविंशोध्याये -**

विज्ञाय तेषां गमनं समस्तलोकान्तरात्मा परमेश्वरेश्वरः ।
व्यासोऽभिगम्यावददाम्बिकेयं निवारयाऽश्वेव सुतं तवेति ।। १५ ।।

---

(१)(२)पूजयित्वा; (३) बाढमित्येव ते सवे-ग , (४) सूतजं सङ्घशः; सूतजं प्रति,सूतनन्दनं,
(२)(२) कौरव्यस्य-घ ।
(३)(१)(तु)संनद्धा; सुसन्धाय;सुसंरब्धा (for तु सु सङ्क्रुद्धः) (२)सर्वैः; (४)सहिताः ; सर्वतः ,
(४)(१)प्रति०; प्रवि०(for परि०); (२) प्रभुः (for तदा); (३) महायोगी -घ(for विशु०),
(५)(१)च; तु (for (अ)थ);, (४) जगदभ्येत्य, सत्वरं ,उवाचावितथं वचः,

अवाप्य पार्थानयमद्य मृत्युं सहानुबन्धो गमिता ह्यसंशयम् ।
इतीरिते तेन निवारयेति प्रोक्तो हरिः प्राह न संवदे तैः ।। १६ ।।

महाभारते- वनपर्वणि ८ अध्यायः

## 03- 01- 008

## ८. अष्टमोऽध्यायः

तदा समागतेन व्यासेन धृतसाष्ट्रं प्रति पाण्डवैस्सह विरोधस्यानर्थहेतुत्वकथन-पूर्वकं तैस्सह शमविधानम् ।। १ ।। व्यासेन धृतराष्ट्रं प्रति पुत्रस्नेहस्य दुस्त्यजत्वे दृष्टान्तत्वेन सुरभ्युपाख्यानाख्यानपूर्वकं कौरवाणां जीवितस्य पाण्डवैस्सह शमाधीनत्वाभिधानम् ।। २ ।।

### व्यासः

धृतराष्ट्र महाप्राज्ञ निबोध वचनं मम।
वक्ष्यामि त्वा कौरवाणां सर्वेषां हितमुत्तमम् ।। १ ।। (१)

न मे प्रियं महाबाहो यद्गताः पाण्डवा वनम्।
निकृत्या निर्जिताश्चैव दुर्योधनवशानुगैः ।। २ ।। (२)

ते स्मरन्तः परिक्लेशान् पूर्णे वर्षे त्रयोदशे।
विमोक्ष्यन्ति विषं क्रुद्धाः कौरवेयेषु भारत ।। ३ ।। (३)

तदयं किं नु पापात्मा तव पुत्रः सुमन्दधीः ।
पाण्डवान्नित्यसङ्क्रुद्धो राज्यहेतोर्जिघांसति ।। ४ ।। (४)

---

(१)(३)त्वां; वः (for वा); ह्यसन्दिग्धं (for कौर०)
(२)(३)निकृता० (for निर्जिता०); (४)०पुरोगमै,
(३)(२)वर्षे पूर्णे; (३) क्रोधात् (for क्रुद्धाः),
(४)(२) स मन्दधीः; तु मन्द०; सुयोधनः

वार्यतां साध्वयं मूढः शमं गच्छतु ते सुतः ।
वनस्थांस्तानयं हन्तुमिच्छन् प्राणान्विमोक्ष्यति ।। ५ ।।(१)

यथाह विदुरः प्राज्ञो यथा भीष्मो यथा वयम्।
यथा कृपश्च द्रोणश्च तथा साधु विधीयताम् ।। ६ ।।(२)

विग्रहो हि महाप्राज्ञ स्वजनेन विगर्हितः ।
अधर्म्यमयशस्यं च मा राजन् प्रतिपद्यथाः ।। ७ ।।(३)

समीक्षा यादृशी ह्यस्य पाण्डवान्प्रति भारत।
उपेक्ष्यमाणा सा राजन् महान्तमनयं सृजेत् ।। ८ ।।(४)

अथवायं सुमन्दात्मा वनं गच्छतु ते सुतः ।
पाण्डवैः सहितो राजन्नेह एवासहायवान् ।। ९ ।।(५)

ततः संसर्गजः स्नेहः पुत्रस्य तव पाण्डवैः ।
यदि स्यात् कृतकृत्यस्त्वं भवेथाः पुरुषर्षभ ।। १० ।।(६)

अथवा जायमानस्य यच्छीलमनुजायते।
श्रूयते तन्महाराज नामृतस्यापसर्पति ।। ११ ।। (७)

**लक्षालङ्कारः-** अथवा जायमानस्य इत्यत्र जायमानस्य क्षणे क्षणे उत्पद्यमानस्य त्वत्पुत्रशीलस्य अनु अनुसारेण यच्छीलं तव जायते, हे राजन् भूयः एतत् मा, एतत् त्वत्पुत्रशीलम् अमृतस्य मरणरहितस्य पुरुषस्य नापसर्पति न गच्छति । तव पुत्राणामेतद्दुश्शीलं मरणपर्यन्तं न

(१)(१)पापः (for मूढः); (३) अपि (for तान्); (४) प्राणान्विमोक्ष्यति
(२)(१)यथा हि; यदाह; (४) साधुर् (for साधु); भवानपि (for विधी०)
(३)(१) (ऽ)पि (for हि); महाबाहो (for प्राज्ञ) (३)अधर्मम् ; (४) , मा राजन् प्रतिपद्यत , प्रतिपद्यतां,
(४)(१)समीक्ष्य; ०क्ष्या यस्य; तस्य (for ह्यस्य);समीक्ष्य यादृशीं बुद्धि म,(३) मा; त्वं (for सा);
(४) समयं (for अनयं) ; व्रजेत् ,स्पृशेत्),
(५)(१)अथ वा त्य० (सृ) ०ज्यतां साधु ; (४) वनं प्रति (for (अ)सहायवान्),
(६)(३)कृतकार्योद्य-घ; वा; (ऽ) यं (for ऽद्य) (४) भवेस्त्वं मनुजेश्वर-घ,
(७)(२)उपजायते; अनुवर्तते, (३) हि (for तन्); (४) नोमृतस्यानुसर्पति; न मृतस्यापि सर्पति,

गच्छतीति भावः ॥

कथं वा मन्यते भीष्मो द्रोणोऽथ विदुरोऽपि वा।
भवान्वात्र परं कार्यं पुरा वोऽपार्थो निवर्तते ॥ १२ ॥[१]

**लक्षालङ्कारः-** पुराऽपार्थो निवर्तत इत्यत्र अपार्थः पार्थविरोधी, अपार्थः अपगतप्रयोजनश्च अयं दुर्योधनः पुरा पाण्डवद्रोहार्थं गमनात् पूर्वमेव येन कार्येण निवर्तते, तत्कार्यं भीष्मः कथं वा मन्यत इत्यादियोजना ॥

**धृतराष्ट्रः**

भगवन्नाहमप्येतद्रोचये द्यूतसम्भवम्।
मन्ये तद्विधिनाऽऽकृष्य कारितोऽस्मीति वै मुने ॥ १३ ॥[२]

नैतद्रोचयते भीष्मो न द्रोणो विदुरो न च ।
गान्धारी नेच्छति द्यूतं तच्च मोहात् प्रवर्तितम् ॥ १४ ॥[३]

परित्यक्तुं न शक्नोमि दुर्योधनमचेतनम्।
पुत्रस्नेहेन भगवञ्जानन्नपि यतव्रत ॥ १५ ॥[४]

**व्यासः**

वैचित्रवीर्य नृपते सत्यमाह यथा भवान् ।
दृढं वेद्मि परं पुत्र परं पुत्रान्न विद्यते ॥ १६ ॥[५]

**लक्षालङ्कारः-** हे पुत्र परं सम्यक् वेद्मि ॥

इन्द्रोऽप्यश्रुनिपातेन सुरभ्या प्रतिबोधितः ।

---

(१)(२) ( ऽ)थ; ( ऽ)पि(for वा); न द्रोणो विदुरो न वा; (३)वा यत् (for वात्र); क्षमं) (४)वोर्थो; (अ) प्यर्थो (for चार्थो-घ); निवर्तते;( ऽ)भिवर्धते; ( ऽ)०भिवर्तते; अतिवर्तते
(२)(२)धूतसंस्तवम्; (३)तु (for तद्); ०कृष्य (for ०क्रम्य) (४)महा० (for ) ति वै)
(३)(१)न तद् (for नैतद्); (२) द्रोणो वा विदुरोपि वा; (३)गान्धार्या नेष्यते (४) तत्र (for तच्च),
(४)(१)शक्तोस्मि (for शक्नोमि); (२) अचेतसं; अमर्षणं; (४)यत; महा०; व्रत०, तव for यत०)
(५)वीर्य ते सत्यं यथाह भगवान्वचः (३)विग्नः (for वेद्मि)विद्मः; प्रियं (for परं) दृढं पुत्रं वयं विद्मः

अन्यैः समृद्धैरप्यर्थैर्न सुतान्मन्यते परम् ।। १७ ।।[१]

अत्र ते कीर्तयिष्यामि महदाख्यानमुत्तमम्।
सुरभ्याश्चैव संवादमिन्द्रस्य च विशाम्पते ।। १८ ।।[२]

त्रिविष्टपगता राजन् सुरभिः प्रारुदत् किल।
गवां माता पुरा तात तामिन्द्रोऽन्वकृपायत ।। १९ ।।

**इन्द्रः**

किमिदं रोदिषि शुभे कच्चित् क्षेमं दिवौकसाम्।
मानुषेष्वथ वा गोषु नैतदल्पं भविष्यति ।। २० ।।[३]

**सुरभिः**

विनिपातो न वः कश्चिद्दृश्यते त्रिदशाधिप।
अहं तु पुत्रं शोचामि तेन रोदिमि कौशिक ।। २१ ।।[४]

**लक्षालङ्कारः-** कौशिक हे इन्द्र ।

पश्यैनं कर्षकं रौद्रं दुर्बलं मम पुत्रकम्।
प्रतोदेनाभिनिघ्नन्तं लाङ्गलेन च पीडितम् ।। २२ ।। [५]

एनं दृष्ट्वा भृशं श्रान्तं वध्यमानं सुराधिप ।
कृपाविष्टास्मि देवेन्द्र मनश्चोद्वेपते मम ।। २३ ।। [६]

---

(१)(२)सुरभ्याः; समर्थैर् (for समृद्धैर्); (४) विद्य० ते-(ध)
(२)(१)वर्णयिष्यामि (for ष्येहं); कथं; कीर्तं०; (२) इतिहासं पुरातनं; महाख्यानमनुत्तमं,
(३)(३)मनुष्येष्वथ; नागेषु (for वा गोषु); कारणं सुमहन्मन्ये,
(४)(२)सुरभ्युवाच; ते (for वः); (२) विद्यं (for दृश्यं) (४)वासव (for कौशिक),
(५)(१)एतं; इमं(for एनं); कार्षिकं; कर्षुकं; क्षुद्रं (क्रुद्धं) (for रौद्रं); पश्येम युग्यं तौ रौद्रं; (४) (अ)भि-; च (for नि-)
(६)(१)एवं; एतं; एतद् (for एतं); शान्तं (for श्रान्तं), निषीदमानं सोत्कण्ठं -घ(२) ०वहं; ०ताड्यं (for वध्य०), (३)देवेश; (४)उद्विजते),

एकस्तत्र बलोपेतो धुरमुद्वहतेऽधिकाम् ।
अपरोऽप्यबलप्राणः कृशो धमनिसन्ततः ।
कृच्छ्रादुद्वहते भारं तं वै शोचामि वासव ॥ २४ ॥ (१)

वध्यमानः प्रतोदेन तुद्यमानः तथैव च ।
नैव शक्नोति तं भारमुद्वोढुं पश्य वासव ॥ २५ ॥ (२)

ततोऽहं तस्य शोकार्ता विरौमि भृशदुःखिता।
अश्रूण्यावर्तयन्ती च नेत्राभ्यां करुणायती ॥ २६ ॥ (३)

**शक्रः(इन्द्रः)**

तव पुत्रसहस्रेषु पीड्यमानेषु शोभने।
किं कृपान्वितवत्यत्र पुत्र एकोत्र हन्यते ॥ २७ ॥ (४)

**सुरभिः**

यदि पुत्रसहस्रं मे सर्वत्र समतैव मे।
दीनस्य तु ततः शक्र पुत्रस्याभ्यधिका कृपा ॥ २८ ॥ (५)

**व्यासः**

तदिन्द्रः सुरभेर्वाक्यं निशम्य भृशविस्मितः ।

---

(१)(१)त्वत्र (for तत्र) (२) भृशं; (ऽ)धिकं; (३) (ऽ)प्यं (for ऽल्पं); (४) कृशोयमनिशं ततः कौशिक पुत्रकं (for वासव)

(२)(२) पुनः पुनः); (३) न वै (for नैव)

(३)(१)त्वस्य; त्वद्य (for तस्य); शोकार्ता (for दुःखा०); (२)शोचामि (for विरौं०); (३) ()ह (इ)व (for च) अश्रूण्य(ण्या)वर्तयं चैव; (४)करुणावती;भृशदुःखिता; कृपणा सती; करुणागता,

(४) शक्र (for इन्द्र); (२) वृद्धसारेषु; विद्यं (for पीड्य)कृपायितवत्यत्र ; मत्यर्थं ; मप्यत्र; इत्यत्र कृपायितं; (४) एकत्र (for एकोऽत्र); हन्यते;हन्यति (for पीड्यते); एक एव न पीड्यते; पुत्र एको हि हन्यते;

(५)सुरभ्युवाच ; (१) सहस्राणि; (२)सर्वं तत् (for सर्वत्र); समतैव (for सममेव);सर्वत्र तु समा कृपा; (३) तु यतः; तु ततः (पुनः); तुद्यतः; वशतः;वहतः; (४)अप्य(भ्य०) धीकं (for अभ्यधिका); मम (for कृपा); पुत्रस्यास्याधिका दया,

जीवितेनापि कौरव्य मेनेऽभ्यधिकमात्मजम् ।। २९ ।।(१)

प्रववर्ष च तत्रैव सहसा तोयमुल्बणम्।

कर्षकस्याचरन् विघ्नं भगवान् पाकशासनः ।। ३० ।।(२)

तद्यथा सुरभिः प्राह सममेवास्तु ते तथा।

सुतेषु राजन् सर्वेषु हीनेष्वभ्यधिका कृपा ।। ३१ ।।(३)

यादृशो मे सुतः पाण्डुस्तादृशो मेऽसि पुत्रक।

विदुरश्च महाप्राज्ञः स्नेहादेतद्ब्रवीम्यहम् ।। ३२ ।।(४)

चिराय तव पुत्राणां शतमेकश्च पार्थिव।

पाण्डोः पञ्चैव लक्ष्यन्ते तेऽपि मन्दाः सुदुःखिताः ।। ३३ ।।(५)

कथं जीवेयुरत्यन्तं कथं वर्धेयुरित्यपि।

इति दीनेषु पार्थेषु मनो मे परितप्यते ।। ३४ ।।(६)

यदि पार्थिव कौरव्याञ्जीवमानानिहेच्छसि।

दुर्योधनस्तव सुतः शमं गच्छतु पाण्डवैः ।। ३५ ।।

**अस्मिन् पर्वणि ८ अध्याये ३५ श्लोकाः सन्ति**

**आरण्यकपर्वणि अष्टमोऽध्यायः**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायाम्

आरण्यकपर्वणि व्यासवाक्ये अष्टमोऽध्यायः ।। ८ ।।

---

(१)(१)सुरभिर् ; सुरभी०) (२)भृशदुःखितः (३)जीवितादपि; (४) (ऽ)पि (for ऽभि०),
(२)(३)कार्षि०; कार्ष०; कृष०; कर्षु० (for कर्ष); परं (for (आ)चरन्),
(३)(१)सुरभीवाक्यं ; सुरभी प्राह ; प्राह सुरभी; (२) समवेतास्तु तत् (for ते) (३) दीने०(for सर्वे) हीनेष्वभ्यधिका ; सर्वेषामधिका ; दया (for कृपा),
(४) (२) त्वं च; (for मेऽसि); (३) महाप्राज्ञ; (४) वदां (for ब्रवीं०); ते (for (अ)हम्),
(५)(२)एकं च; चैकं च (for एकश्च); भारत; (४) च हि (for ऽपि); सुदुर्जयाः (for सुदुःखिताः)
(६)(१)अत्यर्थं; इत्येवं (for अत्यन्तं),

श्रीमन्महाभारततात्पर्यनिर्णये द्वाविंशोध्याये -

मैत्रेय आयास्यति सोऽपि वाचं शिक्षार्थमेतेष्वभिधास्यतीह ।
तां चेत् करोत्येष सुतस्तवास्य भद्रं तदा स्याच्छप्स्यति त्वन्यथा सः ।।१७ ।।
उक्त्वेति राजानमनन्तशक्तिर्व्यासो ययौ तत्र गतेषु तेषु ।
सुयोधनाद्येषु हतेषु पार्थैर्भूभारहानिर्न भवेदिति प्रभुः ।। १८ ।।
सर्वाश्च चेष्टा भगवन्नियुक्ताः सदा समस्तस्य चितोऽचितश्च ।
तथाऽपि विष्णुर्विनिवारयेत् क्वचिद् वाचा विधत्ते च जनान् विडम्बयन्।।१९।।
मैत्रेय आगादथ भूपतिश्च पुत्रान् समाहूय सकर्णसौबलान् ।
सम्पूजयामास मुनिं स चाऽह दातुं राज्यं पाण्डवान् सम्प्रशंसन् ।। २० ।।

# 03- 01- 009

# ९.नवमोऽध्यायः

धृतराष्ट्रेण दुर्योधनानुशासनं प्रार्थितेन व्यासेन तत्रागमिप्यन्तं मैत्रेयं प्रति तत्प्रार्थनाविधानपूर्वकं स्वावासं प्रति गमनम् ।। १ ।। तत्रागतेन मैत्रैयेण ऊर्वास्फालनपूर्वकं स्ववचनमनादृतवतो दुर्योधनस्य भीमसेनगदया तवोरुभेदो भवेत् इति शापदानम् ।। २ ।।

### धृतराष्ट्रः

एवमेतन्महाप्राज्ञ यथा वदसि मां मुने ।
अहं चैव विजानामि सर्वे चेमे नराधिपाः ।। १ ।। (१)

भवांस्तु मन्यते साधु यत्कुरूणां सुखोदयम्।
तदेव विदुरोऽप्याह भीष्मो द्रोणश्च मां मुने ।। २ ।।(२)

(१)(२)मे ०नो); (३) एवं; एव; चैवं च (for वि),
(२) (१)च (for तु); (२) गुणो; कुलों ; महो० (for सुखा०);

यदि त्वहमनुग्राह्यः कौरवेषु दया यदि ।
अन्वशाधि दुरात्मानं पुत्रं दुर्योधनं मम ।। ३ ।।[१]

**व्यासः**

अयमायाति वै राजन्मैत्रेयो भगवानृषिः ।
अन्वीक्ष्य पाण्डवान् भ्रातॄनिहैवास्मद्दिदृक्षया ।। ४ ।।[२]

एष दुर्योधनं पुत्रं तव राजन्महानृषिः ।
अनुशास्तु यथान्यायं शमायास्य कुलस्य च ।। ५ ।।[३]

ब्रूयाद्यदेष राजेन्द्र तत्कार्यमविशङ्कया।
अक्रियायां तु कार्यस्य पुत्रं ते शप्स्यते रुषा ।। ६ ।।

**वैशम्पायनः**

एवमुक्त्वा ययौ व्यासो मैत्रेयः प्रत्यदृश्यत।
पूजया प्रतिजग्राह सपुत्रस्तं नराधिपः ।। ७ ।।[४]

तमागतमृषिं दृष्ट्वा धृतराष्ट्रो जनेश्वरः ।
पूजयित्वा यथान्यायं पप्रच्छागमनक्रियाम् ।-घ

कृत्वार्घ्याद्याः क्रियाः सर्वाः विश्रान्तं मुनिपुङ्गवम्।
प्रश्रयेणाब्रवीद्राजा धृतराष्ट्रोऽम्बिकासुतः ।। ८ ।।[५]

सुखेनागमनं कच्चिद्भगवन् कुरुजाङ्गले।

---

(२)तदेव तत्र भीष्मोपि द्रोणश्चैव महामुने-ख- पाठान्तरम्
(१)(२)कौरव्येषु; (३) अनु०,
(२)(१) ते मे (for वै); (३); अन्वीक्ष्य (for अन्वि);वीरान् ; सर्वान् (for भ्रातृन्); (४) (ए) ति (for (ए)व),
(३)(४)वै; च (for ते), (२) अनुशास्ता- ग.
(४)(४)सुत०(for पुत्र०) तं मुनिं नृपसत्तमः,
(५)(१) अर्घ्याद्याभिः क्रियाभिर्वै- ख,सपाद्यादि; अर्घाद्याभिः (for दत्वा०); (२)मुनिसत्तमं; ऋषिपुङ्गवं,

कच्चित्कुशलिनो वीरा भ्रातरः पञ्च पाण्डवाः ।। ९ ।। [१]

समये स्थातुमिच्छन्ति कच्चिच्च पुरुषर्षभाः ।

कच्चित् कुरूणां सौभ्रात्रमविच्छिन्नं भविष्यति ।। १० ।। [२]

**मैत्रेयः**

तीर्थयात्रामनुक्रामन्प्राप्तोऽस्मि कुरुजाङ्गलम्।

यदृच्छया धर्मराजं दृष्टवान् काम्यके वने ।। ११ ।। [३]

तं जटाजिनसंवीतं तपोवननिवासिनम्।

समाजग्मुर्महात्मानं द्रष्टुं मुनिगणाः प्रभो ।। १२ ।।[४]

तत्राश्रौषं महारान पुत्राणां तव विग्रहम्।

अनयं द्यूतरूपेण महापायमुपस्थितम् ।। १३ ।।[५]

ततोऽहं त्वामनुप्राप्तः कौरवाणामवेक्षया।

सदा ह्यभ्यधिकः स्नेहः प्रीतिश्च त्वयि मे प्रभो ।। १४ ।।[६]

नैतदौपयिकं राजंस्त्वयि भीष्मे च जीवति।

यदन्योन्येकृ ते पुत्रा विरुध्यन्ते नराधिप ।। १५ ।।[७]

**लक्षालङ्कारः-** 'युक्तमौपयिकं लभ्यम्' इत्यभिधानात् औपयिकं युक्तम् ।।

---

(१) (२) जाङ्गलात्; जाङ्गलान्; जाङ्गलान्; जाङ्गलं,

(२)(२)भरत०(for पुरुष०); (४) अवि० (for अव्यु०),

(३)(१)परिक्रामन्; परिक्रम्य (for अनु०); तीर्थयात्राप्रसङ्गेन; (२)जङ्गलं; जाङ्गलान्; जाङ्गलात्; जङ्गलात्; जङ्गलान्,

(४)(१)जटावल्कलसंवीतं ,

(५)(१)अहं राजन्; राज(for महा०); (२) विभ्रमात्; विग्रमम्;(४)महाभयम्; महापापम् (for ०पायम्); महापातकमुत्थितं; ०पापं समुत्थितं,

(६)(१)ख-समनु- णां व्यपेक्षया, समनु० (for त्वामनु०); तस्मादहमनुं (२)अप०; उप० (for अवे०)
(३) ख-यथा चा - विभो, यदा ह्यभ्य०, यदस्य(स्म्य);०भ्यधिकः (४)मे विभो; भारत,

(७)(१)मन्ये (for राजन्); (३)क-यदन्योन ते,ख-०न्योन्यं तु ते, यदन्योन्यं हि; ०न्यं न; न्यं च(त्त्ी०न्येन

मेढीभूतः स्वयं राजन् निग्रहे प्रग्रहे भवान् ।
किमर्थमनयं घोरमुत्पद्यन्तमुपेक्षसे ।। १६ ।। [१]

**लक्षालङ्कारः-** मेढीभूतः स्वयं राजन् इत्यत्र धान्यनिष्पत्त्यर्थं परिभ्रमतां वृषभाणां बन्धनाय मध्ये स्थितः स्तम्भविशेषो मेढी, तद्वत् पाण्डुपुत्राणां त्वत्पुत्राणां च त्वमेव आधारभूत इति भावः ।।

दस्यूनामिव ते वृत्तं सभायां कुरुनन्दन।
तेन न भ्राजसे राजंस्तापसानां समागमे ।। १७ ।। [२]

**वैशम्पायनः**

ततो व्यावृत्य राजानं दुर्योधनममर्षणम्।
उवाच श्लक्ष्णया वाचा मैत्रेयो भगवानृषिः ।। १८ ।। [३]

**मैत्रेयः**

दुर्योधन महाबाहो निबोध वदतां वर ।
वचनं मे महाप्राज्ञ ब्रुवतो यद्धितं तव ।। १९ ।। [४]

मा द्रुहः पाण्डवान् राजन् कुरुष्व हितमात्मनः ।
पाण्डवानां कुरूणां च लोकस्य च नरर्षभ ।। २० ।। [५]

पाण्डवान् प्राप्य तान् रात्रौ किम्मीरो नाम राक्षसः ।
इतः प्रद्रवतां रात्रौ यः स तेषां महात्मनाम्।

---

घ);(३/४)न ते पुत्रा विरुध्येरन्; (४)विरो०; पाण्डुपुत्रैर् (for विरु०);कथञ्चन (for नरा०),
(१)(१)मेषी०; मेधी(for मेढी) (२) निग्रह ; हः; हन्; (४) उत्पद्यन्तम्; उपयुक्तम्,
(२)(१)इह (for इव); सं-; वो; तद्; यो (for यद् घ-पाठः); (२)कुरुसंसदि; (४) यथा वह्निः स्थिते रवौ,
(३)(१)व्याहृत्य; (ऽ)पवृत्य० त्युक्त्वा... राजानं
(४)(१)महाभाग (for ०बाहो घ-पाठः); (२) वचनं हितं ; (३)वो (for मे),महाभाग; (४)च (for यद्),
(५)(२)प्रियम् ; (३) पाण्ड्वानां कुरूणां; कौरवाणां पाण्डवानां; (४) भरतं (for च नर०),

आवृत्य मार्गं रौद्रात्मा तस्थौ गिरिरिवाचलः ।। २१ ।।(1)

तं भीमः समरश्लाघी बलेन बलिनां वरः ।

जघान पशुमारेण व्याघ्रः क्षुद्रमृगं यथा ।। २२ ।।(2)

लक्षालङ्कारः- जघान पशुमारेण इत्यत्र पशून्मारयतीति पशुमारं दंष्ट्राग्रवदनं तेन ।।

पश्य दिग्विजये राजन् यथा भीमेन पातितः ।

जरासन्धो महेष्वासो नागायुतबलो युधि ।। २३ ।।(3)

सम्बन्धी वासुदेवश्च योषां स्यालश्च पार्षतः ।

ते हि सर्वे नरव्याघ्राः शूरा विक्रान्तयोधिनः ।। २४ ।।

सर्वे नागायुतप्राणा वज्रसंहनना दृढाः ।(४)

सत्यव्रतधराः सर्वे सर्वे पुरुषमानिनः ।। २५ ।।

हन्तारो देवशत्रूणां रक्षसां कामरूपिणाम्।

हिडिम्बबकमुख्यानां किर्मीरस्य च रक्षसः ।। २६ ।। (५)

कस्तान्युधि समासीत जरामरणवान्नरः ।। (६)

तस्य ते शम एवास्तु पाण्डवैर्भरतर्षभ।

कुरु मे वचनं राजन्मा मृत्युवशमन्वगाः ।। २७ ।। (७)

---

(१)(१) प्रधावतां; प्रवसतां, पाण्डवान्प्राप्य तद्रात्रौ, (२) य स्म; यदा; यस्मात् (for य स) किम्मी (र्मी) रो नाम राक्षसः (३)दुष्टात्मा (for रौद्रा०)

(२)(१)समरे जेतुमिति पाठे क्षम इत्यध्याहारः ।। (२)बलिनं (for बलेन),

(३)(२)भीमसेनेन (for यथा भीमेन); (३) महीपालो (for महेष्वासो),(४)०समो (for ०बलो); बले(for युधि),

(४)(१)सर्वे नागशतप्रा० (त्रा ) ०णाः,

(५)(१)सत्यव्रतधरा; (सर्वे सत्यव्रतधराः) राजन्प्रीतिपराः सर्वे; (३) किम्मीरस्य,

(६)(१) देवस्य; देवस्तु; (२)स्यालः हि; तु (for च)येषां श्यालाश्च (for स्तु) पार्षताः, श्यालाः सर्वे च पार्षताः (३) समाजेतुं; समासीदेज्,

(७)(३) ख-घ-कुरुष्व (for कुरु मे); (४) मन्युं (for मृत्युं) आगमः(for अन्वगाः),

## वैशम्पायनः

एवं तु ब्रुवतस्तस्य मैत्रेयस्य विशाम्पते।
ऊरुं गजकराकारं करेणाभिजघान सः ॥ २८ ॥ [१]

दुर्योधनः स्मितं कृत्वा चरणेनोल्लिखन्महीम्।
न किञ्चिदुक्त्वा दुर्मेधास्तस्थौ किञ्चिदवाङ्मुखः ॥ २९ ॥ [२]

तमशुश्रूषमाणं तु विलिखन्तं वसुन्धराम्।
दृष्ट्वा दुर्योधनं राजन् मैत्रेयं कोप आविशत् ॥ ३० ॥ [३]

स कोपवशमापन्नो मैत्रेयो भगवानृषिः ।
विधिना सम्प्रयुक्तश्च शापायास्य मनो दधे ॥ ३१ ॥ [४]

ततः स वार्युपस्पृश्य कोपसंरक्तलोचनः ।
मैत्रेयो धार्तराष्ट्रं तमशपद् दुष्टचेतसम् ॥ ३२ ॥

## मैत्रेयः

यस्मात्त्वं मामनादृत्य न मे वाचं चिकीर्षसि ।
तस्मादस्यावमानस्य सद्यः फलमवावाप्स्यसि ॥ ३३ ॥ [५]

त्वदभिद्रोहसंयुक्तं युद्धमुत्पत्स्यते महत् ।

---

(१) (३) गजगजाकारं ; करिकराकारं; (४)ह (for सः)

(२)(२) (उ)ल्लिखन्; , लिखन् (३)अ- (for न); धर्मो वा (for दुर्मेधास्); (४) अधोमुखः (for अवाङ्मुखः); किञ्चिदासीदधोमुखः; तस्थौ गिरिरिवाचलः,

(३)(१)तमधोमुखमासीनं; (२)विलिखेत्तं (०खन्तं); (४)मैत्रेयः कोप(कोध) ०माविशत्,

(४)(२) मुनिसत्तमः; (३) मन्यु० (for विधि०) (अ)सौ प्रकुपितः; सम्प्रमुदतः; सं (स (अ) यं प्रणुदितः सम्प्रचुदतः, चोदितः सोथ; नोदितो विप्र (for सम्प्रयुक्तश्च); प्रचुदितः ,प्रचोदितो वै विधिना

(५)(२)मोघां; नेमां); न मे वाचं करिष्यसि ; कार्यमन्यभिकीं (३) (अ)वमानस्य; (अ)ति०; (अ)प० (for (अ)भि०) (४) ख-घ-मवाप्नुहि, (for अवाप्नुहि),

यत्र भीमो गदाघातैस्तवोरुं भेत्स्यते बलात्।। ३४ ।। (१)

**वैशम्पायनः**

इत्येवमुक्ते वचने धृतराष्ट्रो महीपतिः ।
प्रसादयामास मुनिं नैतदेवं भवेदिति ।। ३५ ।। (२)

**मैत्रेयः**

शमं यास्यति चेत् पुत्रस्तव राजन्यथा तया।
शापो न भविता तात विपरीते भविष्यति ।। ३६ ।। (३)

**वैशम्पायनः**

सविलक्षस्तु राजेन्द्रो दुर्योधनपिता तदा ।
मैत्रेयं प्राह किर्मीरः कथं भीमेन पातितः ।। ३७ ।। (४)

**लक्षालङ्कारः-** वलक्षस्तत्रेति पाठे 'वलक्षधवलोऽर्जुनः' इति कोशात् स एवार्थः ।।

स विलक्षस्तु इति भिन्नपदपाठः न समीचीन भाति । स एवार्थः इत्यस्यार्थः ??

**मैत्रेयः**

नाहं वक्ष्याम्यसूया मे भूयो न ते शुश्रूषते सुतः ।

---

(१)(१)त्वादभिप्राय०; त्वमभिद्रोह०; (२)उत्पद्यते (३)तत्र (for यत्र); गदाघातैस्; महाबाहुस् ; (४) तवोरू बलात् (for बली),

(२)(१)इत्युक्ते वचने तेन (०नेनैव); (४) भविष्यति; भवत्विति,

(३)(१)शमयिष्यति, (२) यदा तदा; सदा तदा; यथातथं; (३) तर्हि; राजन्; ह्यस्य; तेन (for तात),

(४)(१)विलक्षयंस्तु ; विलक्षणस्तु ; विलक्षंस्तत्र ।

विलक्षयन् भीमस्य बलं विशेषेण अयमस्मज्जय्यो न वेति राक्षसबलद्वारा लक्षयन् । हेतौ शतृप्रत्ययः ।

विलक्षण इति पाठे दुर्योधनस्य दुराग्रहेण शापभयाद्विच्छायः

एष ते विदुरः सर्वमाख्यास्यति गते मयि ।। ३८ ।। [१]

**लक्षालङ्कारः-** नाहं वक्ष्यामि इत्यत्र अहं वक्ष्यामि मे असूया न । ते सुतः न शुश्रूषत इति योजना ।।

**वैशम्पायनः**

इत्येवमुक्त्वा मैत्रेयः प्रातिष्ठत यथागतम्।
**किर्मीरवधसंविग्नो भयं दुर्योधनोऽगमत् ।। ३९ ।। (२)**

**अस्मिन् आरण्यकपर्वणि ९ अध्याये ३९ श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायाम्

**आरण्यकपर्वणि सुरभ्युपाख्याने नवमोऽध्यायः ।। ९ ।।**

**आरण्यकपर्वणि नवमोऽध्यायः**

## ।। वनपर्वणि आरण्यपर्वणि आरण्यकपर्व समाप्तम् ।।

---

(१)(१)ते भूयः (for (अ)सूयां ते); वै; मे; (for ते); न वक्ष्यामि तयोर्युद्धं ; (२) मे (for ते),
(२) (२) स प्रातिष्ठद् (for प्रातिं'); यथासुखं (३)किन्दीरवधनिर्विण्णो; ०सन्तप्तो; किम्मीर०
(४)भयं; स हि;, भृशं बहिर् ययौ;०(ऽ)भवत् ,०ऽगमत्),

# २. किर्म्मीरवधपर्व

श्रीमन्महाभारततात्पर्यनिर्णये **किर्मीरवधपर्वकथासङ्ग्रहः**

द्वाविंशोध्याये -

बकानुजोसौ निखिलैरजेयो वराद्रिरीशस्य निहन्तुकामः ।
सदारसोदर्यमभिप्रसस्रे भीमं महावृक्षगिरीन् प्रमुश्चन् ।। २ ।।
स सम्प्रहारं सह तेन कृत्वा भीमो निपात्याशु धरातले तम् ।
चक्रे मखे सङ्गरनामधेये प्रसह्य नारायणदैवते पशुम् ।। ३ ।।

**महाभारते- १०- अध्यायः**

विशेषतो भीमबलं शशंस किर्मीरनाशादि वदन् मुनीन्द्रः ।
श्रुत्वासहन् तद् धृतराष्ट्रपुत्र आस्फालयामास निजोरुमुग्रः ।। २१ ।।
शशाप चैनं मुनिरुग्रतेजास्तवोरुभेदाय भवेत् सुयुद्धम् ।
इत्यूचिवान् धृतराष्ट्रानतोऽपि ययौ न चेद् राज्यदस्त्वं तथेति ।
श्रुत्वा तु किर्मीरवधं स्वपित्रा पृष्टं क्षत्त्रोक्तं सोऽत्रसद् धार्तराष्ट्रः ।। २२ ।।

**महाभारते- वनपर्वणि १० अध्यायः**

## 03- 01- 010

## १०.दशमोऽध्यायः

मैत्रेयचोदितेन विदुरेण धृतराष्ट्राय भीमकृतकिम्मीरवधप्रकारकथनम् ।।

### धृतराष्ट्रः

किम्मी(र्मी)रस्य वधं क्षत्तः श्रोतुमिच्छामि कथ्यताम्।
रक्षसा भीमसेनस्य कथमासीत्समागमः ।। १ ।। (१)

(१) (१) किन्दीरं (for किर्मीरं), (२) तत्वतः (for कथ्यताम् ),

## विदुरः

शृणु भीमस्य कर्मेदमतिमानुषकर्मणः ।
श्रुतपूर्वं मया तेषां कथान्तेषु पुनः पुनः ॥ २ ॥

**लक्षालङ्कारः-** श्रुणु भीमस्य इत्यत्र तेषां पाण्डवानां कथान्ते कथामध्ये पुनः पुनः मया श्रुतपूर्वं इदं भीमस्य कर्म अथ शृण्विति सम्बन्धः ।

यं जधानैकचक्रायां भीमो भीमपराक्रमः ।
राक्षसं क्रोधताम्राक्षं दर्पोत्सिक्तं बलाधिकम् ।*
तस्य भ्राता महावीर्यः कनीयानुरुविक्रमः ।*
भ्रातृनाशसमुत्थेन छन्नो व्यसनभस्मना ।*
भीमसेनान्तरप्रेप्सुश्चचार पृथिवीमिमाम्।
स निर्जितानुपाश्रौषीत्पाण्डवाननुलक्षये ।

(एते श्लोकाः टि. आर्.पाठे. ) अन्वयः, अर्थ-कथाविशेषश्चैतेषु दृश्यते

इतः प्रयाता राजेन्द्र पाण्डवा द्यूतनिर्जिताः ।
जग्मुस्त्रिभिरहोरात्रैः काम्यकं नाम तद्वनम् ॥ ३ ॥ (१)
रात्रौ निशीथे स्वालीढे गतेऽर्धसमये नृप।
प्रचारे पुरुषादानां रक्षसां भीमकर्मणाम् ॥ ४ ॥ (२)

**लक्षालङ्कारः-**रात्रौ निशीथ इत्यत्र रात्रौ अर्धसमये गते सति स्वालीढे स्वैः स्वीयैः निशीथकालसम्बन्धिभिः रक्षःपिशाचादिभिः आलीढे रम्योऽयं काल इत्यास्वादिते निशीथे सति तद्वनं तापसादयो दूरात् परिहरिष्यन्ति ॥

---

(१)(४) प्रति (for नाम ), काननं (for तद्वनम्),
(२)(१) स्वावीले ; सम्प्रासे स्वाभीले ;चातीते ; स्वाधीते ; स्माभीले ; त्वाभीले ; सम्प्रासे इत्यपपाठः
(२) गतेस्तेर्कमयं नृप (४) घोर०, भीरु० (for भीम० ),

तद्वनं तापसा नित्यं शेषाश्च वनचारिणः ।
दूरात् परिहरन्ति स्म पुरुषादभयात् किल ।। ५ ।। (१)

तेषां प्रविशतां तत्र मार्गमावृत्य भारत।
दीप्ताक्षं भीषणं रक्षः सोल्मुकं प्रत्यदृश्यत ।। ६ ।। (२)

बाहू महान्तौ कृत्वा तु तथाऽऽस्यं च भयानकम्।
स्थितमावृत्य पन्थानं येन यान्ति कुरूद्वहाः ।। ७ ।। (३)

दष्टोष्टदंष्ट्रं ताम्राक्षं प्रदीप्तोर्ध्वशिरोरुहम्।
सार्करश्मि तडिच्चक्रं सबलाकमिवाम्बुदम् ।। ८ ।।(४)

**लक्षालङ्कारः-** सार्करश्मि इत्यत्र अर्करश्मिवत् ऊर्ध्वीभूतजटा, तटिच्चक्रवत् क्षणे क्षणे ज्वलदुल्मुके बालार्कवत् नेत्रं, नीलाम्बुदवत् स्वयं, बलाकमालावत् दंष्ट्रेति सूचनाय इयमुपमा ।।

सृजन्तं राक्षसीं मायां महारावविराविणीम्।
मुञ्चन्तं विपुलान्नादान् सतोयमिव तोयदम् ।। ९ ।। (५)

तस्य नादेन सन्त्रस्ताः पक्षिणः सर्वतोदिशम्।
विमुक्तनादाः सम्पेतुः स्थलजा जलजैः सह ।। १० ।। (६)

---

(१)(२) गोपाश्च ; अशेषा शेषा वा (for शेषाश्च ) (३) ख-परिहपिष्यन्ति, हरिष्यन्ति ख for ०हरन्ति स्म ),

(२)(४) ०पद्यत (for ०दृश्यत)

(३)(१) अथ ; च (for तु ) (२) तु (for च ) भयङ्करं (for भयां )

(४)(१) स्पष्टौष्टदंष्ट्रं ; स्पष्टा० (ष्टो) ष्ट ; दष्टौष्टं ; ; दृष्टोष्ठदन्तं ; दष्टौष्ठदन्तं ; स्पृष्टापदंष्ट्रं ०; दष्टोग०ं (३) तडिच्चित्रं तडिद्व, तडिद्वक्रकत्रम् नित्यपपाठः

(५)(१) अर्धपञुकं नास्ति - ख

(२) ०रावनिनादितं ; ०नादनिनादितं ; वराहविनादितां ; ०रावविनादिनी ; अपश्यंस्ते महाबलाः (३) विमुखं नादं ; विपुलान्नादान्,

(६)(२) दिशः (for दिशम् )

सम्प्रद्रुतमृगद्वीपिमहिषर्क्षसमाकुलम्।
तद्वनं तस्य नादेन सम्प्रस्थितमिवाभवत् ॥ ११ ॥ [(१)]

तस्योरुवाताभिहतास्ताम्रपल्लवबाहवः ।
विदूरजाताश्च लताः समाश्लिष्यन्त पादपान् ॥ १२ ॥ [(२)]

तस्मिन्क्षणेऽथ प्रववौ मारुतो भृशदारुणः ।
रजसा संवृतं तेन नष्टर्क्षमभवन्नभः ॥ १३ ॥ [(३)]

पञ्चानां पाण्डुपुत्राणामविज्ञातो महारिपुः ।
पञ्चानामिन्द्रियाणां तु शोकावेश इवातुरः ॥ १४ ॥ [(४)]

स दृष्ट्वा पाण्डवान् दूरात् कृष्णाजिनसमावृतान्।
आवृणोत्तद्वनद्वारं मैनाक इव पर्वतः ॥ १५ ॥

तं समासाद्य वित्रस्ता कृष्णा कमललोचना।
अदृष्टपूर्वमत्यन्तं विषादमगमद् भृशम् ॥ १६ ॥ [(५)]

दुःशासनकरोत्कृष्टविप्रकीर्णशिरोरुहा।
पञ्चपर्वतमध्यस्था नदीवाकुलतां गता ॥ १७ ॥ [(६)]

---

(१)(१) समुद्धतं ; समुद्भूतं ; समाहितं, (४) ख-वाबभौ, आबभौ (for अभवत्), वित्रस्तमिव चाभवत् (दारुवत्)

(२)(१) वेगाभि० ; घाताभि० (for वाताभिं ), (३) जातापि (for जाताश्च ), विदुरश्चालिता जाताः; विदूरजा अपि लता (४) ०श्लिष्यन्ति

(३)(१) च प्रववौ ; ह्यथ ववौ (for ऽथ प्रववौ ), (२) ऽतीव (for भृश०), (३)ख-संप्रवृक्तेन, ०सां सम्प्रवृत्तेन, (४) नष्टार्कम् (for नष्टर्क्षम् ) नष्टज्योतिरभून्नभः

(४)(१) पाण्डवेयानाम्, (२) महान्रिपुः; विज्ञानेनोपमाद्रिपुः (३)० यार्थानां (for ०याणां तु ), (४) शोकावेश० (for शोकवेग०), आकुलः ; अतुलः)

(५)(१) सं (for विं ), (३)अ-घ-संत्रासान्यामीलयत लोचने, पूर्व (for पूर्व ) अस्यन्तं (पश्यन्ती) (for सन्त्रासान्) (४) सन्त्रासान्यमीलयत लोचने,

(६)(१) करस्पर्शं ; करोन्तुष्टं ; ०करोत्कृष्ट० ;करोतिक्षत्प (for करोत्सृष्टं घ-पाठः)

विमुह्यमानां तां तत्र जगृहुः पञ्च पाण्डवाः ।
इन्द्रियाणि प्रसक्तानि विषयेषु यथा रतिम् ।। १८ ।।

अथ तां राक्षसीं मायामुत्थितां घोरदर्शनाम्।
रक्षोघ्नैर्विविधैर्मन्त्रैर्धौम्यः सम्यक्प्रयोजितैः ।। १९ ।। (१)
पश्यतां पाण्डुपुत्राणां नाशयामास वीर्यवान् ।(२)

स नष्टमायोऽतिबलः क्रोधविस्फारितेक्षणः ।
काममूर्तिधरः क्षुब्दः कालकल्पो व्यदृश्यत ।। २० ।। (३)

तमुवाच ततो राजा दीर्घप्रज्ञो युधिष्ठिरः ।

**युधिष्ठिरः**

को भवान् कस्य वा किं ते क्रियतां कार्यमुच्यताम् ।। २१ ।। (४)

**वैशम्पायनः**

प्रत्युवाचाथ तद्रक्षो धर्मराजं युधिष्ठिरम् ।

**राक्षसः**

अहं बकस्य वै भ्राता किर्मीर इति विश्रुतः ।। २२ ।। (५)

पैठीनगोत्रे उत्पन्नो नास्तिको वेदनिन्ददकः

वनेऽस्मिन्काम्यके शून्ये निवसामि गतज्वरः ।

---

(१)(१) अतथां (for अथ तां), (२) समुत्थांमृ(for उत्थितां )०दर्शिनीं ; ०रूपिणीं,
(२)(२) शमया०; नवीया० (for नाशया० ),
(३)(२) विस्फारिते (३) क्रूरमूर्ति०; कामरूप०; एकमूर्ति० , क्रुद्धः क्रूर; क्षुब्दः, (for क्षुद्रः), (४) ह्य० ; ०भ्य० (for ०व्य),
(४)(३) किं वा ; चित् किं, वा (for ते),
(५)(१) तं (for तद् )

युधि निर्जित्य पुरुषानाहारं नित्यमाचरन् ।। २३ ।। (१)

के यूयमभिसम्प्राप्ता भक्ष्यभूता ममान्तिकम्।
युधि निर्जित्य वः सर्वान् भक्षयिष्ये गतज्वरः ।। २४ ।। (२)

**वैशम्पायनः**

युधिष्ठिरस्तु तच्छ्रुत्वा वचस्तस्य दुरात्मनः ।
आचचक्षे ततः सर्वं गोत्रनामादि भारत ।। २५ ।। (३)

**युधिष्ठिरः**

पाण्डवो धर्मराजोऽहं यदि ते श्रोत्रमागतः ।
सहितो भ्रातृभिः सर्वैर्भीमसेनार्जुनादिभिः ।। २६ ।।

हृतराज्यो वने वासं वस्तुं कृतमतिस्ततः ।
वनमभ्यागतो घोरमिदं तव परिग्रहम् ।। २७ ।। (४)

**विदुरः**

किर्मीरस्त्वब्रवीदेनं दिष्ट्या देवैरिदं मम।
उपपादितमद्येह चिरकालान्मनोगतम् ।। २८ ।। (५)

भीमसेनवधार्थं हि नित्यमभ्युद्यतायुधः ।
चरामि पृथिवीं कृत्स्नां नैनं चासादयाम्यहम् ।। २९ ।। (६)

सोऽयमासादितो दिष्ट्या भ्रातृहा काङ्क्षितश्चिरम्।

---

(१)(२) वसामि विगतज्वरः
(२)(१) अभि ; अथ (for इह), (२) भक्ष (for भक्ष्य ), (३) युद्धे ; युद्धान् युधा (for युधि),
(३) (विदुरः); वैशं उ, (४) नामानि
(४)(२) कर्तुं (for वस्तुं) मनाः (for मतिः ), स्थितः (for ततः),
(५)विदुरः ; वैशं उ,विस्मयं परमं गत्वा राक्षसो घोरदर्शनः(४) चिरकालं, मनोहरं ; मनोरथं,
(६)सर्वां (for कृत्स्नां), (४) एनम् (for नैनम्), चा त्वा ; वा साद (for आसाद),

अनेन हि मम भ्राता बको विनिहतः प्रियः ॥ ३० ॥

वेत्रकीयगृहे राजन् ब्राह्मणच्छद्मरूपिणा।
विद्याबलमुपाश्रित्य न ह्यस्त्यस्यौरसं बलम् ॥ ३१ ॥ (१)

हिडिम्बश्च सखा मह्यं दयितो वनगोचरः ।
हतो दुरात्मनानेन स्वसा चास्य हृता पुरा ॥ ३२ ॥ (२)

सोऽयमभ्यागतो मूढो ममेदं गहनं वनम्।
प्रचारसमयेऽस्माकमर्धरात्रे समाहिते ॥ ३३ ॥ (३)

अद्यास्य यातयिष्यामि तद्वैरं चिरसम्भृतम्।
तर्पयिष्यामि च बकं रुधिरेणास्य भूरिणा ॥ ३४ ॥ (४)

अद्याहमनृणो भूत्वा भ्रातुः सख्युस्तथैव च ।
शान्तिं लब्धास्मि परमां हत्वा राक्षसकण्टकम् ॥ ३५ ॥ (५)

यदि तेन पुरा मुक्तो भीमसेनो बकेन वै।
अद्यैनं भक्षयिष्यामि पश्यतस्ते युधिष्ठिर ॥ ३६ ॥

एनं हि विपुलप्राणमद्य हत्वा वृकोदरम्।
सम्भक्ष्य जरयिष्यामि यथागस्त्यो महासुरम् ॥ ३७ ॥

**वैशम्पायनः**

एवमुक्तस्तु धर्मात्मा सत्यसन्धो युधिष्ठिरः ।

---

(१)(१) वैत्रकीयवने-अयमपपाठः ; वे ( वै) त्रकीयपुरे राज्ञि ; पूर्वं,(for राजन्), (३) समा ; अपां ; अथा (for उपा ),
(२)(१) हिडम्बश्च (४) चास्याहता, पुनः (for पुरा),
(३)(१) अघागतो ; आसादितो (for अभ्यागतो ), (४) समे स्थितः ; स्थिते समे -ग(सति); समागते,
(४)(१) आसाद्य ; अस्याद्य ; अस्याहं ; अन्वास्य, पात ; घात (for यात ), अस्याहमान यिष्यामि ; अद्यैनं खाद, (२) चिरसंहतं ; चिरसञ्चितं;,अनुसंवृतं,
(५)(३)ख- लप्स्यामि, लप्स्यामि (for लब्धास्मि ),

नैतदस्तीति सङ्क्रुद्धो भर्त्सयामास राक्षसम् ।। ३८ ।। (१)

ततो भीमो महाबाहुरारुज्य तरसा द्रुमम्।

दशव्याममिवाविद्धं निष्पत्रमकरोत्तदा ।। ३९ ।। (२)

**लक्षालङ्कारः-** शतव्याममिवोद्विद्धं इत्यत्र 'व्यामो वटश्च न्यग्रोध उत्सेधः काय उन्नतिः' इत्यभिधानात् शतधारारूपेण व्यामः काये उन्नतिर्यस्य तत् व्वज्रमिव उद्विद्धम् ऊर्ध्वमभिवृद्धं तरुम् ।।

चकार सज्यं गाण्डीवं वज्रनिष्पेषगौरवम्।

निमेषान्तरमात्रेण तथैव विजयोऽर्जुनः ।। ४० ।। (३)

निवार्य भीमो जिष्णुं तं तद्रक्षो मेघनिःस्वनम्।

अभिद्रुत्याब्रवीद्वाक्यं तिष्ठ तिष्ठेति भारत ।। ४१ ।। (४)

इत्युक्त्वैनमतिक्रुद्धः कक्ष्यामुत्पीड्य पाण्डवः ।

निष्पिष्य पाणिना पाणिं सन्दष्टौष्ठपुटो बली ।। ४२ ।। (५)

**लक्षालङ्कारः-** कक्ष्यामुत्पीड्य पाण्डव्व इत्यत्र कक्षो वनं, तत्सम्बन्धिनी□ लतागुल्मादिस्थावरश्रेणीम् ।

तमभ्यधावद्वेगेन भीमो वृक्षायुधस्तदा ।। ४३ ।। (६)

यमदण्डप्रतीकाशं ततस्तं तस्य मूर्धनि।

---

(१)(१) स (for तु ), (३) सक्रोधं-०धो-घ ; सङ्क्रुद्धो ; स क्रोधाद्,

(२)(२) आभज्य ; उत्पाट्य (for आरुज्य) तरुं (for द्रुमम्), (३) ख- शतव्यामथोद्विघ्यन्नि०,शत (for दश) अथ (for इव ), आविद्धं ; उत्क्षिप्य ; उद्वृद्धं (for उद्विद्धं), दशव्याममिथोद्वन्द्वं, (४) ततः (for तदा),

(३)(१) चकार; सज्यं, सज्जं, गाञीवं, (२) निर्घोष निस्वनं; भैरवं,

(४)(१) ख-निवार्य जिष्णुं भीमोऽथ तद्रक्षो भीमगर्वितम्, चाज ( भीमो ) तं (for तु), जिष्णुं भीमो य (२) मेघनिस्वनं मोघगर्जितं ; भीमगर्वितं ; मेघगर्जितं (for घोर),

(५)(१) (ए) व तम् (for (ए) नम् ) अति ; स सं (for अभि ) (२) कक्षाम्;कक्षम् (for कक्ष्याम्), निष्पीड्य,

(६)(१) निष्पीड्य (for ष्पिपष्य),

पातयामास वेगेन कुलिशं मघवानिव ।। ४४ ।।

असम्भ्रान्तं तु तद्रक्षः समरे प्रत्यदृश्यत।
चिक्षेप चोल्कं दीप्तान्तमशनिं ज्वलितामिव ।। ४५ ।। [१]

**लक्षालङ्कारः-** दीप्तान्तं दीप्तः अन्तः अग्रं यस्य सः तम् उल्कम् उल्मुकम् ।

तदुदस्तमलातं तु भीमः प्रहरतां वरः ।
पदा सव्येन चिक्षेप तद्रक्षः पुनराव्रजत् ।। ४६ ।। [२]

किर्मीरश्चापि सहसा वृक्षमुत्पाट्य पाण्डवम्।
दण्डपाणिरिव क्रुद्धः समरे प्रत्यधावत ।। ४७ ।। [३]

तद्वृक्षयुद्धमभवन्महीरुहविनाशनम्।
वालिसुग्रीवयोः युद्धं भ्रात्रोः स्त्रीकाङ्क्षिणोः यथा ।। ४८ ।।[४]

शीर्षयोः पतिता वृक्षा बिभिदुर्नैकधा तयोः ।
यथैवौत्पलपत्राणि मत्तयोर्द्विपयोस्तथा ।। ४९ ।। [५]

मूर्ध्नि झर्झरभूतास्तु बहवस्तत्र पादपाः ।
चीराणीव व्युदस्तानि रेजुस्तत्र महावने ।। ५० ।। [६]

**लक्षालङ्कारः-** झर्झरभूताः चूर्णीभूताः ।

---

(१)(१) भ्रान्तस्तु (२) प्रत्यतिष्ठत, (३) तस्मै (for दीप्तम्), (४)खगिनि प्रज्वलितं यथा, मघवान् (for ज्वलिताम्), तमग्निं, ( तदग्नि ; तमग्नि) ज्वलितं यथा,

(२)(१) तमुदस्तम्, (२) भीमं प्रहरतां वरं, चिक्षेप तद्रक्षः पतत् (for व्रजत्),

(३)(१) किर्मीरकश्च सहसा (४) प्रत्यधावत ; दृश्यत,

(४)(३) क-ख-ः पूर्वं भ्रात्रोः श्री०, पूर्वं ; युद्धं, (४)भ्रात्रोः (for भ्रात्रोर् ) (४) भ्रात्रोः (for यथा ), ०स्त्रीं (for श्री) इव (for पुरा),

(५)(१) पातिता (३) यथोत्पलानि (for यथैवोत्पल ) पत्राणि ; मालानि (for पद्मानि ), (४) मत्तयोर्द्विपमुख्ययोः द्विपयोरिव मुख्ययोः

(६)(१) मूर्ध्नि ,(र्ध्ना) जर्जरभूतास्तु, मुञ्जवज्जर्जरीभूता (४)क-ख-विरेजुस्तत्र भारत (०पादपाः),

तद्वृक्षयुद्धमभवत् सुमुहूर्तं विशाम्पते।
राक्षसानां च मुख्यस्य नराणामुत्तमस्य च ।। ५१ ।। (१)

ततः शिलां समुत्क्षिप्य भीमस्य युधि तिष्ठतः ।
प्राहिणोद्राक्षसः क्रुद्धो भीमश्च न चचाल ह ।। ५२ ।। (२)

तं शिलाताडनजडं पर्यधावत राक्षसः ।
बाहुविक्षिप्तकिरणः स्वर्भानुरिव भास्करम् ।। ५३ ।। (३)

तावन्योन्यं समाश्लिष्य प्रकर्षन्तौ परस्परम्।
उभावपि चकाशेते प्रवृद्धौ वृषभाविव ।। ५४ ।। (४)

तयोरासीत्सुतुमुलः सम्प्रहारः सुदारुणः ।
नखदंष्ट्रायुधवतोर्व्याघ्रयोरिव दृप्तयोः ।। ५५ ।। (५)

दुर्योधननिकाराच्च बाहुवीर्याच्च दर्पितः ।
कृष्णानयनदृष्टश्च व्यवर्धत वृकोदरः ।। ५६ ।। (६)

**लक्षालङ्कारः- दुर्योधननिकारात् इत्यत्र दुष्टं योधनं युद्धं यस्य सः दुर्योधनः किर्मीरः तस्य निकारात् न्यक्कारात्, कृष्णायाः नयनेन नेत्रावलोकनेन दृप्तः ।**

अभिहत्याथ बाहुभ्यां प्रत्यगृह्णादमर्षितः ।
मातङ्गमिव मातङ्गः प्रभिन्नकरटामुखम् ।। ५७ ।। (७)

---

(१)(१)क-ख-मुहूर्तमिव भारत,(२) मुहूर्तार्धं ; मुहूर्त तु (for सुमुहूर्तं ), मु (सुमु) हूर्तं भरतर्षभ-घ;, मुहूर्तमिव (तं तत्र) भारत,

(२)(४) भीमश्च; (स्तु) न चचाल ह ; तेन भीमश्चचार ह ; भीमश्च विचचाल ह,

(३)(२) पर्यधावत रां०, (३) क्षिप्रं ; बभौ (for बाहु-),बाहुविक्षेपकरणः ;०विक्षेपकारिणं; बाहुविक्षिप्तकरणः ; बाहू विक्षिप्य किर्मा(म्मी) रः

(४)(२) विकर्षती, (३) चकाशेतां, (४) प्रवृद्धौ; प्रयुद्धे,

(५)(१) तयोर्ह्यासीत्, सुतुमलः; सुविपुलः

(६)(३) कटाक्षहृष्ट (स) ; श्च ; कटाक्षतृप्तश्च ; नयनरुष्टश्च

(७)(१) ०पद्य ; ०गत्य ; ०हत्य (for पद्य ) ; च (for अथ ), वक्षिद् ; (२) वेक्षद् , पेक्षद् (for

स चाप्येनं ततो रक्षः प्रतिजग्राह वीर्यवान्।
तमाक्षिपद्भीमसेनो बलेन बलिनां वरः ।। ५८ ।। (१)

**लक्षालङ्कारः-** बलिना हस्तेन ।

तयोर्भुजविनिष्पेषादुभयोर्बलिनोस्तदा।
शब्दः समभवद्धोरो वेणुस्फोटसमो युधि ।। ५९ ।। (२)

अथैनमाक्षिप्य बलाद् गृह्य मध्ये वृकोदरः ।
धूनयामास वेगेन वायुश्चण्ड इव द्रुमम् ।। ६० ।। (३)

स भीमेन परामृष्टो दुर्बलो बलिना रणे।
व्यस्पन्दत यथाप्राणं विचकर्ष च पाण्डवम् ।। ६१ ।। (४)

तत एनं परिश्रान्तमुपलक्ष्य वृकोदरः ।
योक्त्रयामास बाहुभ्यां पशुं रशनया यथा ।। ६२ ।। (५)

**लक्षालङ्कारः-** योक्त्रयामास इत्यत्र 'योक्त्रं योक्त्रमथो हलम्' इत्यभिधानात् लाङ्गलस्थानीयं कृतवान् । लाङ्गलमिव चकर्षेति भावः । रशनया रज्वा ।

नदन्तं तं महानादं भिन्नभेरीस्वनं बली।
भ्रामयामास सुचिरं विस्फुरन्तमचेतसम् ।। ६३ ।। (६)

---

गृह्याद्) ; अमर्षत ; अर्दिदमः ; मातगमिव मातङ्गः ; (४) मुखं,
(१)(१) तचाप्येनं; तथार्थिनं ; स चाप्येनं ; संसर्प्येनं ; तं चाप्ये नं ; चाभ्येत्य, वीर्यवत्, (३) तद् (for तम्),
(२)(४) ततः ; तथा (for तदा ),
(३)(२) भीमसेनो महाबलः
(४)(१) भीमसेनपरा ; भीमेन स परा० ; (२) बलिना दुर्बलो ; बलेन बलिना ; बलेन बलिनां वरः ; (३) व्यस्पर्धच्च ; प्रास्पन्दच्च ; प्रसादश्च; व्यस्पन्दच्च ;व्यसर्पत ; प्रास्पन्दत (४) पाण्डवः,
(५) चैव ; चैनं ; ०तं ०लं (for एनं); (२) लक्ष्य० (for लभ्य०),
(६)(१) तं नदन्तं ; नदत तं ; (२) स्वनं बली ; समं बली ; निभस्वनं ; महास्वनं; (४) विस्फुरन्तम्;, अचेतनं,

तं विषीदन्तमाज्ञाय राक्षसं पाण्डुनन्दनः ।
प्रगृह्य तरसा दोर्भ्यां पशुमारममारयत् ।। ६४ ।। [(१)]

आक्रम्य च कटीदेशे जानुना राक्षसाधमम्।
पीडयामास पाणिभ्यां कण्ठं तस्य वृकोदरः ।। ६५ ।। [(२)]

अथ कज्जलसर्वाङ्गं व्याविद्धनयनाम्बरम् ।
भूतले भ्रामयामास वाक्यं चेदमुवाच ह ।। ६६ ।। [(३)]

**भीमः**

हिडिम्बबकयोः पाप न त्वमश्रुप्रमार्जनम्।
करिष्यसि गतश्चापि यमस्य सदनं प्रति ।। ६७ ।।[(४)]

**विदुरः**

इत्येवमुक्त्वा पुरुषप्रवीरस्तं राक्षसं क्रोधपरीतचेताः ।
प्रस्रस्तवस्त्राभरणं स्फुरन्तमुद्भ्रान्तचित्तं व्यसुमुत्ससज ।। ६८ ।।[(५)]
तस्मिन्हते तोयदतुल्यरूपे कृष्णां पुरस्कृत्य नरेन्द्रपुत्राः ।
भीमं प्रशस्याथ गुणैरनेकैर्हृष्टास्ततो द्वैतवनाय जग्मुः ।। ६९ ।। [(६)]

---

(१)(३) तं हृत्य ; तं गृह्य ; सङ्गृह्य ; संहृत्य (for प्रगृह्य),
(२)(१) च (तु) (for स) ; (२) राक्षसाधिपं, (३) पीडयामास; अपीडयच्च; पाणिभ्यां ; तस्थं कण्ठं ; कण्ठमस्थ; कण्ठमध्ये ; कर्णमस्य ,कण्ठं क्लिन्नमिवाम्बरं,
(३)(१) जर्जर० (for तं जड० ); (२) व्याविद्ध ; व्याविद्धनयनाम्बरं ; व्यावृत्तनयनोज्वलं; भ्राम ०(for पात ),(व्यावृत्तनयनोल्बणम्-घ)
(४)(१) हिडम्ब , हिर्डबि ; (३) गतश्चा ; स्या पि
(५)(२) क्रोधविरक्तनेत्रः ; क्रोधपरीतचेताः ; घोर ( कोप ; क्रोध) ; विवृत्तनेत्रं (त्रः) अस्रस्त ; विस्रस्त ; प्रभ्रष्ट ; आस्रस्त, (४); नेत्रं (for चित्तं),
(६)(३) परिष्वज्य (for प्रश ); (४) स्तुत्वा (for हृष्टास् ) ; ततोपेत्य, ततोन्वेत्य (for ततो द्वैत ); द्वैतवनं प्रजग्मुः,

## विदुरः

एवं विनिहतः सङ्ख्ये किर्मीरो मनुजाधिप ।
भीमेन वचनात्तस्य धर्मराजस्य कौरव ॥ ७० ॥ [(१)]

ततो निष्कण्टकं कृत्वा वनं तदपराजितः ।
द्रौपद्या सह धर्मज्ञो वसतिं तामुवास ह ॥ ७१ ॥ [(२)]

समाश्वास्य च ते सर्वे द्रौपदीं भरतर्षभाः ।
प्रहृष्टमनसः प्रीत्या प्रशशंसुर्वृकोदरम् ॥ ७२ ॥ [(३)]

भीमबाहुबलोत्पिष्टे विनष्टे राक्षसे ततः ।
विविशुस्तद्वनं वीराः क्षेमं निहतकण्टकम् ॥ ७३ ॥ [(४)]

स मया गच्छता मार्गे विनिकीर्णो भयावह ।
वने महति दुष्टात्मा दृष्टो भीमबलाद्धतः ॥ ७४ ॥ [(५)]

**लक्षालङ्कारः-** विनिकीर्णः विस्तृतसर्वाङ्गः ।

तत्राश्रौषमहं चैतत्कर्म भीमस्य भारत।
ब्राह्मणानां कथयतां ये तत्रासन् समागताः ॥ ७५ ॥ [(६)]

## वैशम्पायनः

---

(१)(२) वसुधाधिप ( पः) ; (३) भीमेन च बलात्तस्य; भीमसेनेन; वचनात्; (४) धीमतः (for कौरव),

(२) (३)क-ख-धर्मात्मा वसतिं तामुपावसत्, धर्मात्मा ( ज्ञा) (for ज्ञो) ; (४) वसतीं ; वसतीर्, तामुवाच ह;अवसद्वने ; अवसत्ततः ; तामुपा ( तां समा) वसत्,

(३)(१) हि ( तु) (for च ), तां समाश्वास्य ते सर्वे (२) पुरुष (for भरत ) ; (३) सर्वे (for प्रीत्या),

(४)(१) ख-श्रिप्ते निहते राश्रसेतदा, बलोत्क्षिप्ते निह ; (हि) ते राक्षसे तदा ; (३) ते (for तद् )प्रीताः ; घोरं (for वीराः)

(५)(२) नकः (for , वहः); (३) वसति (for महति,); तस्मिन्नरण्ये सहसा,(४) बलात्ततः; बलाहतः; बलोद्धृतः; बलो हतः

(६)(१)ख-राजन् कर्म, राजन् (for चैतत् ) (२) संयुगे; दुष्करं (for , भारत),

एवं विनिहतं सङ्ख्ये किर्मीरं रक्षसां वरम्।
श्रुत्वा ध्यानपरो राजा निशश्वासार्तवत्तदा ।। ७६ ।। (१)

अस्मिन् आरण्यकपर्वणि १०अध्याये ७५ श्लोकाः सन्ति

किर्मीरवधपर्वणि प्रथमोध्यायः

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां किर्मीरवधपर्वणि मैत्रेयशापे दशमोऽध्यायः ।। १० ।।

## ।। वनपर्वणि आरण्यपर्वणि किर्म्मीरवधपर्व समाप्तम् ।।

(१)(२) राक्षसाधमं; नाम राक्षसं; राक्षसाधिपं;

# ३. कैरातपर्व

## महाभारततात्पर्यनिर्णये- २२ अध्याये

## कैरातपर्वकथा

वने वसन्तोऽथ पृथासुतास्ते वार्तां स्वकीयां प्रापयामासुराशु ।
कृष्णे सोऽपि द्रुतमायात् ससत्यः सम्बन्धिनो ये च पाञ्चालमुख्याः ।। २३ ।।

क्रुद्धं कृष्णं धार्तराष्ट्राय पार्थाः क्षमापयामासुरुच्चैर्गृणन्तः ।
गुणांस्तदीयानमितान् प्रणम्य तदा रुदन्ती द्रौपदी चाऽप पादौ ।
सा पादयोः पतिता वासुदेवमस्तौत् समस्तप्रभुमात्मतन्त्रम् ।। २४ ।।

अचिन्त्य नित्याव्ययपूर्णसद्गुणार्णवैकदेहाखिलदोषदूर ।
रमाब्जजेरेशसुरेन्द्रपूर्ववृन्दारकाणां सतताभिवन्द्य ।
समस्तचेष्टाप्रद सर्वजीवप्रभो विमुक्ताश्रय सर्वसार ।। २५ ।।

इति ब्रुवन्ती सकलानुभूतं जगाद सर्वेशितुरच्युतस्य ।
यस्याधिकानुग्रहपात्रभूता स्वयं हि शेषेशविपादिकेभ्यः ।। २६ ।।

श्रुत्वा समस्तं भगवान् प्रतिज्ञां चकार तेषामखिलाश्च योषाः ।
पतीन् समालिङ्ग्य विमुक्तकेशा भीमाहतान् दर्शये नान्यथेति ।
तां सान्त्वयित्वा मधुरैः सुवाक्यैर्नारायणो वाचमिमां जगाद ।। २७ ।।

**महाभारते- वनपर्वणि ११ अध्यायः**

# अर्जुनाभिगमनपर्व

## 03- 03- 011

## ११.एकादशोऽध्यायः

श्रीकृष्णेन स्वीयैस्सह वने पाण्डवसमीपगमनम् ।।१।। अर्जुनेन कृष्णस्तवनम् ।।२।। स्वदुःखनिवेदनपूर्वकं रुदन्त्या द्रौपद्याः कृष्णेन समाश्वसनम् ।।३।।

**वैशम्पायनः**

भोजाः प्रव्रजिताञ्छ्रुत्वा वृष्णयश्चान्धकैः सह ।
पाण्डवान् दुःखसन्तप्तान् समाजग्मुर्महावने ।। १ ।।

पाञ्चालस्य च दायादो धृष्टकेतुश्च चेदिपः ।
( शिशुपालसुतश्श्रीमान् धृष्टकेतुश्च चेदिपः ।)
केकयाश्च महावीर्या भ्रातरो लोकविश्रुताः ।। २ ।।[१]

वने द्रष्टुं ययुः पार्थान्क्रोधामर्षसमन्विताः ।
गर्हयन्तो धार्तराष्ट्रान्किं कुर्म इति चाब्रुवन् ।। ३ ।।[२]

केशवः सात्यकिश्चैव धृष्टद्युम्नश्च पार्षतः ।
अमात्यैः सह मित्रैश्च बलेन स्वजनेन च ।
वने तेन ययुः पार्थानूचुः किं करवामहे ।।

वासुदेवं पुरस्कृत्य सर्वे ते क्षत्रियर्षभाः ।
परिवार्योपविविशुर्धर्मराजं युधिष्ठिरम् ।। ४ ।।

---

(१)(१)पञ्चालस्य तु (for च), दायादो; दे। (२)ख-सुतः श्रीमान् धृष्टद्युम्नः प्रतापवान्, तदा शिशुपालसुतः श्रीमान्,(३)कैकेयाश्च, महेष्वासा,

(२)(१)द्रष्टुं for तेऽभि-), (२) ऊचुः किं करवामहे ,(४)धिक्पापान् (for किं कुर्म),धिक् धिक् पापानि चाब्रुवन् ,

अभिवाद्य कुरुश्रेष्ठं विषण्णः केशवोऽब्रवीत् ।

**वासुदेवः**

दुर्योधनस्य कर्णस्य शकुनेश्च दुरात्मनः ।
दुःशासनचतुर्थानां भूमिः पास्यति शोणितम् ॥ ५ ॥

एतान्निहत्य समरे ये च तस्य पदानुगाः ।
तांश्च सर्वान् विनिर्जित्य सहितान् सनराधिपान् ॥[१]

ततः सर्वेऽभिषिञ्चामो धर्मराजं युधिष्ठिरम् ।
निकृत्योपचरन् वध्य एष धर्मः सनातनः ॥ ६ ॥

**वैशम्पायनः**

पार्थानामभिषङ्गेण तथा क्रुद्धं जनार्दनम् ।
अर्जुनः शमयामास दिधक्षन्तमिव प्रजाः ॥ ७ ॥

सङ्क्रुद्धं केशवं दृष्ट्वा पूर्वदेवेषु भारत ।
कीर्तयामास कर्माणि सत्यकीर्तेर्महात्मनः ॥ ८ ॥[२]

**लक्षालङ्कारः-** पूर्वदेवेषु भारत इत्यत्र पूर्वं देवो देवनं अक्षक्रीडा यैः कृता ते पूर्वदेवाः दुर्योधनादयः, दैत्या वा तेषु ।

पुरुषस्याप्रमेयस्य सत्यस्यामिततेजसः ।
प्रजापतिपतेर्विष्णोर्लोकनाथस्य धीमतः ॥ ९ ॥

**अर्जुनः**

दश वर्षसहस्राणि यत्र सायङ्गृहो मुनिः ।
व्यचरस्त्वं पुरा कृष्ण पर्वते गन्धमादने ॥ १० ॥

---

(१)तस्य (for तेषां), सहिताःसनराधिपाः,)
(२)(२)पूर्वदेहेषु फाल्गुनः; भारत for फल्गुनः),

लक्षालङ्कारः- नानावतारेष्वप्यभेदाद्बदरीनारायणादिरूपैः कृतकर्माणि कृष्णकर्मतया स्तौति - दशवर्षसहस्राणि इत्यादिना ।

दश वर्षसहस्राणि दश वर्षशतानि च ।
पुष्करेष्ववसः कृष्ण त्वमपो भक्षयन्पुरा ॥ ११ ॥(१)

ऊर्ध्वबाहुर्विशालायां बदर्यां मधुसूदन ।
अतिष्ठ एकपादेन वायुभक्षः शतं समाः ॥ १२ ॥(२)

अवकृष्टोत्तरासङ्गः कृशो धमनिसन्ततः ।
आसीः कृष्ण सरस्वत्यां सत्रे द्वादशवार्षिके ॥ १३ ॥(३)

प्रभासमप्यथासाद्य तीर्थं पुण्यजनोचितम् ।
तथा कृष्ण महातेजा दिव्यं वर्षसहस्रकम्।
अतिष्ठस्त्वमथैकेन पादेन नियमस्थितः ॥ १४ ॥(४)
लोकप्रवृत्तिहेतोस्त्वमिति व्यासो ममाब्रवीत् ।

क्षेत्रज्ञः सर्वभूतानामादिरन्तश्च केशव ।
तपसां च निधिः कृष्ण यज्ञस्त्वं च सनातनः ॥ १५ ॥(५)
योगकर्ता हृषीकेश साङ्ख्यकर्ता सनातनः ।
शीलस्त्वं सर्वयोगानां वीराणां नियमस्य च ॥

(१)(३)पुष्करे ह्यवसः; पुष्करेषु ०ष्ववसन्; ०रे न्यवसत्, ०वसः
(२)(१)दश वर्षसहस्राणि (२) सूदन; आतिष्ठदेक०,
(३)(१)अवकृष्टोत्तरा; कृष्णाजिनोत्तरा, (३)आसीत्; (for आसीः),(४)सत्रे वर्षसहस्र० (स्त्र०) के,
(४)प्रभासं च समा , (२)पुण्यजनार्चितं; जनाकुलं; पुण्यं जनार्दन,(३)तत्र (for तथा) बाहो; (for तेजा), (४)सहस्रिकं, (३)अतिष्ठंस्तप एकेन; अतिष्ठ ए (दे० मे० स्त्वे०) ०कपादेन; आ (अ) तिष्ठस्त्वमथैकेन; क-ख-स्त्वेकपादेन, अतिष्ठस्त्वं यदेकेन, वायुभक्षः शतं समाः, पादेन नियमस्थितः; प (पा) देन विषमः(म)स्थित; नियमेन च संयुतः,
(५)(३)निधानं कृष्ण यज्ञस्त्वं; तपसां च निधिःकृष्ण, (४) तपसा (for यज्ञस्त्वं) ,

निहत्य नरकं भौममाहृत्य मणिकुण्डले ।
प्रादास्त्वमदितेः कृष्ण भवान् नः परमा गतिः ॥ १६ ॥(१)

प्रथमोत्पादितं कृष्ण मेध्यमश्वमवासृजः ॥ १७ ॥(२)

कृत्वा तत्कर्म लोकानामृषभः सर्वलोकजित् ।
अवधीस्त्वं रणे सर्वान् समेतान् दैत्यदानवान् ॥ १८ ॥

ततः सर्वेश्वरत्वं च सम्प्रदाय शचीपतेः ।
मानुषेषु महाबाहो प्रादुर्भूतोऽसि केशव ॥ १९ ॥(३)

स त्वं नारायणो भूत्वा हरिरासीः परन्तप ।
ब्रह्मा सोमश्च सूर्यश्च धर्मो धाता यमोऽनलः ॥ २० ॥(४)

वायुर्वैश्रवणो रुद्रः कालः खं पृथिवी दिशः ।
अजश्चराचरगुरुः स्रष्टा त्वं पुरुषोत्तम ॥ २१ ॥(५)

नारायणादिभिर्देव क्रतुभिर्भूरिदक्षिणैः ।
अयजो भूरितेजास्त्वं कृष्ण चैत्ररथे वने ॥ २२ ॥(६)

शतं शतसहस्राणि सुवर्णस्य जनार्दन ।
एकैकस्मिंस्तदा यज्ञे परिपूर्णानि भागशः ॥ २३ ॥(७)

---

(१)(३) ख-कोशएकस्मिन्नेवेदमर्धंदृश्यते,
(२)(१) भीमम् (for भौमम् ), (३) प्रथमोत्पतितं,
(३)(१)हि, (for च) (३) मानुषोसि (for षेषु),
(४)(२)आसीत् (for आसीः) तपः(for तप), (३)सोमः सूर्यः,विष्णुश्च सूर्य०
(५)वसुर् (for वायुर्) वायुः कालः (३)अजरश्चामरगुरुः (४) पुरुषोत्तमः
(६)(१)नारायणो देव भूत्वा मूर्तिं; नारायणं, परायणं-घ देवमूर्धा मूर्धे मूर्ध्वं; गुह्यं; मूर्धन्; मूर्ध मूर्ध नारायणो ह्यभूः पूर्वं; त्वं दुरायणादिभिर्देव चतुरायणा नारायष्यदिभिर्देव;(२)क्रतुं सन् for क्रतुभिर्) मधुसूदन (नः) for भूरि) (३)अजयो; अधृष्यो; अयजद् for अयजो) अधृष्य इति पाठे त्वं यज इत्यध्याहारः, .स्त्वं for वै,
(७)(१)अदात् (for शतं) (२) जनार्दनः (३)यथा; तथा (for तदा) (४) दत्तवान्; भारत (for भागशः)

अदितेरपि पुत्रत्वमेत्य यादवनन्दन ।
त्वं विष्णुरिति विख्यात इन्द्रादवरजो विभुः ।। २४ ।।[१]

शिशुर्भूत्वा दिव खं च पृथिवीं च परन्तप ।
त्रिभिर्विक्रमणैः कृष्ण क्रान्तवानसि तेजसा ।। २५ ।।

सम्प्राप्य दिवमाकाशमादित्यस्यन्दने स्थितः ।
अत्यरोचश्च भूतात्मन्भास्करं स्वेन तेजसा ।। २६ ।।[२]

प्रादुर्भावसहस्रेषु तेषु तेषु त्वया विभो ।
अधर्मरुचयः कृष्ण निहताः शतशोऽसुराः ।।

सादिता मौरवाः पाशा निशुम्भनरकौ हतौ ।
कृतः क्षेमः पुनः पन्थाः पुरप्राग्ज्योतिषं प्रति ।। २७ ।।[३]

जारूथ्यामाहुतिः क्रुद्धः शिशुपालो जनैः सह ।
जरासन्धश्च शैब्यश्च शतधन्वा च निर्जितः ।। २८ ।।[४]

**लक्षालङ्कारः**- जारूथ्यामाहुतिः क्रुद्ध इत्यत्र 'जॄ वयोहानौ' इति धातोः जारुः जराशीलो वृद्धः, तस्मिन्नेव थ्या स्थिरीकर्तुं योग्या जारूथ्या अग्रपूजेत्यर्थः । तां, आवृणोत्याच्छाद-यतीत्यावृतिः ।।

तथा पर्जन्यघोषेण रथेनादित्यवर्चसा ।

---

(१) दानवमर्दन (for यादव) (३)त्वं (तं)हि विष्णुरिति ख्यातः (४)विभुः; युधि; दिवि (भुवि) भवः;
(२) (१)परम्; पदम्; च तथा ( दिवम् ) सम्प्राप्येदमथाकाशं (२) भुवने; दर्शनो; स्यन्दने for सदने (३) अत्यरोचत भूतात्मा (४)आदित्यं; अनादि (for भास्करं) आदित्यस्तव रोचिषा,
(३) (१)अ-मग्रहीः,क-माहरः- नृपैस्सह, घ-मग्रधीः क्रोधाः, सूदिता (for सा) (२) ०षुन्द शुम्भ; सुम्भ, (for सुन्दं) (३) कृत (for कृतः) कृतः (for पुनः)
(४) (१)आहरतिः; सङ्कृतिः आहरस् आहृतिः आहतः-ख(आहुतिः) क्रोधात्; कोपाः; कोपात् for क्राथः-ख) नृपैः (for 0नुजैः)- (for जनैः) (३) जरासन्धश्च; भीमधन्वा च (for सेनश्च) (४)वि (for च)

अहार्षीर्महिषीं भोज्यां रणे निर्जित्य रुग्मिणम् ।। २९ ।।(१)

इन्द्रद्युम्नो हतः कोपाद्यवनश्च कशेरुमान् ।
हतः सौभपतिः साल्वः त्वया सौभश्च पातितः ।। ३० ।।(२)

इरावत्यां हतो भोजः कार्तवीर्यसमो युधि ।
गोपतिस्तालकेतुः च त्वया विनिहतावुभौ ।। ३१ ।।(३)

तां च भोगवतीं पुण्यामृषिकान्तां जनार्दन ।
द्वारकामात्मसात्कृत्वा समुद्रं गमयिष्यसि ।। ३२ ।।

न क्रोधो न च मात्सर्यं नानृतं मधुसूदन ।
त्वयि तिष्ठति दाशार्ह न नृशंस्यं कुतोऽनृजु ।। ३३ ।।(४)

आसीनं चैत्यमध्ये त्वां दीप्यमानं स्वतेजसा ।
आगम्य मुनयः सर्वेऽयाचन्ताभयमच्युत ।। ३४ ।।(५)

लक्षालङ्कारः- आगम्य मुनय इत्यत्र आगम्य ज्ञात्वा ।

युगान्ते सर्वभूतानि सङ्क्षिप्य मधुसूदन ।
आत्मनैवात्मसात्कृत्वा जगदास्से परन्तप ।। ३५ ।।(६)

युगादौ तव वार्ष्णेय नाभिपद्माद्जायत ।

---

(१)(३)अवाप्सीः; उवाह; आदत्सीः; अहार्षीः (आभाषीः); उवास (अवाक्षीः) रु०रौ० ग्मिणीं (for महिषीं-ख) तेषां; भार्यां; भैष्मी; भैमीं; देवीं (for भोज्यां ) (४)मृधे; ; युद्धे (for रणे )

(२) (१)क्रोधाद् (for कोपाद्) (२)कसेरुमान्; सकेरुमान्; कशेरुहः; कशेरकः (३)साल्वः (४)सौभश्च पातितः, एवमेते युधि हता भूयश्चान्याञ्छृणुष्व ह । मे (for ह),

(३)(१)हतो; ततो (for त्तथा),

(४) (४) क-ल नृशंसः, ख-न नृशंसो न चानृजुः, नानृशंस्यं सं न नृशंसं (सुः; सः)

(५)(१)चैत्य चिति (for चितिं) ०नं नित्या चित्त मध्यस्थं(२) क-ख-याचन्त्यभयमच्युत , घ-घ्यायन्त्या-मलमच्युत, (३ )मुनयः (४)याचन्तो याचन्त्य याचन्ते (for याचन्ता;) अच्युतं,

(६) (३)आत्मनैव; लोकाश्चैव (४)आस्ते; आसीः; आसीत्; (for आस्से)

ब्रह्मा चराचरगुरुर्यस्येदं सकलं जगत् ।
तं हन्तुमुद्यतौ घोरौ दानवौ मधुकैटभौ ।।
तयोर्व्यतिक्रमं दृष्ट्वा क्रुद्धस्य भवतो हरेः ।
ललाटाज्जातवाञ्छम्भुः शूलपाणिस्त्रिलोचनः ।।
इत्थं तावपि देवेशौ त्वच्छरीरसमुद्भवौ ।।
त्वन्नियोगकरावेताविति मे नारदोऽब्रवीत् ।।

युगादौ तव वार्ष्णेय इत्यादि सार्धश्लोकत्रय□; क्वचिन्न दृष्टम्-

तथा नारायण पुरा क्रतुभिर्भूरिदक्षिणैः ।
इष्टवांस्त्वं महासत्रं कृष्ण चैत्ररथे वने।।[१]

नैव पूर्वे  परे चैव करिष्यन्ति कृतानि ते ।
यानि कर्माणि देव त्वं बाल एव महाद्युते ।। ३६ ।।[२]

कृतवान् पुण्डरीकाक्ष बलदेवसहायवान् ।
वैराजभवने चापि ब्रह्मणा न्यवसः सह ।। ३७ ।।[३]

– –

एवमुक्त्वा स्वमात्मानमात्मा कृष्णस्य पाण्डवः ।
तूष्णीमासीत् ततः पार्थमित्युवाच जनार्दनः ।। ३८ ।।[४]

लक्षालङ्कारः- स्वं स्वकीयम्, आत्मानं परमात्मानम्, आत्मा प्रियः ।

---

(१) (१)पुरा नारायणो भूत्वा यज्ञं; सत्व (for सत्रं),

(२)(१)एवं (for नैवं) परे (for पूर्वे) परे चापि; परे वापि; नापरे ह; (२)भवि (for करि०) वै; च; वा (for ते) (३) कर्माणि यानि (४) भवानेव; बालभावे (for बाल एव ) महाबलः; बल; बलं (for द्युते) बलिनां बल एव हि ,

(३) (३)कैलास (श), ०पि त्वं (for चापि), (४)ब्राह्मणैर् (for ब्रह्मणा) ,न्यवसं-घ

(४)(१)स्वमा; महा (for तदा) , (४) उवाच मधुसूदनः; ,अब्रवीत्स जना० ,

७९ ६– – ६

ममैव त्वं तवैवाहं ये मदीयास्तवैव ते ।
यस्त्वां द्वेष्टि स मां द्वेष्टि यस्त्वामनु स मामनु ॥ ३९ ॥[१]

नरस्त्वमप्रसि दुर्धर्ष हरिर्नारायणो ह्यहम् ।
काले लोकमिमं प्राप्तौ नरनारायणावृषी ॥ ४० ॥[२]

अनन्यः पार्थ मत्तस्त्वमहं त्वत्तश्च पाण्डव ।
नावयोरन्तरं शक्यं वेदितुं भरतर्षभ ॥ ४१ ॥[३]

लक्षालङ्कारः- अनन्यः पार्थ मत्तस्त्वम् इत्यत्र हे भारत पार्थ ! मत्तः मन्मूलरूपात् अनन्य अभिन्नः अहमेव । त्वं च त्वमेव । हे भरतर्षभ आवयोः मूलरूपावताररूपयोरावयोः अन्तरं देशतः कालतो गुणतश्चावधिं वेदितुं न शक्यम् । आवयोः तव च मम चेत्यावयोः अन्तरं तारतम्यं च वेदितुं न शक्यम् ॥

– –

एवमुक्ते तु वचने केशवेन महात्मना ।
तस्मिन्वीरसमावापे संक्रुद्धेष्वथ राजसु ।
धृष्टद्युम्नमुखैर्वीरैर्भ्रातृभिः परिवारिता ॥ ४२ ॥[4]

इत्युक्त्वा पुण्डरीकाक्षः पाण्डवं सुप्रियं प्रियम् ।
प्रीयमाणो हृषीकेशस्तूष्णीमासाम्बभूव ह ॥

पाञ्चाली पुण्डरीकाक्षमासीनं भ्रातृभिः सह ।[५]

---

(१) (१)मदीयस्त्वं , त्वदीयोहं ,
(२) (२)प्यहं; त्वहं; स्म्यहं (for ह्यहम् ) , (४) काले (for लोकाल्) ,
(३) (२)त्वत्तश्चाहं तथैव च; अहं त्वत्तस्त्वथैव च; त्वत्तोहं चैव भारत ,
(४) (१)राज; समावापे , (२) सङ्क्रुद्धेष्वथ ,
(५)(२)पाण्डवैः; भ्रातृभिः (for यादवैः) ,

अभिगम्याब्रवीत्क्रुद्धा शरण्यं शरणैषिणी ॥ ४३ ॥[१]

– ÷६

वासुदेव वसूनां त्वं वासवावरजाच्युत ।
देवदेवो हि देवानामिति द्वैपायनोऽब्रवीत् ॥ ४४ ॥[२]

पूर्वे प्रजानिसर्गे त्वामाहुरेकं प्रजापतिम् ।
स्रष्टारं सर्वलोकानामसितो देवलः अब्रवीत् ॥ ४५ ॥[३]
वासुदेव वसूनां च वासवो बहुधाच्युत ।
देवदेवोऽसि लोकानां कृष्णद्वैपायनोऽबवीत् ।[४]

विष्णुस्त्वमसि दुर्धर्ष त्वं यज्ञो मधुसूदन ।
यष्टा त्वमसि यष्टव्यो जामदग्न्यो यथाब्रवीत् ॥ ४६ ॥

ऋषयस्त्वां क्षमामाहुः सत्यं च पुरुषोत्तम ।
सत्याद्यज्ञोऽसि सम्भूतः कश्यपस्त्वां यथाब्रवीत्॥ ४७ ॥[५]

साध्यानामपि देवानां शिवानामीश्वरेश्वर ।
भूतभावन भूतेश यथा त्वां नारदोऽब्रवीत् ॥ ४८ ॥[६]
ब्रह्मशङ्करशक्राद्यैर्देववृन्दैः पुनः पुनः ।
क्रीडसे त्वं नरव्याघ्र बालः क्रीडनकैरिव ।

---

(१) (३)क्रुद्धा; कृष्णं (for कृष्णा;) ,
(२) (१)हृषीकेश (for वसूनां च), वासवावरजाच्युत ,हि (for सि) , देवां (for लोका), इति (for कृष्ण), ०भि ०वि (for नि), सर्वलोकानाम्,
(३) (१)भि (वि) (for नि) (३) सर्वलोकानाम्
(४)(पं१)हृषीकेश (for वसूनां) वासवावसजाजदयुर० ,(पं३) देवा(for लोका) इति (for कृष्ण)
(५)(३)स त्वं (for सत्याद) , मायया चापि सं ,(४)काश्यपः त्वा ,
(६)(१)असिं (for अपि)(२) विश्वेषाम्; विश्वानाम्; शिवानाम् (for वसूनाम्) ०श्वर (for श्वरः), (३) भूतभावन भूतेश (for शो) (४)त्वा (for त्वां) ,

द्यौश्च ते शिरसा व्याप्ता पद्भ्यां च पृथिवी प्रभो ।
जठरं त इमे लोकाः पुरुषोऽसि सनातनः ॥ ४९ ॥[१]

विद्यातपोऽभितप्तानां तपसा भावितात्मनाम् ।
आत्मदर्शनतृप्तानामृषीणामसि सत्तमः ॥ ५० ॥[२]

राजर्षीणां पुण्यकृतामाहवेष्वनिवर्तिनाम् ।
सर्वधर्मोपपन्नानां त्वं गतिः पुरुषर्षभ ।
त्वं प्रभुस्त्वं विभुश्च त्वं आत्मभूस्त्वं सनातनः ॥ ५१ ॥[३]

लोकपालाश्च लोकाश्च नक्षत्राणि दिशो दश ।
नभश्चन्द्रश्च सूर्यश्च त्वयि सर्वं प्रतिष्ठितम् ॥ ५२ ॥[४]

मर्त्यता चैव भूतानाममरत्वं दिवौकसाम् ।
त्वयि सर्वं महाबाहो लोककार्यं प्रतिष्ठितम् ॥ ५३ ॥[५]

सा तेऽहं दुःखमाख्यास्ये प्रणयान्मधुसूदन ।
ईशस्त्वं सर्वभूतानां ये दिव्या ये च मानुषाः ॥ ५४ ॥[६]

कथं नु भार्या पार्थानां तव कृष्ण सखी विभो ।
धृष्टद्युम्नस्य भगिनी सभां कृष्येत मादृशी ॥ ५५ ॥[७]

---

(१)(१)द्यौश्च (for दिवं) ,व्याप्ता (२)प्रभो; तथा (for विभो) , (३)च रवम् तु ते ; त्रयो (for इमे) ,
(२)(३)तृप्तानां) (४)असि; अपि (for ऋषि) , सत्तमः ,
(३)(४)पुरुषर्षभ (भः) , (५)गुरुम् (for प्रभुः) ,च त्वं (for त्वं भूर्) , (६) भूतात्मा त्वं विचेष्टसे -ख ।
(४) (३) लोक लोकाश्च ,(४)तथा , (for दश) ,
(५) (१)सत्य (for मर्त्यं) , (४) महद् (for लोक) ,
(६)(१)साहं ते (३)ईश्वरः (for ईशस्त्वं) , सर्वलोकानां , (४)मानवाः (for मानुषाः) ,
(७) (१)तु भार्या; भार्या च पाण्डू० (for पार्था), (२) प्रिया; प्रभो; सती (for विभो) , (४)परिक्लेश्येत; परिकृष्येत; मां कृष्येत ,

स्त्रीधर्मिणी वेपमाना शोणितेन समुक्षिता ।
एकवस्त्रा विकृष्टास्मि दुःखिता कुरुसंसदि ।। ५६ ।।[१]

लक्षालङ्कारः- स्त्रीधर्मिणी वेपमाना इत्यत्र 'स्त्रीधर्मिण्यविरात्रेयी मलिनी पुष्पवत्यपि' इत्यभिधानात् स्त्रीधर्मिणी रजस्वला ।।

राजमध्ये सभायां तु रजसातिपरिप्लुताम् ।
दृष्ट्वा च मां धार्तराष्ट्रा प्राहसन् पापचेतसः ।। ५७ ।।[२]

कृष्यमाणां तथा दीनामनाथामिव माधव ।
आहुश्चैतान्षण्डतिलान्पश्च चैव तु पाण्डवान् ।
पतिमन्यं वृणीष्वेति सर्वे ते मधुसूदन ।।

दासीभावेन मां भोक्तुमीषुस्ते मधुसूदन ।
जीवत्सु पाण्डुपुत्रेषु पञ्चालेषु च वृष्णिषु ।। ५८ ।।[३]

नन्वहं कृष्ण भीष्मस्य धृतराष्ट्रस्य चोभयोः ।
स्नुषा भवामि धर्मेण साहं दासीकृता बलात् ।। ५९ ।।[४]

गर्हये पाण्डवांस्त्वेव युधि श्रेष्ठान्महाबलान् ।
यत्क्लिश्यमानां प्रेक्षन्ते धर्मपत्नीं यशस्विनीम् ।। ६० ।।[५]

धिग्बलं भीमसेनस्य धिक्पार्थस्य च गाण्डिवम् ।[६]

---

(१)(२)शोणितेन (for रुधि०) ,
(२)(१)राज्ञां मध्ये , हि; च (for तु) (२)तु, अभि० ०प्लुतां (for ता); समीरिता (४) व्यहसन्; विहसन् ,
(३)(१)दासीभोगेन सम्भोज्व; मां भोक्तुम् (२)मामीषुर्; ; अन्वीयुर् for ईषुस्ते) , (४)च; स for(अ)थ)
(४)(१)याहं ( सा ) कृता बलात्
(५)(१)त्वेवं त्वेषा; ) चैव ( त्वेव ) (३) यत् ( ये ) मर्षते; प्रेक्षन्ति; प्रैक्षन्त; पश्यन्ति
(६)(२)च धन्विता ; च गाण्डिवं; धनुष्मतः

यौ मां विप्रकृतां च्छिद्रैर्मर्षयेतां जनार्दन ।। ६१ ।।(१)

लक्षालङ्कारः- विप्रकृतां छिद्रै इत्यत्र 'छिद्रं निर्व्यथनं रोको रन्ध्रं श्वभ्रं वपा सुषिः' इत्याभिधानात् छिद्रैः तुच्छैरित्यर्थः । छिदि च्छेत्तरि सति रीयन्ते क्षीयन्ते इति च्छिद्रा दुर्बलाः तैर्वा ।

शाश्वतोऽयं धर्मपथः सद्भिराचरितः सदा ।
यद्भार्यां परिरक्षन्ति भर्तारोऽल्पबला अपि ।। ६२ ।।(२)

भार्यायां रक्ष्यमाणायां प्रजा भवति रक्षिता ।
प्रजायां रक्ष्यमाणायामात्मा भवति रक्षितः ।। ६३ ।।

आत्मा हि जायते तस्यां तस्माज्जाया भवत्युत ।
भर्ता च भार्यया रक्ष्यः कथं जायेन्ममोदरे ।। ६४ ।।(३)

लक्षालङ्कारः- कथं जायेत् इत्यत्र न चेदिति योग्यपदाध्याहारः । जायेत् जायेत ।

नन्विमे शरणं प्राप्तं न त्यजन्ति कदाचन ।
ते मां शरणमापन्नां नान्वपद्यन् कथं परान् ।। ६५ ।।(४)

लक्षालङ्कारः- ते मां शरणमापन्नां इत्यत्र परान् शत्रून् कथं अन्वपद्यन् अन्वपादयन् । अन्तर्णीतो णिच् । प्रापयन्नित्यर्थः ।

पञ्चभिः पतिभिर्जाताः कुमारा मे महौजसः ।
एतेषामप्यवेक्षार्थं त्रातव्यास्मि जनार्दन ।। ६६ ।।(५)

---

(१)(४) क्षुद्रैर्मर्षयेतां जनार्दन
(२)(१)धर्मपन्थाः (३)रक्षद्भिः; रक्षन्ते; (४)भर्तारोप्यब लीयसः
(३)(३)हि; तु (for च) (४)जायेन् मनोहरः
(४)(१)न हीमे; ते त्विमे (for नन्विमे); प्राप्तं; प्राप्ता; (२)सन्त्य जन्ति; विजहन्ति, (३)शरणागतां मां राजानो (for कृष्ण); शरणागतां तु मां; ०तहंमं; मां; राजन् (४)नान्वपद्यन् कथं वराः (पुरः; चन),
(५)(१) (ए)ते (for ()मे); पञ्चभिः पतिभिर्जाताः (२)-ख-स्त्वमितौजसः,मे ये च

प्रतिविन्ध्यो युधिष्ठिरात् सुतसोमो वृकोदरात् ।
अर्जुनात् श्रुतकीर्तिश्च शतानीकस्तु नाकुलिः ।। ६७ ।।[१]

कनिष्ठात् श्रुतकर्मा च सर्वे सत्यपराक्रमाः ।
प्रद्युम्नो यादृशः कृष्ण तादृशास्ते महारथाः ।। ६८ ।।[२]

नन्विमे धनुषि श्रेष्ठा अजेया युधि शात्रवैः ।
किमर्थं धार्तराष्ट्राणां सहन्ते दुर्बलीयसाम् ।। ६९ ।।

अधर्मेण हृतं राज्यं सर्वे दासाः कृतास्तथा ।
सभायां परिकृष्टाहमेकवस्त्रा रजस्वला ।। ७० ।।[३]

नाधिज्यमपि यच्छक्यं कर्तुमन्येन गाण्डिवम् ।
अन्यत्रार्जुनभीमाभ्यां त्वया वा मधुसूदन ।। ७१ ।।[४]

धिग्बलं भीमसेनस्य धिक्पार्थस्य च पौरुषम् ।
यत्र दुर्योधनः कृष्ण मुहूर्तमपि जीवति ।। ७२।।[५]

कालः सृजति भूतानि कालः संहरते प्रजाः ।
तत्कालेन कृतं मन्ये न तु पौरुषवर्धनम् ।।

य एतानाक्षिपद् भ्रातृन् सह मात्रा विहिंसकः।
अधीयानान्पुरा बालान्व्रतस्थान्मधुसूदन ।। ७३ ।।[६]

---

(१)(१)युधिष्ठिरात्प्रतिविन्ध्यः (३)च (for तु) (४) च; (अ)थ (for तु),
(२)(१)च (अ)थ (for तु) (२) क-सोमन्तु , ख-सेनस्तु,
(३)(१)जितं (for हृतं); (२) तथा कृताः कृतास्तदा; क्लिष्टा (for कृष्टा ); परिकृष्टा एकवस्त्रा,
(४) (१)तच्छक्यं (for यं); शक्यं कर्तुं (३)बहुं (for भीमां)
(५) (१)धिग्बलं भीमसेनस्य; बलं धिग्भीमसेनस्य; (२)धनुष्मतां; च ((अ)पि) पौरुषं; च गाण्डिवं; धनुष्मतः (३) पापो (for कृष्ण),
(६)(१)य एनान् भ्रातृन् (for राष्ट्रात्); (२) विहिंसितुं ; विहिंसितान्; विशां पते; विहिंसकः (for (अ) विहिंसकान्); ०हामात्यान्सहाम्बिकान्;,

भोजने भीमसेनस्य पापः प्राक्षेपयद्विषम् ।
कालकूटं नवं तीक्ष्णं सम्भूतं लोमहर्षणम् ।। ७४ ।।[१]

तज्जीर्णमविकारेण सहान्नेन जनार्दन ।
सशेषत्वान्महाबाहो भीमस्य पुरुषोत्तम ।। ७५ ।।[२]

लक्षालङ्कारः- सशेषत्वात् इत्यत्र शेषो विशेषः, सामर्थ्यविशेष इत्यर्थः । तेन (सं) सहितत्वात् ।

प्रमाणकोट्यां विश्वस्तं तथा सुप्तं वृकोदरम् ।
बद्ध्वैनं कृष्ण गङ्गायां प्राक्षिप्य पुरमाव्रजत् ।। ७६ ।।[३]

लक्षालङ्कारः- विश्वस्तं विशेषेण श्वासवन्तं, सुप्तमित्यर्थः । प्राक्षिप्य प्रकर्षेण आक्षिप्य दुरुक्तीरुक्त्वा ।

यदा विबुद्धः कौन्तेयस्तदा सञ्छिद्य बन्धनम् ।
उदतिष्ठन् महाबाहुर्भीमसेनो महाबलः ।। ७७ ।।[४]

आशीविषैः कृष्णसर्पैर्भीमसेनमदंशयत् ।
सर्वेष्वेवाङ्गदेशेषु न ममार च शत्रुहा ।। ७८ ।।[५]

प्रतिबुद्धस्तु कौन्तेयः सर्वान्सर्पानपोथयत् ।
सारथिं चास्य दयितमपहस्तेन जघ्निवान् ।। ७९ ।।[६]

---

(१) (२)पुनः ( पापः); (३)अ-क-विषं, विषं (for नवं); कालकूटनिभं तीक्ष्णं; (४) सम्भूतं (भ्रातरं); संवृतं रोमं,

(२)(३)संशेषत्वान्; सशेषं तं; विशेषत्वान्; सावशेषं; (४) भीमेन(for भीमस्य);,

(३)(२)तदा सुसं; पारौर्बध्वा (३)अयं (for बध्वैं) तोये स भीमं सुभीमे ; तु भीमे; षु रुष्ण) गङ्गायां (याः) (४)गृहस् ; पुरम् (for पुनर् ),

(४) (१)प्रबुद्धः (२)सञ्छिन्नबन्धनः

(५)(२)भीमसेनम्; सुप्तं चेमम् ; सुप्तश्चैव स दंशितः; (४)स ह (for च)

(६) (१)यदा विबुद्धः कौतेयः (३)तदा च सारथिं चास्य,

पुनः सुप्तानुपाधाक्षीद्बालकान् वारणावते ।
शयानानार्यया सार्धं को नु तत्कर्तुमर्हति ॥ ८० ॥[१]

लक्षालङ्कारः- उपाधाक्षीत् 'दह भस्मीकरणे' इति धातोः लुङ् । आर्यया मात्रा कुन्त्या।

यत्रार्या रुदती भीता पाण्डवानिदमब्रवीत् ।
महद्व्यसनमापन्ना शिखिना परिवारिता ॥ ८१ ॥

– –

हा हतास्मि कुतो न्वद्य भवेच्छान्तिरिहानलात् ।
अनाथा विनशिष्यामि बालकैः पुत्रकैः सह ॥ ८२ ॥[२]

– ÷६

तत्र भीमो महाबाहुर्वायुवेगपराक्रमः ।
आर्यामाश्वासयामास भ्रातॄंश्चापि वृकोदरः ॥ ८३ ॥[३]

वैनतेयो यथा पक्षी गरुत्मान् पततां वरः ।
तथैवाभिपतिष्यामि भयं वो नेह विद्यते ॥ ८४ ॥[४]

आर्यामङ्केन वामेन राजानं दक्षिणेन च ।
अंसयोश्च यमौ कृत्वा पृष्ठे बीभत्सुमेव च ॥ ८५ ॥[५]

सहसोत्पत्य वेगेन सर्वानादाय वीर्यवान् ।
भ्रातॄनार्यां च बलवान् मोक्षयामास पावकात् ॥ ८६ ॥

---

(१)(१)ततः पुनर् (पुनः क्षिप्तान्); (for पुनः सुप्तान्);,
(२)(२)स्वस्ति स्वस्तिर् (for शान्तिर्) महा इहा ),
(३)(४)चैव (for चापि);,
(४)(२)गरुत्मान् (for गरुडः); (३) (अ)ति (for (अ)भि-),
(५)(२)दक्षिणेन युधिष्ठिरं; (३) यमौ चैव च बाहुभ्यां,

ते रात्रौ प्रस्थिताः सर्वे सह मात्रा यशस्विनः ।
अभ्यगच्छन्महारण्ये हिडिम्बवनमन्तिकात् ।। ८७ ।।[१]

श्रान्ताः प्रसुप्तास्तत्रेमे मात्रा सह सुदुःखिताः ।
सुप्तांश्चैनानभ्यगच्छद्धिडिम्बा नाम राक्षसी ।। ८८ ।।[२]

सा दृष्ट्वा पाण्डवं तत्र शयानं भ्रातृभिः सह ।
हृच्छयेनाभिभूता हि भीमसेनमकामयत्। (3)

भीमस्य पादौ कृत्वा तु स्व उत्सङ्गे ततोऽबला ।
पर्यष्वजत संहृष्टा कल्याणीं मृदुपाणिना ।। ८९ ।।[४]

**लक्षालङ्कारः-** पर्यष्वजत परिष्वङ्गम् आलिङ्गनमकरोत् ।

तामबुध्यदमेयात्मा बलवान्सत्यविक्रमः ।
पर्यपृच्छत तां भीमः किमिहेच्छस्यनिन्दिते ।। ९० ।।[५]

सैवमुक्ता तु भीमेन राक्षसी कामरूपिणी ।
भीमसेनं महात्मानमाह चैवमनिन्दिता ।
पलायध्वमितः क्षिप्रं मम भ्रातैष वीर्यवान् ।
आगमिष्यति वो हन्तुं तस्माद्गच्छत माचिरम्।

---

(१)(३)सह मात्रा; (३)महारण्ये; (४) हिडम्ब; अन्तिके; अन्तिकं
(२)(१) (ए)ते (ए)व (for ()मे; (२) सह मात्रा; (३) ह्येतान्; एतान् (for चैनान्),
(३) (पं१)पाण्डवान् भीमं (for तत्रं) सुप्तान्मात्रा भ्रात्रा); सह क्षितौ (अ) भिभूतात्माः समाविष्टा (for (अ) भिभूता हि),
(४)(१)पादौ कृत्वा; (२)स्वोत्सङ्गे तु; उत्सङ्गेन; स्वोत्सङ्गेव; स्वपताङ्के ) (for स्व उत्सङ्गे); स्वोत्सङ्गेव स्वपतोङ्के (गे) (for स्व उत्सङ्गे) सुलोचना; ततोबला; साश्वत्सङ्गे महाबला; पर्य( रि)ष्वजत; परिष्वज्य च; पर्यष्वमर्द०,
(५) (१)तां तदाप्रतिमेयात्मा; (३)पर्यपृच्छत्स तां; न्तु तां; त तां; तदा ; (३)नन्दिके (अ)निन्दिते; कस्य स्वमसि शोभने

अथ भीमोऽभ्युवाचैनां साभिमानमिदं वचः ।
नोद्विजेयमहं तस्मान्निहनिष्येऽहमागतम्।[1]
आगतं प्रतियोत्स्यामि राक्षसं भ्रातरं तव
तयोः श्रुत्वा तु सञ्जल्पमागच्छद्राक्षसाधमः ।
भीमरूपो महानादान् विसृजन् भीमदर्शनः ॥ ९१ ॥[२]

–ह

केन सार्धं कथयसि आनयैनं ममान्तिकम् ।
हिडिम्बे भक्षयिष्यामो न चिरं कर्तुमर्हसि ॥ ९२ ॥[३]

अथैनामब्रवीत्क्रुद्धो राक्षसः पुरुषादकः[4]

सा कृपासङ्गृहीतेन हृदयेन मनस्विनी ।
नैनमैच्छत्तदाख्यातुमनुक्रोशादनिन्दिता ॥ ९३ ॥[५]

स नादान् विनदन् घोरान् राक्षसः पुरुषादकः ।
अभ्यद्रवत वेगेन भीमसेनं तदा किल ॥ ९४ ॥[६]

तमागतमभिप्रेक्ष्य भीमसेनो महाबलम् ।

---

(१) (पं) कामचारिणी ; आह चैवमनिन्दिता; प्रवोधयामि वै क्षिप्रं;(ए)व (for सु) संहर्तुं; व हन्तु (for वो हन्तुं); तां चा० (for भीमो ०पि (for भि); तां प्रत्युवाच (for भीमोभ्युवाच-घ), (ए)ष (ए)नां (for इदं वचः) साम्ना परमवल्गुना; नोदिजामि तव भ्रतुर्; न चैनान्(नैतांश्च; नेमांश्च) प्रतिबोधये;भयं नास्ति महावनात् (बंलात्); निहन्मि च समागतं,

(२)(१)सञ्जल्पम् वचनम् (for कथितम्); (२) धिपः (for धमः) (४) विदधद्; निनदन्; वि ( व्य) नदन् (for विसृजन्),

(३) राक्षस उं; हिडिम्ब उं; पुरुषादकः-ख,

(४)(१)साकं (for सार्ध); (२) ह्यानयैनं; ह्यानयस्व (for आनयैनं); (३)भक्षयिष्ये वां; ष्यामो ष्यामि,

(५)(१)क्षमां; स्नेहं (for कृपां ) (३)नैतम्; नैतद् (for नैनम्) इच्छतु; ऐक्षत् (for ऐच्छतु) तदा कर्तुम्,

(६)(१)विविधान्; विपुलान् (for विनदन्); (२) पिशिताशनः (for पुरुषां); कृत्वाभ्य (हा) गच्छद् (for अभ्यद्रवत); सङ्क्रुद्धो (for वेगेन); महाबलः (for तदा किल),

उत्थाय सहसा रक्षो निजग्राह महाबलः ।

तमभिद्रुत्य सङ्क्रुद्धो वेगेन महता बली ।
अगृह्णात्पाणिना पाणिं भीमसेनस्य राक्षसः ॥ ९५ ॥[१]

इन्द्राशनिसमस्पर्शं वज्रसंहननं दृढम् ।
संहत्य भीमसेनस्य व्याक्षिपत् सहसा करम् ॥ ९६ ॥[२]

गृहीतः पाणिना पाणिं भीमसेनोथ रक्षसा ।
नामृष्यत महाबाहुस्तत्राक्रुध्यद् वृकोदरः ॥ ९७॥[३]

तदाऽऽसीत्तुमुलं युद्धं भीमसेनहिडिम्बयोः ।
सर्वास्त्रविदुषोर्घोरं वृत्रवासवयोरिव ॥ ९८ ॥[४]

विक्रीड्य सुचिरं भीमो राक्षसेन सहानघ ।
निजघान महावीर्यस्तं तदा निर्बलं बली ॥ [5]
तलैरशनिकल्पैश्च मुष्टिभिश्चाहनत्तदा । [6]
ततो भीमो महाबाहू रूपमास्थाय वै महत् ॥
जघान राक्षसं क्रुद्धो वृत्रं देवपतिर्यथा ।

हत्वा हिडिम्बं भीमोऽथ प्रस्थितो भ्रातृभिः सह ।
हिडिम्बामग्रतः कृत्वा यस्यां जातो घटोत्कचः ॥ ९९ ॥

---

(१)संरब्धो (for क्रुद्धो); अभिद्रुत्य च संरब्धो; सङ्क्रुद्धो वेगेन बलिनं; बलवद्; बलवान्; तरसा (for महता); भीमसेनं तदा बली,

(२)(३)संहृत्य; सङ्गत्य; सेनस्य,

(३)(१)गृहीत्वा; गृहीतः; संहत्य (for गृहीतं); सेनस्य राक्षसः;राक्षसं भीमसेनं तदा किल; सेनेन रक्षसां,

(४) अथा ; तदां (for तत्रां) अभूत् (for आसीत्); तुमलं हिडम्बयोः

(५) क्रीडित्वा; विक्रम्य (for विक्रीड्य) महाबल (for सहां),

(६) निर्जघान; निजग्राह; दुर्बलं; (अ)तिबलं; बलिनं (for निर्बलं),

ततः सम्प्राद्रवन् सर्वे सह मात्रा यशस्विनः ।
एकचक्रामभिमुखाः संवृता ब्राह्मणव्रजैः ॥ १०० ॥[१]

प्रस्थाने विदुरश्चैषां च मन्त्री प्रियहितोऽभवत् ।
ततोऽगच्छन्नेकचक्रां पाण्डवाः संशितव्रताः ॥ १०१ ॥[२]

तत्राप्यासादयामासुर्बकं नाम महाबलम् ।
पुरुषादं प्रतिभयं हिडिम्बेनैव सम्मितम् ॥ १०२ ॥

तं चापि विनिहत्योग्रं भीमः प्रहरतां वरः ।
सहितो भ्रातृभिः सर्वैर्द्रुपदस्य पुरं ययौ ॥ १०३ ॥

लब्धोऽहमपि तत्रैव वसता सव्यसाचिना ।
यथा त्वया जिता कृष्ण रुग्मिणी भीष्मकात्मजा ॥ १०४ ॥[३]

एवं सुयुद्धे पार्थेन जिताऽहं मधुसूदन ।
स्वयंवरे महत्कर्म कृत्वोऽप्यसुकरं परैः ॥ १०५ ॥[४]

एवं क्लेशैः सुबहुभिः क्लिश्यमाना सुदुःखिता ।
निवसाम्यार्यया हीना कृष्ण धौम्यपुरःसरा ॥ १०६ ॥[५]

त इमे सिंहविक्रान्ता वीर्येणाभ्यधिकाः परैः ।

---

(१)(१)सं; ते (for च); (२)परन्तपाः (for यश०); (३) गताः (for मुखाः), (४)ब्राह्मणैः सह; ०णैर्बुधैः; ०णव्रतैः; ०णानुजैः; ०णैर्वृतैः

(२)(१)विदुरस्तेषां; व्यास एवैषां; विदुरश्चैषां (for व्यास एषां च); (२)हिते रतः; हितेभवत्; (४)पार्थिवाः (for पाण्डवाः); शंसितव्रताः,

(३)(१)कृष्ण (for अपि); (अ)र्जिता; गता; हृता (for जिता); भीमं (for भीष्मं),

(४)(१)तथा सुयुद्धे; तत्रासुयुद्धे; (४) नासुकरं; यद्दुष्करं; .न सुकरं(forअ)प्यसुं त्वांसु;

(५)(२)माना सुदुःखिता ; (३) अवसन्; निवसामि; निवसन्ति; न्यवसन्; निवसन्; आर्यया हीना; अवसन्नाहं; आर्यया सार्धं; आश्रयाहीना; (४)पुरःसरा; पुरःसरं; पुरस्कृताः

विहीनैः परिक्लिश्यन्तीं समुपैक्षन्त मां कथम् ॥ १०७ ॥[१]

एतादृशानि दुःखानि सहन्ती दुर्बलीयसाम् ।
दीर्घकालं प्रदीप्तानि पापानां पापकर्मणाम् ॥ १०८ ॥[२]

कुले महति जातास्मि दिव्येन विधिना किल ।
पाण्डवानां प्रिया भार्या स्नुषा पाण्डोर्महात्मनः ॥ १०९ ॥

कचग्रहमनुप्राप्ता का नु जीवेत मादृशी ।
पञ्चानां पाण्डुपुत्राणां प्रेक्षतां मधुसूदन ॥ ११० ॥[३]

– –

इत्युक्त्वा प्रारुदत्कृष्णा मुखं प्रच्छाद्य पाणिना ।
पद्मकोशप्रकाशेन मृदुना मृदुभाषिणी ॥ १११ ॥[४]

स्तनावपतितौ पीनौ सुजातौ शुभलक्षणौ ।
अभ्यवर्षत पाञ्चाली दुःखजैरश्रुबिन्दुभिः ॥ ११२ ॥[५]

चक्षुषी परिमार्जन्ती निःश्वसन्ती पुनः पुनः ।
बाष्पपूर्णेन कण्ठेन क्रुद्धा वचनमब्रवीत् ॥ ११३ ॥[६]

– ÷९

नैव मे पतयः सन्ति न पुत्रा न मधुसूदन ।

---

(१)(२)वीर्यवन्तो दुरासदाः; (३) निहीनैः; अजिताः कृष्यन्तीं; क्लिश्यन्ति; तुष्यं ति (तीं),
(४)समुदैक्षन्त; पेक्षं(पेक्ष्यं) पैक्षन्त; पैक्षत; पेक्षसि,
(२)(२)सहन्ती; (३)दीर्घकाल; काले; प्रसृष्टानि; प्रदीप्तास्मि; प्रतिष्ठानि; (उ)पसृष्टानिः; प्रवृत्तानि ;
(४)पापकर्मणां ;क्षुद्रधर्मिणां,
(३) (२) कृष्ण वरा सती -ख।
(४)(१)केशग्रहणमापन्ना; (२)परा स्वसा; च सा(for वरा); (३)पाण्डुपुत्राणां (for इन्द्रं),
(५)वैशसं (for प्रं) कोषं (for कोशं-घ)
(६)(२)शुभदर्शनौ (३) अभ्यषिचत (४) शोक; मुख ( दुःख )

न भ्रातरो न च पिता नैव त्वं नच बान्धवाः ।। ११४।।[१]

ये मां विप्रकृतां क्षुद्रैरुपेक्षन्ते विशोकवत् ।
न हि मे शाम्यते दुःखं कर्णो यत्प्राहसत् तदा ।। ११५ ।।[२]

चतुर्भिः कारणैः कृष्ण त्वया रक्ष्यास्मि नित्यशः ।
सम्बन्धाद्गौरवात्सख्यात्प्रभुत्वेनैव केशव ।

अथ तामब्रवीत् कृष्णस्तस्मिन्वीरसमागमे ।
रोदिष्यन्ति स्त्रियो ह्येवं येषां क्रुद्धासि भामिनि ।। ११६ ।।[३]

द्रौपद्यास्तद्वचः श्रुत्वा क्रोधामर्षसमन्वितः ।
सान्त्वयंश्च वरारोहां सुवाक्यैर्भरतर्षभ ।।[4]

बीभत्सुशरसञ्छन्नाञ्छोणितौघपरिप्लुतान् ।
निहतान् जीवितं त्यक्त्वा शयानान् वसुधातले ।। ११७ ।।[५]

त्वं श्रोष्यस्थनवद्याङ्गि दुर्योधनमुखान् रिपून् ।

यत्समर्थं पाण्डवानां तत्करिष्यामि मा शुचः ।
सत्यं ते प्रतिजानामि राज्ञो राज्ञी भविष्यसि ।। ११८ ।।[६]

---

(१)(२)मधुसूदन; न च बान्धवाः इति अन्त्यपादे व्यत्यासः ।
(२)(२)मर्षयन्ति; उपेक्षध्वं -घ; उपेक्षन्त ०क्षन्ति विशेषतः (३)च (for हि);(४)यत्कर्णः; यल्लोकः ,
(३)(१) ताम्; (for (ए)ताम्) (for (ए)नाम्)
(४)वासुदेव (श्रीकृष्ण) (३) प्येवं (for ह्येवं); (४)यैराकृष्टा (for येषां क्रुद्धां); तु (अ)सि) भाविनि (नी),
(५)(१)छिन्नाङ्गान्; सञ्छिन्नाज०;निर्भिन्ना भिन्नाङ्गान्; (२)तच्छोणितपरिं(३)द्रक्ष्यसि च तान्; वल्लभान्वीक्ष्य-घ, ; दुर्लभान्वीक्ष्य; जीवितंस्त्यक्तान्; जीवितान्त्यक्त्वा (४)धरणी (for वसुधां),
(६)(१)यत्समक्षं यथा द्रक्ष्यसि पाञ्चाली); (२) शुच (for शुचः) (४)राज्ञां राज्ञी-घ

पतेद् द्यौर्हिमवाञ्छीर्येत् पृथिवी शकली भवेत् ।
शुष्येत्तोयनिधिः कृष्णे न मे मोघं वचो भवेत् ॥ ११९ ॥[१]

तच्छुत्वा द्रौपदी वाक्यं प्रतिवाक्यमथाच्युतात् ।
साचीकृतमवेक्षत्सा पाञ्चाली मध्यमं पतिम् ।
आबभाषे महाराज द्रौपदीमर्जुनस्तदा ।[2]
मा रोदीः शुभताम्राक्षि यदाह मधुसूदनः ।[3]
तथा तद्भविता देवि नान्यथा वरवर्णिनि। ॥*[4]
शकुनिं त्वक्षकितवं माद्रीपुत्रो हनिष्यति ।

ॄ ʃ

अहं द्रोणं हनिष्यामि शिखण्डी तु पितामहम् ।
दुर्योधनं भीमसेनः कर्णं हन्ता धनञ्जयः ॥ १२० ॥

रामकृष्णौ व्यपाश्रित्य अजेयाः स्म रणे स्वसः ।
अपि वृत्रहणा युद्धे किं पुनर्धृतराष्ट्रजैः ॥ १२१ ॥[५]

– –

इत्युक्त्वाऽभिमुखा वीरा वासुदेवमुपास्थिताः ।
तेषां मध्ये महाबाहुः केशवो वाक्यमब्रवीत् ॥ १२२ ॥[६]

अस्मिन् कैरातपर्वणि ११अध्याये १२२श्लोकाः सन्ति

---

(१)(४)मिथ्या (for मोघं)
(२) (पं-१) अथोच्युतात्; अथाच्युतं; अथोद्यतं ततः कृष्णां;तदा कृष्णां; तथा कृष्णां (for महाराज);
(३) (पं-१) अर्जुनः प्रहसन्निव;शुचि (for शुभ); यथाह वरवर्णिनी; ( नि); यथाह मधुसूदनः;
(४) (पं-१)कृष्णोयं तत्तथा (कृष्णो जनार्दनो) देवि; चारुलोचने (for वरं)
(५)(१)उपा; समा; व्युपां (for व्यपा ); (२) ह्यजेयाः स्म; विजेयाः स्म अजेयोस्मि; अजेयांश्च; अजय्याः स्म; रणे स्वसः (for शुचिं); वृत्रहणं राष्ट्रजान्,
(६) (१)इत्युक्त्वा; (२)उपास्थिताः; उपाश्रिताः; उपागताः

( कैरातपर्वणि प्रथमोध्यायः )

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अर्जुनाभिगमनपर्वणि द्रौपद्याश्वासने एकादशोऽध्यायः ।। ११ ।।

# महाभारततात्पर्यनिर्णये २२ अध्याये

यदीहाहं स्थितो नैवं भविताऽहं त्वयोधयम् ।
साल्वराजं दुरात्मानं हतश्चासौ सुपापकृत् ।। २८ ।।

महाभारते- वनपर्वणि १२ अध्यायः

सन्निधानेऽथवा दूरे कालव्यवहितेऽपि वा ।
स्वभावाद् वा व्यवहिते वस्तुव्यवहितेऽपि वा ।
नाशक्तिर्विद्यते विष्णोर्नित्याव्यवहितत्वतः ।। २९ ।।
तथाऽपि नरलोकस्य करोत्यनुकृतिं प्रभुः ।
दुष्टानां दोषवृद्ध्यर्थं भीमादीनां गुणोन्नतेः ।। ३० ।।
युधिष्ठिरेऽतिवृद्धं तु राजसूयादिसम्भवम् ।
धर्मं च सङ्क्रमयितुं कृष्णायामनुजेषु च ।। ३१ ।।
योग्यताक्रमतो विष्णुरिच्छयेत्थमचीक्लृपत् ।
एधमानद्विडित्येव विष्णोर्नाम हि वैदिकम् ।। ३२ ।।

स्वयोग्यताया अधिकं धर्मज्ञानादिजं फलम् ।
भीष्मद्रोणाम्बिकेयादेः पार्थेष्वेव निधापितुम् ।। ३३ ।।
पुनश्च पापवृद्ध्यर्थमजो दुर्योधनादिषु ।

व्यासोऽम्बिकासुतं प्राह पार्था मेऽभ्यधिकं प्रियाः ।

तेषां प्रवासनं चैव प्रियं न मम सर्वथा ।। ३४ ।।

इति दुर्योधनादीनां पापवृद्ध्यर्थमेव सः ।

प्रिया इत्येव कथनात् पाण्डवानां शुभोन्नतेः ।। ३५ ।।

गुरुत्वाद् भीमसेनस्य क्षमा द्यूतेऽर्जुनादिनाम् ।

नातिधर्मस्वरूपोऽत्र धर्मो भीमे निरौपधः ।। ३६ ।।

द्रौपद्या अप्यतिक्लेशात् क्षमा धर्मो महानभूत् ।

सा हि भीममनो वेद न कार्यः शाप इत्यलम् ।। ३७ ।।

तस्माद् यथायोग्यतया हरिणा धर्मवर्द्धनम् ।

कृतं तत्रासन्निधानकारणं केशवोऽब्रवीत् ।। ३८ ।।

महाभारते- वनपर्वणि १२ अध्यायः

**03- 03- 012**

# १२. द्वादशोऽध्यायः

कृष्णेन युधिष्ठिरं प्रति तद्व्यसनस्य द्वारकायां स्वस्यासान्निध्यहेतुकत्वकथनेन समाश्वसनम्

।। १ ।। कृष्णेन युधिष्ठिरं प्रति साल्वेन युद्धस्य स्वस्यानागमनहेतुत्व-कथनम् ।। २ ।।

**वासुदेवः**

नैदं कृच्छ्रमनुप्राप्तो भवान्स्याद्वसुधाधिप ।
यद्यहं द्वारकायां स्यां राजन् संनिहितः पुरा ।। १ ।।[१]

आगच्छेयमहं द्यूतमनाहूतोऽपि कौरवैः ।
आम्बिकेयेन दुर्धर्ष राज्ञा दुर्योधनेन च ।
वारयेयमहं द्यूतं बहून्दोषान् प्रदर्शयन् ।। २ ।।[२]

**लक्षालङ्कारः-आम्बिकेयेन दुर्धर्ष इत्यत्र दुर्धर्ष धर्षयितुमशक्य ! धर्मराजेत्यर्थः ।**

भीष्मद्रोणौ समानाय्य कृपं बाह्लीकमेव च ।[३]
वैचित्रवीर्यं राजानमलं द्यूतेन कौरव ।। ३ ।।

पुत्राणां तव राजेन्द्र त्वन्निमित्तमिति प्रभो ।[४]
तत्र वक्ष्याम्यहं दोषान् यैर्भवानवरोपितः ।। ४ ।।

**लक्षालङ्कारः- यैर्दोषैरवरोपितः राज्याद्भ्रंशितः ।।**

वीरसेनसुतो यैश्च राज्यात्प्रभ्रंशितः पुरा।[५]
पुष्करेण नरेन्द्रेण ताश्च वक्ष्यामि तस्य वै ।
अभक्षितविनाशश्च देवनेन विशाम्पते ।। ५ ।।[६]

---

(१)(१)नैतत् (नैवं) (for नेदं),
(२) (४)तथा (राज्ञा)
(३) (२)बहुदोषान् ; प्रकीर्तयन्; (३)समासाद्य; नीय; भाष्य; (४)बाह्लिकम् ,
(४) (२)अहं for अलं )
(५) (१) (आ)चक्षमहं; (आ) चक्षन्महा; (आ)चक्षामहे; (२)व्यवरोपितः; व्यर्तिं (अभि); व्यपं; उपतापितः; प्रतिरो ( अवरो);(३) तु (for च) (४)प्रध्वंसितः पुरा
(६) (१)अभ्यर्थित; अतर्कित (तो); अभूत्क्षिति; अलक्षित; अभक्ष्यत; अहं क्षिति अहक्षित; अभिक्षित,

स्वातन्त्र्यं द्यूतसङ्गस्य वर्णयेयं यथातथम् ।। ६ ।।[१]

**लक्षालङ्कारः**.द्यूतसङ्गस्य द्यूतप्रसङ्गस्य स्वातन्त्र्यं सर्वान् स्ववशीकृत्य स्थापनम् ।

स्त्रियोऽक्षा मृगया पानमेतत्कामसमुत्थितम् ।
दुःखं चतुष्टयं प्रोक्तं यैर्नरो भ्रश्यते श्रियः ।। ७ ।।[२]

तत्र सर्वत्र वक्तव्यं मन्यन्ते शास्त्रकोविदाः ।
एकाहाद्द्रव्यनाशोऽत्र ध्रुवं व्यसनमेव च ।। ८ ।।

**लक्षालङ्कारः**. तत्र सर्वत्र इत्यत्र वक्तव्यं दोषजालं मन्यन्ते जानन्ति ।

विशेषतश्च वक्तव्यं द्यूते पश्यन्ति तद्विदः ।। ९ ।।

भुक्तनाशश्चार्थानां वाक्पारुष्यं च केवलम्।[३]
एतच्चान्यच्च कौरव्य प्रसङ्गे कटुकोदयम् ।
द्यूते ब्रूयां महाबाहो समासाद्याम्बिकासुतम् ।। १० ।।[४]

एवमुक्तो यदि मया गृह्णीयाद्वचनं मम ।
अनामयं स्याद्धर्मश्च कुरूणां कुरुवर्धन ।। ११ ।।[५]

न चेत्स मम राजेन्द्र गृह्णीयान्मधुरं वचः ।
पथ्यं च भरतश्रेष्ठ निगृह्णीयां बलेन तम् ।। १२ ।।[६]

---

(१) (३)स्वातन्त्र्यं (अस्वास्थ्यं सातत्यं); धूर्तसङ्गस्य,

(२) (१)कामं; कालं (त्याज्यं) (for कामा) समुपस्थितं; उपस्थितं (for समुत्थितम्); (३)दुःखं (for व्यसनं); (४)ख-घ-यै राज्याद् भ्रश्यते श्रियः, अयं; नरो; इयं; राज्याद्; राजा (for राजन्),

(३) (१)एकाहाद् (for एकाह्ना); (३)नाशं (for नाशश्); आत्मनाशो भवेत्तूर्ण

(४) (१)अविश्वास्यमनर्थं (य्य) (३)प्रसङ्गे (३)भाग; राज (for बाहो),

(५) (३)अनामयश्च धर्मश्च; धर्मज्ञः (४)कुरुवर्धन; मानवर्धनः ,

(६) (१)तन्; तं (for स) न चेन्मम महाराज; (२)गृहीत; गृह्णीते; वचनं हितं (for मधुरं वचः) (३) तथ्यं च,

अथैनमपनीयैवं सुहृदो नाम दुर्हृदः ।
सभासदश्च तान् सर्वान् भेदयेयं दुरोदरात् ॥ १३ ॥[१]

लक्षालङ्कारः. अथैनान् इत्यत्र एनान् दुर्योधनादीन् अपनीय अपसार्य, 'टापं चैव हलन्तानाम्' इति वचनात् दुष्टा हृदा हृदयं येषां ते दुर्हृदाः तेषां दुर्योधनादीनां मध्ये अदुर्हृदं न विद्यते दुर्हृत् यस्य तं शान्तं तान् सभासदश्च दुरोदराद्भेदयेयम्।

सर्वांस्ताननुगृह्णमि बद्ध्वा शभ्रधक्ष्यमा ???

असान्निध्यं तु कौरव्य ममानर्तेष्वभूत्तदा ।
येनेदं व्यसनं प्राप्ता भवन्तो द्यूतकारितम् ॥ १४ ॥[२]

सोऽहमेत्य कुरुश्रेष्ठ द्वारकां पाण्डुनन्दन ।
अश्रौषं त्वां व्यसनिनं युयुधानाद्यथातथम् ॥ १५ ॥[३]

श्रुत्वैव चाहं राजेन्द्र परमोद्विग्नमानसः ।
तूर्णमभ्यागतोऽस्मि त्वां द्रष्टुकामो विशाम्पते ॥ १६ ॥[४]

अहो कृच्छ्रमनुप्राप्ताः सर्वे स्म भरतर्षभ ।
सोऽहं त्वां व्यसने मग्नं पश्यामि सह सोदरैः ॥ १७ ॥[५]

÷९ ÷

असान्निध्यं कथं कृष्ण तवासीद्वृष्णिनन्दन ।

---

(१) (१)अवनीपालान्; अविनीयैव; अनुः (प०)नीयैवं (for अभिनीयैवं) अथैन मपनीतेन; ये चैनमन्ववर्तन्त (प्रतीतेन); (३)सभासदोऽनुवर्तेरंस्तांश्च, सदोनुवर्तेरन्; (४)अथ सर्वान्; तांश्च हन्यां -ख तान्निहन्यां (for भेदयेयं); दुरोदरान्- घ

(२) (१)कौंतेय समये वज्व (२) समये मे त्वभूत्तदा(३) ख-प्राप्ता,

(३) (१)ऽयम् (for ऽहम्); अध (for एत्य);(२) एत्य भारत; यदुनन्दनः; कुरुनन्दन; एत्य सत्वरः;अभि भारत (for पाण्डुं ); (३) त्वा (for त्वां)

(४) (२)परमुद्रिभं; (४)महीपतेः; यथातथं,

(५) (२)च; ते (for स्म); ते (for ये); यो (सो) हं त्वां व्यसने मग्नं पश्यामि,

क्व चासीद्विप्रवासस्ते किं चाकार्षीः प्रवासतः ।। १८ ।।[१]

७९

साल्वस्य नगरं सौभं गतोऽहं भरतर्षभ ।
निहन्तुं कौरवश्रेष्ठ तत्र मे शृणु कारणम् ।। १९ ।।[२]

महातेजा महाबाहुर्यः स राजा महायशाः ।
दमघोषात्मजो वीरः शिशुपालो मया हतः ।। २० ।।[३]

यज्ञे ते भरतश्रेष्ठ राजसूयेऽर्हणां प्रति ।
स रोषवशमापन्नो नामृष्यत दुरात्मवान् ।। २१ ।।[४]

श्रुत्वा तं निहतं साल्वस्तीव्ररोषसमन्वितः ।
उपायाद्द्वारकां शून्यामिहस्थे मयि भारत ।। २२ ।।[५]

स तत्र योधितो राजन्कुमारैर्वृष्णिपुङ्गवैः ।
आगतः कामगं सौभमारुह्यैव नृशंसवत् ।। २३ ।।[६]

चिरजीवी नृपः स्सोऽपि प्रसादात्पद्मजन्मनः ।। २४ ।।

ततो वृष्णिप्रवीरांस्तान्बालान्हत्वा बहूंस्तदा ।
पुरोद्यानानि सर्वाणि भेदयामास दुर्मतिः ।। २५ ।।

---

(१) (४)चां; त्वां (for वां); प्रवास (सि) तः; सगः ,
(२) वासुदेवः; भगवान् (१) साल्व (for साल्व); (२)पुरुषर्षभ; (३) (नृपं (for नरं); निहन्तुं कौरव; (भरत) श्रेष्ठ; अभवं पुरुषश्रेष्ठ; (४)तत्र श्रृणु,
(३) (१)महाबाहो ( कायो ); (२)स च (for यः स),
(४) (२) (ऽ) र्हणं ; (३)वशमापत्रो (वशतां प्राप्तो); स तु रोषवशं प्राप्तो; सरोष इव सम्प्राप्तो; स रोवमभिसम्प्राप्तो
(५) (१) (ए)वं (for तं); (२)कोपं (for रोषं ),
(६) (१)तत्रायोधितो वीरैः; बालैः (for राजन्) स तत्र युद्धमकरोत्; (२)कुमारैर् (for बालकैर्) वृष्णिभी राजपुङ्गवैः; (३)निवृत्तः (for आगतः) (४)आहत्य (for आरूह्य) (ए)वं; (ए)नं (for (ए)व); नृशंसवत्,

उक्तवांश्च महाबाहो क्वासौ वृष्णिकुलाधमः ।
वासुदेवः स मन्दात्मा वसुदेवसुतो गतः ॥ २६ ॥

तस्य युद्धार्थिनो दर्पं युद्धे विनयितास्म्यहम् ।
आनर्ताः सत्यमाख्यात तत्र गन्तास्मि यत्र सः ॥ २७ ॥[१]

**लक्षालङ्कारः - विनयिताऽस्मयहम् इत्यत्र वि विनाशं नयिता प्रापयिता ।**

तं हत्वा विनिवर्तिष्ये कंसकेशिनिषूदनम् ।
अहत्वा न निवर्तिष्ये सत्येनायुधमालभे ॥ २८ ॥[२]

क्वासौ क्वासाविति पुनस्तत्र तत्र प्रधावति ।
मया किल रणे योद्धुं काङ्क्षमाणः स सौभराट् ॥ २९ ॥[३]

अद्य तं पापकर्माणं क्षुद्रं विश्वासघातिनम् ।
शिशुपालवधामर्षाद्गमयिष्ये यमक्षयम् ॥ ३० ॥[४]

मम पापस्वभावेन भ्राता येन निपातितः ।
शिशुपालो महीपालस्तं वधिष्ये महीपते ॥ ३१ ॥[५]

भ्राता बालश्च राजा च न च सङ्ग्रामकोविदः ।
प्रमत्तश्च हतो वीरस्तं हनिष्ये जनार्दनम् ॥ ३२ ॥[६]

एवमादि महाराज विलप्य दिवमास्थितः ।

---

(१) (२)विनं (for नाशं) हि (for (अ)स्मि); ह (for (अ)हम्);(३)क-घ-सत्य,
(२) (२)शिशु- पालनिषूदनं; कृष्णं देवकिनन्दनं; निसूदनं ; (३) नाहत्वा विनिं,
(३) (२)प्र (for वि-); योद्धुं (for युद्धं),
(४) (१) (अ)हं (for तं) (२) क्रुद्धं; विश्वस्तधातिनं; वधां शिशुपालो ,
(५) शिशुपालो; (१)गोपं(for पापं); (३)महावीर्यस्; महा शत्रुस् (for मही),
(४)हनिं (for वधिं); महाहवे; महीपते; जनार्दनं,
(६) (२)मम (for न च); कोविदः (for 0मूर्धनि -घ); (४) वधिष्ये,

कामगेन स सौभेन क्षिप्त्वा मां कुरुनन्दन ।। ३३ ।।

तमश्रौषमहं गत्वा यथावृत्तः स दुर्मतिः ।
मयि कौरव्य दुष्टात्मा मार्तिकावतको नृपः ।।३४ ।।[१]

लक्षालङ्कारः. मार्तिकावताख्यदेशसम्बन्धी मार्तिकावतको नृपः साल्वः ।

ततोऽहमपि कौरव्य रोषव्याकुलमानसः ।
निश्चित्य मनसा राजन्वधायास्य मनो दधे ।। ३५ ।।[२]

आनर्तेषु विमर्दं च क्षेपं चात्मनि कौरव ।
प्रवृद्धमवलेपं च तस्य दुष्कृतकर्मणः ।। ३६ ।।[३]

ततोहमरपि कौरव्य रोषव्याकुललोचनः ।
निश्चित्य मनसा राजन् वधायास्य मनो दधे ।। ३७ ।।

ततः सौभवधायाहं प्रतस्थे पृथिवीपते ।
स मया सागरोपान्ते दृष्ट आसीत् परीप्सता ।। ३८ ।।[४]

ततः प्रध्माप्य जलजं पाञ्चजन्यमहं नृप ।
आहूय साल्वं समरे युद्धाय समवस्थितः ।। ३९ ।।[५]

तन्मुहूर्तमभूद्युद्धं तत्र मे दानवैः सह ।
वशीभूताश्च मे सर्वे भूतले च निपातिताः ।। ४० ।।[६]

---

(१) (१)इतो (for अहं); गतः: कौरव्य दुष्टात्मा-घ (२) स (for सु); (४) मार्तिकावतिको; नृप,
(२) (१)अथ (for अपि); (२) चेतनः; मानसः (३) निश्चितं,
(३) (२) घ-क्षेमं,
(४) (२)प्रस्थितः (for प्रतस्थे); (३) तन्; तं (for स); सागराभ्यासे; सागरोपान्ते; (४)परीप्सया; ०प्सुना दृष्टामासीत्युरं० पुरा,
(५) (१)प्रध्मा(for ध्मा) य; प्रध्माप्य शङ्खं; (३) आसाद्य for आहूय); साल्वं समरे; (४) समुपस्थितः ,
(६) (१)तन् (for सु); मुहूर्तमभवद्युद्धं); (३) शयीं; शवी; क्षयी; वधीं (for वशीं); ते (for

एतत्कार्यं महाबाहो येनाहं नागमं तदा ।
श्रुत्वैव हास्तिनपुरे द्यूतं चाविनयोत्थितम् ॥ ४१ ॥[१]

**लक्षालङ्कारः** श्रुत्वैव आगत इति पूर्वक्रियाया आवृत्तिः ।

द्रुतमागतवान्युष्मान् द्रष्टुकामः सुदुःखितान्।
श्रुत्वैव तत्क्षणं वेगादागतोऽहं नराधिप ॥

**अस्मिन् कैरातपर्वणि १२ अध्याये ४१ श्लोकाः सन्ति**

(कैरातपर्वणि द्वितीयोध्यायः)

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अर्जुनाभिगमनपर्वणि सौभवधोपाख्याने द्वादशोऽध्यायः ॥ १२ ॥

## महाभारततात्पर्यनिर्णये २२ अध्याये

साल्वं श्रुत्वा समायान्तं रौग्मिणेयादयो मया ।
प्रस्थापिता हि भवतां सकाशे ते ययुः पुरीम् ।
तदा साल्वोऽपि सौभेन द्वारकामर्दयद् भृशम् ॥ ३९ ॥
प्रद्युम्न आशु निरगादथ सर्वसैन्यैरन्यैश्च यादवगणैः सहितोऽनुजैश्च ।
साल्वोऽवगम्य तनयं मम तद्विमानात् पापोऽवरुह्य रथमारुहदत्र योद्धुम् ॥॥

**महाभारते- वनपर्वणि १३-१४ अध्यायौ**

---

मे);(४)वि; तु (for च),

(१) (१)कृत्वा; कृतं (for कार्यं); महाराज (२)नागतः; ह्यागतः पुरा (for तदा); (३)ह( हा); स्तिनपुरे); (४)चाप्यनयों; चाविनये स्थितं,

# 03- 03- 013

## १३. त्रयोदशोऽध्यायः

कृष्णेन युधिष्ठिरं प्रति साल्वसमागनसमये उग्रसेनकृतद्वारकारक्षणप्रकारकथन् ।। १ ।।
कृष्णेन युधिष्ठिरं प्रति साल्वयादवयुद्धवर्णनम् ।। २।।

÷९ ÷

वासुदेव महाबाहो विस्तरेण महामते ।
सौभस्य वधमाचक्ष्व न हि तृप्यामि कथ्यतः ।। १ ।।(१)

– ÷

हतं श्रुत्वा महाबाहो मया श्रौतश्रवं नृप ।
उपायाद्भरतश्रेष्ठ साल्वो द्वारवतीं पुरीम् ।। २ ।।(२)

लक्षालङ्कारः- श्रुत्वैव आगत इति पूर्वक्रियाया आवृत्तिः ।

अरुन्धत्तां सुदुष्टात्मा सर्वतः पाण्डुनन्दन ।
साल्वो वैहायसं चापि तत्पुरं व्यूह्य विष्ठितः ।। ३ ।।(३)

तत्र सोऽथ महीपालो योधयामास तां पुरीम् ।
अभिसारेण सर्वेण तत्र युद्धमवर्तत ।। ४ ।।(४)

लक्षालङ्कारः- अभिसारेण अभितः सरतीत्यभिसारेण सौभेन करणेन ।

---

(१) (२) महाद्युते; (४)कथ्यति; कथ्यतां; केशव; न हि मे तृप्यते मनः

(२) श्रीकृष्णः, श्रीभगवान्; (२)क-ख-शिशुपालं महारणे, नृप दमघोषसुतं नृपं; शिशुपालं मया रणे,

(३) (१)अरुधत्; अ (न्य); रुणत्; स; तु (for सु);(३) क-अरुणत्; ख-अरुन्धक्तां स दु,घ-आरुधत्तां,
(४)वीक्ष्य (for व्यूह्यः); वेष्टितः; धिष्ठितः; तिष्ठति (त),

(४) (१)तत्र सोथ (सौध);तत्रस्थो-ङ, महीपाल; महाराज; (२)रोधयामास,

पुरी समन्ताद्विहिता सपताका सतोरणा ।
सचक्रा सार्गला चैव सयन्त्रखनका तथा ॥ ५ ॥[१]

सोपतल्पप्रतोलीका साट्टाट्टालकगोपुरा ।
सचक्रग्रहणी चैव सोल्कालातावपोथिका ॥ ६ ॥[२]

सोष्ट्रिका भरतश्रेष्ठ सभेरीपणवानका ।
सतोमराङ्कुशा राजन्सशतघ्नीकलाङ्गला ॥ ७ ॥[३]

सभुशुण्ड्यश्मगुडका सायुधा सपरश्वधा ।
लोहचर्मवती चापि साग्निः सगुडशृङ्गिका ॥ ८ ॥[४]
शास्त्रदृष्टेन विधिना सुयुक्ता भरतर्षभ ॥ ८ ॥

दृष्टैरनेकैर्विविधैर्गदसाम्बोद्धवादिभिः ।[५]
पुरुषैः कुरुशार्दूल समर्थैः प्रतिवारणे
अतिख्यातकुलैर्वीरैर्दृष्टवीर्यैश्च संयुगे ॥ ९ ॥ [६]
मध्यमेन च गुल्मेन रक्षिभिः सा सुरक्षिता ॥ १० ॥

---

(१) (३)सगजा; सद्गणा; ससुहा; सध्वजा; सगदा; बहुळा; सहुळा -ङ(for सहुडा),सगुडा-ख

(२) (१)तप्त; शल्य-ख; कल्पं (for तल्प); (२)प्रासादाट्टालगोयुरा; सट्टालक सगोपुरा; (३)सचक्र (for सकच); ग्राहणी; ग्रहिणी; (४)सोल्कापाता (for सोल्का चैव); सपोथिका,

(३) (१)सोष्ट्रीका; सोष्णि(ष्णि)का; सष्ट्रिका (३)सतोमरां कुशा; सयन्तृणाङ्कुशा; साष्टिका सां (for श्वां) कुशा; चैव (for राजन्); (४)सशतघ्नी सलाङ्गला,

(४) (१)सभुशुण्ड्यश्मगुडका; सभुसण्डी (मुषण्ढी; मुकुठी); सलगुडा; स तु सिंहस्वनभरा; समुसुं (सं; सृं०ठीसासिधारा; (२) स्वधा; ०श्वथा (for श्वधा); (३)वर्मं (for चर्मं); साग्निः (for चापि); (४)सर्गलं; सपटं; सबहु; सगुडं; साकुलं; (for सहुडं); सहुडं ऋङ्गिका तथा,

(५) (२)सयुक्ता; सुयुक्ता; (३) रथैर्; दृप्तैद् (तृप्तैर्); (for द्रव्यैर्); (४)गदसाम्बोल्मुकादिभिः; गदाप्रासा सियोधिभिः,

(६) (१)राजं (for कुरूं) पुरुषैः शार्दूलदर्पाभैः (२)समन्तात् (for समर्थैः); प्रतिचारणे; वारणे; योधितः; बोधने; बोधनैः; परिवारिता; परिपालिता); (३)अति; अवि(for अभि); गुणैर् (for कुलैद्),

उत्क्षिप्तगुल्मैश्च तथा हयैश्च सपताकिभिः ।[१]
आघोषितं च नगरे न पातव्या सुरेति वै ।। ११ ।।

प्रमत्तेष्वभिघातं हि कुर्याच्छाल्वो नराधिपः

प्रमादं परिरक्षद्भिरुग्रसेनोद्धवादिभिः ।। १२ ।।

इति कृत्वा प्रमत्तास्ते सर्वे वृष्ण्यन्धकाः स्थिताः ।। १३ ।।[२]

आनर्ताश्च तथा सर्वे नटा नर्तकगायनाः ।
बहिर्निर्वासिताः क्षिप्रं रक्षद्भिर्वित्तसञ्चयम् ।। १४ ।।[३]

सङ्क्रमा भेदिताः सर्वे नावश्च प्रतिषेधिताः ।
परिखाश्चापि कौरव्य कीलकैः सुनिकीलिताः ।। १५ ।।[४]

उदपानाः कुरुश्रेष्ठ तथैवाप्यम्बरीषकाः ।
समन्तात्क्रोशमात्रं च कारिता विषमा च भूः ।[५]
सङ्क्रमा भेदिताः सर्वे प्राकाराश्च नवीकृताः ।। १६ ।।

प्रकृत्या विषमं दुर्गं प्रकृत्या च सुरक्षितम् ।
प्रकृत्या चायुधोपेतं विशेषेण तदानघ ।। १७ ।।[६]

सुरक्षितं सुगुप्तं च सर्वायुधसमन्वितम् ।

---

(१) (२)सारसंहिते; सा पुरी तदा रक्षिभिः, सा सु साधु) रक्षिता; तदा; ततो; हयै (for तथा); गुल्मैश्चरतो ग्रहैश्; रथैश् (for हयैश्); च स (for चैव); पताकिभिः (for पदातिभिः),

(२) (२)वै; च; हि (for ह),

(३) (१)अनरण्यास्; आनर्तैश्च; आगताश्च ततः सर्वे (२); नटा (for नट); नर्तन (for नर्तक); गायकाः (३)निवासिताः निःसारिताः); क्षिप्रं; चैव (for सर्वे); (४) रक्षिभिर् सञ्चयं,

(४) (४)कीलकैः सुचिताः कृताः; कीलकैः सुनिकीलिताः

(५) (१)च कौरव्य (for कुरुश्रेष्ठ); (२)क-ख-करीणकाः; च ((ए)व); तथा (दा); वाप्यः करीषकाः; तदा वाप्यः क्षितास्तदा; तथा बाह्याश्च शोधिताः(४) (अ)थः (आ)त्म (for च);,

(६) (१)सर्व (for दुर्गं)

तत्पुरं भरतश्रेष्ठ यथेन्द्रभवनं तथा ।। १८ ।।

न चामुद्रोऽविनिर्याति न चामुद्रः प्रवेश्यते ।
वृष्ण्यन्धकपुरे राजंस्तदा सौभसमागमे ।। १९ ।।[(१)]

अनुरथ्यासु सर्वासु चत्वरेषु च कौरव ।
बलं बभूव राजेन्द्र प्रभूतगजवाजिमत् ।। २० ।।[(२)]

दत्तवेतनभक्तं च दत्तायुधपरिच्छदम् ।
कृतोपधानं च तदा बलमासीन्महाभुज ।। २१ ।।[(३)]

न कोप्यवेतनः कश्चिन्न चातिक्रान्तवेतनः ।
नानुग्रहभृतः कश्चिन्न चादृष्टपराक्रमः ।। २२ ।।[(४)]

एवं सुविहिता राजन्द्वारका भूरिदक्षिणा ।
आहुकेन सुगुप्ता च राज्ञा राजीवलोचन ।। २३ ।।[(५)]

– ÷

तां तापयित्वा राजेन्द्र साल्वः सौभपतिस्तदा ।
प्रभूतनरनागेन बलेनोपविवेश ह ।। २४ ।।[(६)]

समे निविष्टा सा सेना प्रभूतसलिलाशये ।

---

(१) न चाबुद्धो; नामुद्रो हि (for () भि; (()पि); वि; हि (for ()भि); (२)चाबुद्धः (for चामुद्रः); (४) तथा(for तदा);,

(२) (२) (अ)य); (अ)पि (for च),

(३) (३)कृतोपधा (for दा )नं; कृतोपचारं; दृष्टावदानं; कूतावदानं; पधानं तथा (४)समाहितं; विशां पते (for महाभुज),

(४) (१)न कुप्यवेतनी; न कूटवेतनः; न कोपि वेतनः; नादत्तवेतनी (२)वेतनः,

(५) (२)दक्षिणा दक्षणा; लक्षणा); (३) सा (for च),

(६) कृष्णः (श्रीकृष्णः); श्रीभगवान् (for वासुदेवः); (१)ख-घ-तूपया, तान्(for तां); तूपायास्तु तूपयातो; उपायाथ; उपेयाय; उपेत्याथ; तूपयाय (for तूपयात्वा); (२)साल्व (for साल्व),

चतुरङ्गबलोपेता साल्वराजाभिपालिता ।। २५ ।।[१]

वर्जयित्वा श्मशानानि देवताऽऽयतनानि च ।
वल्मीकांश्चैव चैत्यांश्च तन्निविष्टमभूद्बलम् ।। २६ ।।[२]

अनीकानां विभागेन पन्थानः संस्कृतास्तथा ।
प्रतिमा नवमाश्चैव साल्वस्य शिबिरे नृप ।। २७ ।।[३]

सर्वायुधसमोपेतं सर्वशस्त्रविशारदम् ।
रथनागाश्वकलिलं पदातिध्वजसङ्कुलम् ।। २८ ।।[४]

तुष्टपुष्टबलोपेतं वीरलक्षणलक्षितम् ।
विचित्रध्वजसन्नाहं विचित्ररथकार्मुकम् ।। २९ ।।[५]

सन्निवेश्य तु कौरव्य द्वारकायां नरर्षभ ।
अभिसारयामास तदा वेगेन पतगेन्द्रवत् ।। ३० ।।[६]

तदापतन्तं सन्दृश्य बलं साल्वपतेस्तदा ।
निर्याय योधयामासुः कुमारा वृष्णिनन्दनाः ।। ३१ ।।[७]

---

(१) (४)०रक्षिता,

(२) (३)०काश्चैत्यवृक्षांश्च-ख (४) संनिविष्टम्,

(३) (१)विगाहेन); (२)बलेन (for पन्थानः); संवृताः; पतता; सम्भृताः सु (स) कृताः; संस्कृताः; प्रथिताः (for षट् कृताः)तदा (for (अ)भवन्); (३)प्रवणाय च नैवासन्-ख; प्रवणानि च नैवा ( न चैवा; च मेवा) सन्; प्रवणा इव नैवा; पणवानक वैशब्दः; प्रबला न च नैवा; प्रथि (ति; थ)मा नवमा चैव (मांश्चैव; मा श्चैव), संस्तुता नवमाश्चैव,

(४) (१)बलोपेतं); (२) शास्त्र०; (४) पत्तिध्वजसमाकुलं; प(पा)दातिजनसं,

(५) (१)हृष्ट(for तुष्ट); बलोपेतं; (३)सञ्छन्नं; (४)शरं,

(६) (१) (ए)व; तु (for च); कौन्तेय (for कौरव्य); (२)द्वारकां भरतर्षभ (३)अभिसारयत्स तदा; अभितः सारयामास; आसारया मास तदा,

(७) (१)तदापतत्तत्; पतत्तु संवीक्ष्य; सम्प्रेक्ष्य; संलक्ष्य ; (२) सौभं (for साल्व),

असहन्तोऽभियानं तच्छाल्वराजस्य कौरव ।
चारुदेष्णश्च साम्बश्च प्रद्युम्नश्च महारथः ॥ ३२ ॥[१]

ते रथैर्दंशिताः सर्वे विचित्राभरणध्वजाः ।
संसक्ताः साल्वराजस्य बहुभिर्योधपुङ्गवैः ॥ ३३ ॥[२]

गृहीत्वा कार्मुकं साम्बः साल्वस्य सचिवं रणे ।
योधयामास संहृष्टः क्षेमधूर्तिं चमूपतिम् ॥ ३४ ॥[३]

तस्य बाणमयं वर्षं जाम्बवत्याः सुतो महत् ।
मुमोच भरतश्रेष्ठ यथा वर्षं सहस्रदृक् ॥ ३५ ॥

तद्बाणवर्षं तुमुलं विषेहे स चमूपतिः ।
क्षेमधूर्तिर्महाराज हिमवानिव निश्चलः ॥ ३६ ॥[४]

ततः साम्बाय राजेन्द्र क्षेमधूर्तिरपि स्वयम् ।
मुमोच मायाविहितं शरजालं महत्तरम् ॥ ३७ ॥[५]

ततो मायामयं जालं माययैव विदार्य सः ।
साम्बः शरसहस्रेण रथमस्याभ्यवर्षत ॥ ३८ ॥[६]

ततः स विद्धः साम्बेन क्षेमधूर्तिश्चमूपतिः ।

---

(१) (१) ()भिसारं; निपातं (for भियानं); च (for तत्); (३) शाम्बश्च; (४)महारथाः
(२) (१)दंसिताः; (२)भरणायुधाः; भरणस्रजः,
(३) (१)कार्मुकं; (अ) थ धनुः(for तु धनुः); शांवः (४)क्षेमवृद्धि-इति अग्रेपि पाठान्तरमस्ति । नाममात्रे विप्रतिपत्तिः ।
(४) (१)विपुलं; तुमलं; बहुलं; (२) निषेध्य (for विषेहे); (३)धू(मू); र्तिर् (for वृद्धिद्); (४) हिमाचल इवाचलः
(५) (१)शाम्बाय; (२) क्षेमम्(धू)र्तिर; अपि स्वयं; अपि स्मयन्; स्मन्निव; इव स्मयन्(अपि स्म ह),
(६) (१)राजन् (for जालं); (२)निवार्यः विदीर्य); (३) शाम्बः (४)रथमध्येभ्य

अपायाज्जवनैरश्वैः साम्बबाणप्रपीडितः ।। ३९ ।।(१)

तस्मिन्विप्रद्रुते क्रूरे साल्वस्याथ चमूपतौ ।
वेगवान् नाम दैतेयः सुतं मेऽभ्यद्रवद्बली ।। ४० ।।(२)

अभिपन्नस्तु राजेन्द्र साम्बो वृष्णिकुलोद्वहः ।
वेगं वेगवतो राजंस्तस्थौ वीरो विधारयन् ।। ४१ ।।(३)

स वेगवति कौन्तेय साम्बो वेगवतीं गदाम् ।
चिक्षेप तरसा वीरो व्याविद्ध्यन् सत्यविक्रमः ।। ४२ ।।(४)

तया त्वभिहतो राजन्वेगवान्न्यपतद्भुवि ।
वातरुग्ण इव क्षुण्णो शीर्णमूलो वनस्पतिः ।। ४३ ।।(५)

तस्मिन् निपतिते वीरे गदारुग्णे महासुरे ।
प्रविश्य महतीं सेनां योधयामास मे सुतः ।। ४४।।(६)

चारुदेष्णेन संसक्तो विविन्ध्यो नाम दानवः ।
महारथः समाज्ञातो महाराज महाधनुः ।। ४५ ।।(७)

ततः सुतुमुलं युद्धं चारुदेष्णविविन्ध्ययोः ।
वृत्रवासवयो राजन् यथा पूर्वं तथाभवत् ।। ४६ ।।(८)

---

(१) (२)शां बेनः धूर्ति; मूर्ति (for वृद्धि); (४)शाम्बं
(२) (१)क्षेमे वीरे; शूरे (for क्रूरे); (४) मे प्राद्रवद्; अभ्यद्रवद् (मे); मे न्यपतद्,
(३) (१)द्रुतं; श्रुतं (for पत्रं ) स(for तु) (२)शाम्बो,
(४) (२)शांवो (४)भ्रामयन्; व्याविशत्; व्याविध्यन्; (द्धा) (अ)सह्यं (अ)सत्य (for सत्य),
(५) (२)न्यपतद्; निपतद् (for अपतद्); वेपमानोपतद्भूवि; (३)भग्न; भुग्न (रुग्ण) क्षुद्रो; छत्रो क्षिप्रं (for क्षुण्णो); (४)शीर्णं (for जीर्णं)
(६) (१)विनिहते(for निपतिते); (२) रुग्णे for नुत्रे),
(७) (१)चारुदेष्ण ( सुदेष्णाः सुदोष्णा) संयुक्तो; रथसमां,
(८) (३)आसीद् (for राजन्),

अन्योन्यस्याभिसङ्क्रुद्धावन्योन्यं जघ्नतुः शरैः ।
विनदन्तौ महाराज सिंहाविव महाबलौ ।। ४७ ।।[१]

रौग्मिणेयस्ततो बाणमग्र्यर्कोपमवर्चसम् ।
अभिमन्त्र्य महास्त्रेण सन्दधे शत्रुनाशनम् ।। ४८ ।।[२]

स विविन्ध्याय सक्रोधः समाहूय महारथः ।
चिक्षेप मे सुतो राजन् स गतासुरथापतत् ।। ४९ ।।[३]

विविन्ध्यं निहतं दृष्ट्वा तां च विक्षोभितां चमूम् ।
कामगेन स सौभेन साल्वः पुनरुपागमत् ।। ५० ।।[४]

ततो व्याकुलितं सर्वं द्वारकावासि तद्बलम् ।
दृष्ट्वा साल्वं महाबाहो सौभस्थं नृपते तदा ।। ५१।।[५]

ततो निर्याय कौरव्य व्यवस्थाप्य च तद्बलम् ।
आनर्तानां महाराज प्रद्युम्नो वाक्यमब्रवीत् ।। ५२ ।।[६]

ʃ

सर्वे भवन्तस्तिष्ठन्तु सर्वे पश्यन्तु मां युधि ।
निवारयन्तं सङ्ग्रामे बलात् सौभं सराजकम् ।। ५३ ।।

अहं सौभपतेः सेनामायसैर्भुजगैरिव ।

---

(१) (१)अपि(for अभि)संरब्धौ; (३)रावान्; नादान्; नादं (for राज); (४) बलोत्कटौ (for महां),
(२) (१)तदा (for ततो); (२)ख-घ-अग्र्यर्कोरगवर्चसम्, र्कोरगवर्चसं; र्कोरगसंनिभं; र्कागारवर्चसं,
(३) (१)सङ्क्रुद्धः; सक्रोधं विविन्ध्याया यतक्रोधः, विविन्ध्याय च सङ्क्रुद्धः; स विव्याथ स चुक्रोध (च क्रोधः);
(४) अवा (for अथां),
(४) (२)विक्षेपितां; (४)अवापतत् (for उपां)
(५) (४)भूपते तदा; नृपते तदा; भूपतिं तदा; पतितं तदा; पृथिवीगतः पृथिवीपतिं; सौभस्तम्भगतं सदा,
(६)(१) कौरव्य (for कौन्तेय) अवं (for व्यवं),

धनुर्भुजविनिर्मुक्तैर्नाशयाम्यद्य यादवाः ।। ५४ ।।[१]

आश्वसध्वं न भीः कार्या सौभराडद्य नश्यति ।

मयाभिपन्नो दुष्टात्मा ससौभो विनशिष्यति ।। ५५ ।।[२]

७९ ६¯ ¯ ६

एवं ब्रुवति संहृष्टे प्रद्युम्ने पाण्डुनन्दन ।

विष्ठितं तद्बलं वीर युयुधे च यथासुखम् ।। ५६ ।।[३]

अस्मिन् कैरातपर्वणि १३अध्याये ५६ श्लोकाः सन्ति

(कैरातपर्वणि तृतीयोध्यायः )

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अर्जुनाभिगमनपर्वणि सौभवधोपाख्याने त्रयोदशोऽध्यायः ।। १३ ।।

## 03- 03- 014

# १४. चतुर्दशोऽध्यायः

**कृष्णेन युधिष्ठिरं प्रति साल्वप्रद्युम्नयुद्धवर्णन् ।। १ ।।**

¯ ÷

एवमुक्त्वा रौग्मिणेयो यादवान् भरतर्षभ ।

दंशितैर्हरिभिर्युक्तं रथमास्थाय काञ्चनम् ।। १ ।।[४]

---

(१) (१)अयं (इमां); अथ; एष; एनां; अङ्ग(for अहं); (२) सायकैर् (for आयसैर्) भुजगोपमैः; (३)शरै-र्धनुर्विनिर्मुक्तैर्; धनुर्मुक्तैश्च नाराचैर्; धनुर्मुक्तैः शितै( शरै) र्भल्लैर्; निशितैश्चैव नाराचैर्; धनुर्विमुक्तै-र्नाराचैर्) (४)सायकैः(for यादवाः),

(२) (२)नङ्क्ष्यति; पश्यति; सौभराजः प्रणश्यति; सौभरावद्य संयुगे) सपदानुगःfor विनशिष्यति),

(३) (१)वदति (for ब्रुवति); (३) वेष्टितं; धिष्ठितं द्वारि (for वीर); (४)विविधं; विविधैश्र् (for युयुधे),

(४) (२) यादवर्षभः (for भर); (३)दंसितैर् (तो); दंशिभिर् (४)आरुह्य(for आस्थाय),

उच्छ्रित्य मकरं केतुं व्यात्ताननमिवान्तकम् ।
उत्पतद्भिरिवाकाशं तैर्हयैरभ्यतन् परान् ॥ २ ॥[१]

विक्षिपन्नाददानश्च धनुर्ज्यामाक्षिपन्मुहुः ।
तूणखड्गधरः शूरो बद्धगोधाङ्गुलित्रवान् ॥ ३ ॥[२]

स विद्युच्छुरितं चापं विहरन् वै तलात्तलम् ।
मोहयामास दैतेयान् सर्वान् सौभनिवासिनः ॥ ४ ॥[३]

नास्य विक्षिपतश्चापं सन्दधानस्य चासकृत् ।
अन्तरं ददृशे कश्चिन्निघ्नतः शात्रवान् रणे ॥ ५ ॥[४]

मुखस्य वर्णो न विकल्पतेऽस्य चेलुश्च गात्राणि न चापि तस्य ।
सिंहोन्नतस्याप्यभिगर्जतोऽस्य शुश्राव लोकोऽद्भुतवीर्यमग्र्यम्॥ ६ ॥[५]

जलेचरः काञ्चनयष्टिसंस्थो व्यात्ताननः शत्रुबलप्रमाथी ।
वित्रासयद्दानवराजमुख्यान् साल्वस्य सेनाप्रमुखे ध्वजाग्र्यः ॥ ७ ॥[६]

ततस्तूर्णं विनिष्पत्य प्रद्युम्नः शत्रुकर्षणः ।

---

(१) (१)उद्धृत्य; उच्छिद्य; (२)इवान्तकं (for अलङ्कृतम्); (३)आकाशे (४) अन्वगात्; अन्वयात् -ख,

(२) (१)विनदन्नम्यद्; इदमन्नाम्य विनदन्नाम्य; आददानश्च (निनदन्नादं) ) (२) धनुः श्रेष्ठं महाबलः -ख, रथं;बलै; रथं (for बलः)(३)खड्गतूणं ; तूणीखड्ग,

(३) (१)क-ख-च्चलितं, च्चरितं; च्छुरितं (२)विचरन्वै; विकिरन्वै बलान्तरं ( रे); करात्करं,

(४) (१)तत तस्य; अस्य (for नास्य) (२) पञ्चधा नवधासकृत्) (३)अन्तरं; नोत्तरं; नान्तरं,

(५) (१)विचाल्यते; विका(क) ल्यते; विलुप्यते; विकम्पते विलिप्यते); च; स्म (for ऽस्य); (२) वेषुश्च) (३)ख-घ-रूप, गर्जनं चः गर्जितस्य; न्राजति वाहमुख्य-घ गर्जितं च सिंहोन्नतासंस्य हि गर्जितस्य; सिंहोन्नतं गर्जितमस्य लोकः-ङ (४) क-सिंहोन्नतं चा; ख-सिंहस्य नादमभि, लोकेद्भुत;लोका; चात्यद्भुत (for लोकोद्भुत) वीर्यम् शब्दम् (for रूपम्) उग्रं (for अग्र्यम्),

(६) (१)संश्रितो; संस्थितो (for संस्थो); (२)सर्वरिपु; सर्वतिमि-खं) (३)व्य त्रासयद् (वित्रासयद्; व्यद्रावयद्); दानवराजमुख्यान् ) (४)ध्वजोस्य; तथाग्र्यः; तदाग्र्य,

साल्वमेवाभिदुद्राव निवार्यारिबलं रुषा ॥ ८ ॥[१]

अभियानं तु वीरेण प्रद्युम्नेन महारणे ।
नामर्षयत सङ्क्रुद्धः साल्वः कुरुकुलोद्वह ॥ ९ ॥[२]

स रोषमदसमत्तो कामगादवरुह्य च ।
प्रद्युम्नं योधयामास साल्वः परपुरञ्जयः ॥ १० ॥[३]

तयोः सुतुमुलं युद्धं साल्ववृष्णिप्रवीरयोः ।
समेता ददृशुर्लोका बलिवासवयोरिव ॥ ११ ॥[४]

तस्य मायामयो वीर रथो हेमपरिष्कृतः ।
सपताकः सध्वजश्च सानुकर्षः स तूणवान् ॥ १२ ॥[५]

स तं रथवरं श्रीमान्समारुह्य किल प्रभो ।
मुमोच बाणान्कौरव्य प्रद्युम्नाय महाबलः ॥ १३ ॥

ततो बाणमयं वर्षं व्यसृजत्तरसा रणे ।
प्रद्युम्नो भुजवेगेन साल्वं सम्मोहयन्निव ॥ १४ ॥[६]

स तैरभिहतः सङ्ख्ये नामर्षयत सौभराट् ।
शरान्दीप्ताग्निसङ्काशान्मुमोच तनये मम ॥ १५ ॥[७]

---

(१) (२) कर्षणः; सूदनः (४)विधित्सुः; विधाय हत्या) ०रिबलं कलहं नृप, रुषा-ख
(२) (१)यातम् (for यानं); प्र(तु); (२)रणे; मृधे (for हवे); (३)क-ख-नामर्षयत् - सौभपतिस्तदा; घ-नमर्षयत् - सौभपतिस्तदा, नामर्षत सुसंरब्धः; यत्सु यत्स)सङ्क्रुद्धः) (४)साल्वः सौभपतिस्तदा (था),
(३) (१)संमत्तः (for मत्तो वै) (२)वै; ह; सः(for च),
(४) (१)ततः (for तयोः) सतुमुलं; सुनुमलं (४)वृत्रं; बलं
(५) (३)सपताकः सध्वजश्च) (४)च तूण प्रतापं; सतूणिं,
(६) (२)विसृजत्; विसृजन्; (४) हर्षं (for मोहं),
(७) परिवृतःअभिहतः) सङ्ख्ये ( हे) णं) नामर्षत स सौभं) शरान्दीप्तान्प्राक्षि पत्स( )

तानापतत बाणौघान्स चिच्छेद महाबलः ।
ततश्चान्याब्दारान्दीप्तान्प्रचिक्षेप सुते मम ।[1]

अथवा

तमापतन्तं बाणौघं स चिच्छेद महाबलः ।
ततश्चान्याञ्छरान्दीप्तान्प्रचिक्षेप सुते मम।[2]

स साल्वबाणै राजेन्द्र विद्धो रुग्मिणिनन्दनः ।
मुमोच बाणं त्वरितो मर्मभेदिनमाहवे ॥ १६ ॥[३]

तस्य मर्म विभिद्याशु स बाणो मत्सुतेरितः ।
विवेश हृदयं पुत्री स मुमोह पपात च ॥ १७ ॥[४]

तस्मिन्निपतिते वीरे साल्वराजे विचेतसि ।
सम्प्राद्रवन्दानवेन्द्रा दारयन्तो वसुन्धराम् ॥ १८ ॥[५]

हाहाकृतमभूत्सैन्यं साल्वस्य पृथिवीपते ।
नष्टसञ्ज्ञे निपतिते तदा सौभपतौ नृपे ॥ १९ ॥[६]

तत उत्थाय कौरव्य प्रतिलभ्य स चेतनाम् ।
मुमोच बाणं सहसा प्रद्युम्नाय महाबलः ॥ २० ॥[७]

---

(१) तानापतन्तो तान्बाणौघानापततः; स चिच्छेद) पुनः(for ततः) च प्राक्षिपत्स (for प्रचिक्षेप) प्राक्षिपत्तनये मम),आपततेति विसर्ग लोप आर्षः
(२) (३)बाणान्त्वरितो; बाणाभिहतो,
(३) (१)मर्म विभेद्याशु; (३) विव्याध;-ख (४) मुमोच ह; भृशा(शं)हतः (for मुमोह च) पपात मुमोह,
(४) (१)अस्मिन् (तं) वीर(for वीरे); दानवेन्द्रा दारयन्तो,
(५) (१)हाहाभूतम् महत् (for अभूत्); (२)च महीपतेः (ते) (for पृथिवीं) (४)नृपे,
(६) (१)राजेन्द्र (for कौरव्य); (३)बाणान्; सहं(for तरं),
(७) (१)तैः स (for तेन) तेन बाणेन महता (for तेनातिविद्धो बलवान्); (३)विद्धो (for वीरो); (४) भृशं (for तदा); अवसादं गतस्तदा; व्यथितो ददृशे तदा,

तेन बाणेन महता प्रद्युम्नः समरे स्थितः ।
जत्रुदेशे भृशं विद्धो व्यवासीदद्रथे तदा ।। २१ ।।[१]

तं स विद्धवा महाराज साल्वो रुग्मिणिनन्दनम् ।
ननाद सिंहनादं वै नादेनापूरयन् महीम् ।। २२ ।।

ततो मोहं समापन्ने तनये मम भारत ।
मुमोच बाणांस्त्वरितः पुनरन्यान्दुरात्मवान् ।। २३ ।।[२]

स तैरभिहतो बाणैर्बहुभिस्तेन मोहितः ।
निश्चेष्टः कौरवश्रेष्ठ प्रद्युम्नोऽभूद्रणाजिरे ।। २४ ।।

**अस्मिन् कैरातपर्वणि १४अध्याये २४श्लोकाः सन्ति**

(कैरातपर्वणि चतुर्थोध्यायः)

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अर्जुनाभिगमनपर्वणि सौभवधोपाख्याने सप्तदशोऽध्यायः ।। १४ ।।

## महाभारततात्पर्यनिर्णये २२ अध्याये

कृत्वा सुयुद्धममुना मम पुत्रकोऽसावस्त्राणि तस्य विनिवार्य महास्त्रजालैः ।
दत्तं मया शरममोघमथाऽददे तं हन्तुं नृपं कृतमतिस्त्वशृणोद् वचः खे ।।४१ ।।
नारायणेन हि पुरा मनसाऽभिक्लृप्तं कृष्णावतारमुपगम्य निहन्मि साल्वम् ।
इत्येव तेन हरिणाऽपि स भार्गवेण विद्रावितो न निहतः स्वमनोनुसारात् ।।४२।।
वध्यस्त्वया न हि ततोऽयमयं च बाणश्चक्रायुधस्य दयितो नितराममोघः ।

(१) (१)तैः स विद्धो महाबाहुः-ख, स तं विद्धवा; तं विद्धो स; तं तु (for नु) विष्द्वा; तं विद्धवा स; स च विध्य ; तु राजेन्द्र (for महां) (३) नादेन; नादं च; (४)ख-मुमोह समरे तदा, आनादयन् (for आपूरयन्) दिशः (for महीम्),
(२) (२) दुरासदान्- घ ।

मा मुञ्च तेन तमिमं विनिवर्तयेऽहं साल्वं हृदि स्थित इतीरितमीरणेन ।।४३ ।।
श्रुत्वा वचः स पवनस्य शरं त्वमोघं सञ्जह्न आशु स च साल्वपतिः स्वसौभम् ।
आरुह्य बालकलहेन किमत्र कार्यं कृष्णेन सङ्गर इति प्रययौ स्वदेशम् ।। ४४ ।।

महाभारते- वनपर्वणि १५ अध्यायः

# 03- 03- 015

## १५. पञ्चदशोऽध्यायः

प्रद्युम्ने साल्वबाणाभिहत्या मूर्च्छिते सारथिना रणाङ्गणादन्यतो रथयापनम् ।। १ ।। ततः प्रतिबुद्धेन सारथिं प्रति सविषादोक्तिः ।। २ ।। प्राद्युम्नपराजितस्य साल्वस्य रणादपयानम् ।। ३ ।।

**वासुदेवः**

साल्वबाणार्दिते तस्मिन् प्रद्युम्ने बलिनां वरे ।
वृष्णयो भग्नसङ्कल्पा विव्यथुः पृतनागताः ।। १ ।।(१)

हाहाकृतमभूत्सर्वं वृष्ण्यन्धकबलं ततः ।
प्रद्युम्ने पतिते राजन्परे च मुदिता भृशम् ।। २ ।।(२)

तं तथा मोहितं दृष्ट्वा सारथिर्जवनैर्हयैः ।
रणादपाहरत्तूर्णं शिक्षितो दारुकिः तदा ।। ३ ।।(३)

नातिदूरापयाते तु रथे रथवरप्रणुत् ।

---

(१) भगवान् (for वासुदेव) बाणार्पिते; चिते सतिवल्लभे (for बलिनां वरे) वुष्णय विव्ययु सुखे (गता),
(२) पराङ्मुखम् (for हाहाकुतम्) सैन्यं (for सवं) मयं (बलं) ततः (२ तदा) मोहिते (for पतिते) प्रधुत्रो मोहितो राजन् ते; भुशं (for (अ)भवन्) साल्वः प्रमुदितोभवत्,
(३) शीघ्रं(for तूर्णं) तदा; तया (ततः)

धनुर्गृहीत्वा यन्तारं लब्धसञ्ज्ञोऽब्रवीदिदम् ।। ४ ।।

**प्रद्युम्नः**

सौते किं ते व्यवसितं कस्माद्यासि पराङ्मुखः ।
नैष वृष्णिप्रवीराणामाहवे धर्म उच्यते ।। ५ ।।

कच्चित्सौते न ते मोहः साल्वं दृष्ट्वा महाहवे ।
विषादो वा रणं दृष्ट्वा ब्रूहि मे त्वं यथातथम् ।। ६ ।।

**सूतः**

जानार्दने न मे मोहो नापि मां भयमाविशत् ।
अतिभारं तु ते मन्ये साल्वं केशवनन्दन ।। ७ ।।[१]

सोऽपयामि शनैर्वीर बलवानेष पापकृत् ।
मोहितश्च रणे शूरो रक्ष्यः सारथिना रथी ।। ८ ।।[२]

आयुष्मंस्त्वं मया नित्यं रक्षितव्यस्त्वयाप्यहम् ।
रक्षितव्यो रणे नित्यमिति कृत्वापयाम्यहम् ।। ९ ।।[३]

एकश्चासि महाबाहो बहवश्चापि दानवाः ।
न समं रौक्मिणेयाहं रणे मत्वापयामि वै ।। १० ।।[४]

**वासुदेवः**

एवं ब्रुवति सूते तु तदा मकरकेतुमान् ।

---

(१) सौतिः , मां; वा; मा(for मे) अहं (for तु ते); अभीभवन्तं वै मन्ये,
(२) सोपयाति; यासि; सोभियाति; शरैर् (for शनैर्); वीरो (for शुरो) रथे (for रथी),
(३) हि (for त्वं) रक्ष्यो (for नित्यं) हि (for (अ)पि); रणे; मया (for रथी-ख,(४) ज्ञात्वा,कृत्वा
(४) (अ)त्र; (अ)स्य (for (अ)पि) शत्रवः (for दानवाः; रौक्मिणेयस्य; येदं रणे ति; त्यक्त्वाः हित्वा; कृत्वा (for मत्वा); वै (for (अ)हम्),

उवाच सूतं कौरव्य निवर्तय रथं पुनः ।। ११ ।।(१)

दारुकात्मज मैवं त्वं पुनः कार्षीः कथञ्चन ।
व्यपयानं रणात्सौते जीवतो मम कर्हिचित् ।। १२ ।।

न स वृष्णिकुले जातो यो वै त्यजति सङ्गरम् ।
यो वा निपतितं हन्ति तवास्मीति च वादिनम् ।। १३ ।।(२)

तथा स्त्रियं च यो हन्ति बालान् वृद्धान् तथैव च ।
विरथं विप्रकीर्णं च भग्नशस्त्रायुधं तथा ।। १४ ।।(३)

त्वं च सूतकुले जातो विदितः सूतकर्मणि ।
धर्मज्ञश्चासि वृष्णीनामाहवेष्वपि दारुके ।। १५ ।।(४)

वर्णनं चरितं कृत्स्नं वृष्णीनां पृतनामुखे ।
अपयानं पुनः सौते मैवं कार्षीः कथञ्चन ।। १६ ।।(५)

अपयातं हतं पृष्ठे भ्रान्तं रणपलायितम् ।
गदाग्रजो दुराधर्षः किं मां वक्ष्यति माधवः ।। १७ ।।(६)

केशवस्याग्रजो वापि नीलवासा मदोत्कटः ।

---

(१) (१)स; (ऽ)पि; वै (तु ); (२)स्मयन् (for तदा) केतनः; (३)सौतिं (for सूतं) (४) संनिवर्त्य (for निवर्तय) प्रति पुनः

(२) (१)नासौ; कः स (for न स) (२)सङ्करं; संयुगं (for सङ्गरम् ); (३)यश्च(for यो वा) (अ)पि (for नि)

(३) (१)च; वा(for वै); यो वा स्त्रियं; (२)बालं वृद्ध -ख (३)मुक्तकेशं (for विप्रं)

(४) (२)विदितःfor विनीतः-ख ); (३)(अ)पि(for (अ)सि),

(५) (१)स जानंश्चरितं-ख; विजानन् (for स जानन्); रणात् (for पुनः); सौते कार्षीः,

(६) (१)अपयान्तं; (२)भीरुं; भ्रान्तं; भीक्ष्णं (for भीतं); पलायितं; पराङ्मुखं; (४) मा (for मां)

किं वक्ष्यति महाबाहुर्बलदेवः समागतः ।। १८ ।।

किं वक्ष्यति शिनेर्नप्ता रणसिंहो महारथः ।
अपयातं रणात्सूत साम्बश्च समितिञ्जयः ।। १९ ।।(१)

चारुदेष्णश्च दुर्धर्षस्तथैव गदसारणौ ।
अक्रूर च महाबाहुः किं मां वक्ष्यति सारथे ।। २० ।।(२)

शूरं सम्भावितं शान्तं नित्यं पुरुषमानिनम् ।
स्त्रियश्च वृष्णिवीराणां किं मां वक्ष्यन्ति सङ्गताः ।। २१ ।।(३)

प्रद्युम्नोऽयमपायाति भीतस्त्यक्त्वा रणाजिरम् ।
धिगेनमिति वक्ष्यन्ति न तु वक्ष्यन्ति साध्विति ।। २२ ।।(४)

धिग्वाचः परिहासोऽपि मम वा मद्विधस्य वा ।
मृत्युतोभ्यधिकः सौते तस्मान्मा व्यपयाः पुनः ।। २३ ।।(५)

भारं हि मयि सन्न्यस्य यातो मधुनिहा हरिः ।
यज्ञं भारतसिंहस्य पार्थस्यामिततेजसः ।। २४ ।।(६)

---

(१) (२)रणं (for नरं); मदोत्करः महाबलः; हनु; for धनुः-घ); (३)सूत; तत्र (for सौते); (४)साम्बश्व,

(२) (४)नो; वाः मा (for मां),

(३) (१)शूर सम्भाविनं शान्तं; नित्यं (for सन्तं); (२) क-न्त्यं सन्तः; ख-नित्यं सुतं, सन्तः तथा (for नित्यं); (४) मा; वा (for मां); संह( हि) ताः (for सङ्गता ); किं वक्ष्यन्ति समागताः,

(४) (१)इहां; अपां (for उपा); (२) महाहवम्-ख ); (३) धिग्धिग्भयादपानीतो; (४)साधु; यदि (for न तु); साध्विति मां प्रति (for सर्वतः; वादिनः); (for वक्ष्यन्ति साध्विति),

(५) (१)धिग्वचः (ग्वचः क्तथा); ऽयं (ऽपि ) (३)मृत्युतों (for नां ) (४)मा; स मा(त्वं); मैवं त्वं; मां त्वं; तस्मान्मा (for स त्वं मा); अपयाः(for व्य० )

(६) (१)वि (for सं); भारत; (४)न हि शक्योऽद्य मर्षितुम्-घ । न तु शक्योद्य सीदितुं; न स शक्ष्येद्य सीदितुं; न हि शक्ये (क्ष्ये); त्यमर्षितुम्; स न शक्येद्य मर्षितम्; न स रक्षेद्य जीवितं; स न शक्षेच्च सीदितुं; राजसूयं महाक्रतुं,

कृतवर्मा मया वीरो निर्यास्यन्नेव वारितः ।
साल्वं निवारयिष्येऽहं तिष्ठ त्वमिति सूतज ।। २५।।[१]

स च सम्भावयन्मां वै निवृत्तो हृदिकात्मजः ।
तं समेत्य रणं त्यक्त्वा किं वक्ष्यामि महारथम् ।। २६ ।।[२]

उपयान्तं दुराधर्षं शङ्खचक्रगदाधरम् ।
पुरुषं पुण्डरीकाक्षं किं वक्ष्यामि महाभुजम् ।। २७ ।।[३]

सात्यकिं बलदेवं च ये चान्येऽन्धकवृष्णयः ।
मया स्पर्धन्ति सततं किं नु वक्ष्यामि तानहम् ।। २८ ।।[४]

त्यक्त्वा रणमिमं सौते पृष्ठतोऽभ्याहतः शरैः ।
त्वयापनीतो विवशो न जीवेयं कथञ्चन ।। २९ ।।[५]

संनिवर्त रथेनाशु पुनर्दारुकनन्दन ।
न चैतदेवं कर्तव्यमथापत्सु कथञ्चन ।। ३० ।।[६]

न जीवितमहं सौते बहु मन्ये कथञ्चन ।
अपयातो रणाद्भीतः पृष्ठतोऽभ्याहतः शरैः ।। ३१ ।।[७]

कदा मां सूतपुत्र त्वं जानीषे वा भयार्दितम् ।

---

(१) महा (for मया ) निर्यास्यन्ति निवारितः
(२) (१)स च सम्भाव्य मामेव (वं)
(३) (१)उपयान्तं; उपागतं
(४) (२)तत्र; कुरु (न्धक); (३) स्पर्धते ये मया नित्यं,
(५) (१)मुखं; महं; मिदं (for मिमं) (२) (ऽ)प्याहतः (ऽ)भिहतः; भ्यागतः परैः (for शरैः ) (४)न जीवेहं,
(६) (१)संनिवर्त वृत्त; वर्त्य); निवर्तैक); (४)ममा पत्सु; अप्यापत्सु; आपत्सु च (for अथापत्सु),
(७) (२)मंस्ये कथञ्चन; (४) ऽ प्याहतः; च हतः परैः (for शरैः),

अपयातं रणं हित्वा यथा कापुरुषं तथा ॥ ३२ ॥[१]

अयुक्तं भवता त्यक्तुं सङ्ग्रामं दारुकात्मज ।
मयि युद्धार्थिनि भृशं स त्वं याहि रणाजिरम् ॥ ३३ ॥[२]

– ÷

एवमुक्तस्तु कौन्तेय सूतपुत्रस्ततो मृधे ।
प्रद्युम्नमब्रवीत् श्लक्ष्णं मधुरं वाक्यमञ्जसा ॥ ३४ ॥[३]

**सौतिः**

न मे भयं रौग्मिणेय सङ्ग्रामे यच्छतो हयान् ।
युद्धज्ञोऽस्मि च वृष्णीनां नात्र किञ्चिदतोऽन्यथा ॥३५ ॥

आयुष्मन्नुपदेशस्तु सारथ्ये वर्तताां स्मृतः ।
सर्वार्थेषु रथी रक्ष्यस्त्वं चापि भृशपीडितः ॥ ३६ ॥[४]

त्वं हि साल्वप्रयुक्तेन शरेणाभिहतो भृशम् ।
कश्मलाभिहतो वीर ततोऽहमपयातवान् ॥ ३७ ॥[५]

स त्वं सात्वतमुख्याद्य लब्धसञ्ज्ञो यदृच्छया ।
पश्य मे हयसंयाने शिक्षां केशवनन्दन ॥ ३८ ॥

दारुकेणाहमुत्पन्नो यथावच्चैव शिक्षितः ।

---

(१) (१) च (अ)पि; (त्वं)(for वा); (२) वा; मा (for मां) (४) कापुरुषस्,

(२) (१)न च युक्तं भवेत्त्यक्तं; अयुक्तं कृतवान्यस्त्वं; न च युक्तं तव त्यक्तुं; अयुक्तं तु भवेत्त्य; अयुक्तं तु मया त्यं (३)सति (for भृशं) (४) यतो रणः; रणाजिरं; ततो रणं ,

(३) श्रीकृष्णः ; (२)तथा मृधे;) ततोब्रवीत्; प्रद्युम्नं बलिनां श्रेष्ठं; श्लक्ष्णम् (for वाक्यम्),

(४) (१)उपदेशास्तु; (२)शिक्षता; शिक्षितः(for वर्ततां) श्रुतः; मतः; श्रुताः(for स्मृतः )

(५) (१)च (for हि); शरेण (for पत्रिणा); भृशमाहतः(for (अ)भिहतो भृशम्); (४)उपयातवान्,

वीतभीः प्रविशाम्येतां साल्वस्य प्रथितां चमूम् ।। ३९ ।।[१]

– ÷

एवमुक्त्वा ततो वीरो हयान्सञ्चोद्य सङ्गरे ।
रश्मिभिस्तु समुद्यम्य जवेनाभ्यपतत्तदा ।। ४० ।।[२]

मण्डलानि विचित्राणि यमकानीतराणि च ।
सव्यानि च विचित्राणि दक्षिणानि च सर्वशः ।। ४१ ।।

प्रतोदेनाहता राजन्रश्मिभिश्च समुद्यताः ।
उत्पतन्त इवाकाशं विबिभुस्ते हयोत्तमाः ।। ४२ ।।[३]

ते हस्तलाघवोपेतं विज्ञाय नृप दारुकिम् ।
दह्यमाना इव तदा पस्पृशुश्चरणैर्महीम् ।। ४३ ।।[४]

सोऽपसव्यां चमूं तस्य साल्वस्य भरतर्षभ ।
चकार नातियत्नेन तदद्भुतमिवाभवत् ।। ४४ ।।[५]

अमृष्यमाणोऽपसव्यं प्रद्युम्नेन च सौभराट् ।
यन्तारमस्य सहसा त्रिभिर्बाणैः समार्दयत् ।। ४५ ।।[६]

दारुकस्य सुतस्तत्र बाणवेगमचिन्तयन् ।

---

(१) (१)दारुकाच्चाहम् (च्चेवम्; द्योहम्) उत्पन्नो; दारुकेण समुत्पन्नो; (३)प्रतियास्ये तां; प्रविशाम्येना; (४) प्रथितां चमूं,

(२) वासुदेव (श्रीकृष्ण) (१)वीरो (२)संयुज्य; नोद्य; प्र योज्य; नह्य संयुगे (३)तु (for च),

(३) (१)हता (for (आ)हता);(३) आकाशे; (४)व्यचरंस्ते; विविशुस्ते; प्रवर्षस्ते,

(४) (१)हया(for हस्त); (३)ऊ( उ)ह्यं (for दहां); (४)नास्पृशन्; (अ)पस्पृशन् (अ)पस्पृश्य,

(५) (१)सोपसव्यं तत्र; कृत्वा; तां च (for तस्य); (२)पुरुषर्षभ; समितिञ्जयः,

(६) (४)प्रद्युम्नस्य च (for स); साल्वः समितिदारुणः-ख; (४)समर्द-ख; समार्द; अमर्ष; अमर्द समर्प-घ।

भूय एव महाबाहो प्रययावपसव्यतः ॥ ४६ ॥[(१)]

ततो बाणान् बहुतरान् पुनरेव स सौभराट् ।
मुमोच तनये वीर मम रुग्मिणिनन्दने ॥ ४७ ॥[(२)]

तानप्राप्ताञ्छितैर्बाणैश्चिच्छेद परवीरहा ।
रौग्मिणेयः स्मितं कृत्वा दर्शयन् हस्तलाघवम् ॥ ४८ ॥[(३)]

भग्नान् दृष्ट्वा तु तान्बाणान्प्रद्युम्नेन च सौभराट् ।
आसुरीं दारुणीं मायामास्थाय व्यसृजच्छरान् ॥ ४९ ॥[(४)]

तां प्रयुक्तां समाज्ञाय दैतेयास्त्रं महाबलम् ।
ब्रह्मास्त्रेणान्तरा च्छित्त्वा मुमोचान्यान् पतत्रिणः ॥ ५० ॥[(५)]

तस्य चास्त्रं विधूयाथ विव्यध रुधिराशनान् ।
शिरस्युरसि वक्त्रे च स मुमोह पपात च ॥ ५१ ॥[(६)]

तस्मिन्निपतिते क्षुद्रे साल्वे बाणप्रपीडिते ।
रौग्मिणेयो परं बाणं सन्दधे शत्रुतापनः ॥ ५२ ॥[(७)]

---

(१) (१)तत्र (for तं तु); (२) पातम्; घातम् (for वेगम्); (३)महाबाहुः; (४)स (for प्र) अपस॰ यतः; हयसंयुतः; हरिसत्तमः; हयमार्गतः,

(२) (१)बहुविधान् -ख; बहन् राजन्; (२)भूय एव (for पुनरेव); (३)वीर; वरो,

(३) (४)अस्त्रं; पाणिं (हस्तं)

(४) (१)दृष्ट्वा छिन्नान् भिन्नान्दृष्ट्वा; भग्नान्दष्ट्वा ततो; (अ)न्द्धुनान् (for तु तान्); बाणान्वै (for तान्वाणान्) (२)च (for स); (३) दारु णां; दानवीं); (४) (अ)वासृजं,

(५) (१)प्रयुज्यमानां- ख । तं स्तुत्वा; तं (स) ज्ञात्वा (for आज्ञाय) तत्प्रयुज्यन्तमाज्ञायः तां प्रयुक्तां (सम्प्रयुक्तं; तत्प्रयुक्तं) समाज्ञाय) (२) हवे; बलं (for बलः),

(६) (१)ततो हस्ताद्विनिःक्षिप्ता; तस्य चास्त्रं (ते तदस्त्रं); विधूयाथ (२)विधिवद्; विव्याथ; विव्याध; विविशू (for विव्यधू) रुधिराशनैः; शे नान्; नं

(७) (३)परं (for (अ)परं); (४)शत्रुतापनं-ख;शान्तन,

तमर्चितं सर्वदशार्हपूगैराशीविषाग्निज्वलनप्रकाशम् ।
दृष्ट्वा शरं ज्यामभिनीयमानं बभूव हाहाकृतमन्तरिक्षम्।। ५३ ।।[१]

ततो देवगणाः सर्वे सेन्द्राः सहधनेश्वराः ।
नारदं प्रेषयामासुः श्वसनं च मनोजवम्।[२]
तौ रौग्मिणेयमागम्य वचोऽब्रूतां दिवौकसाम् ।। ५४ ।।

– ÷ –

नैष वध्यस्त्वया वीर साल्वराजः कथञ्चन।[३]
संहरस्व पुनर्बाणमवध्योऽयं त्वया रणे ।। ५५ ।।[४]
एतस्य च शरस्याजौ नावध्योऽस्ति पुमान्कचित् ।। ५६ ।।
मृत्युरस्य महाबाहो रणे देवकिनन्दनः ।
कृष्णः सङ्कल्पितो धात्रा तन्मिथ्या न भवेदिति ।। ५७ ।।[५]

७९ ६– – ६

ततः परमसंहृष्टः प्रद्युम्नः शरमुत्तमम् ।
सञ्जहार धनुःश्रेष्ठात्तूणे चैव न्यवेशयत् ।। ५८ ।।[६]

तत उत्थाय राजेन्द्र साल्वः परमदुर्मनाः ।
व्यपायात्सबलस्तूर्णं प्रद्युम्नशरपीडितः ।। ५९।।

---

(१) (१)दशार्हमुख्यैर् (for पूगैर्); (२)आशीविषाग्नि (र्क) ज्वलन ज्वलित)प्रकाशं आशीर्भिरग्नि( श्मि )ज्वलित (ज्वलन) प्र; आशीर्भिराजन्ननलप्र०,
(२) (२)सहमहेश्वराः; समुवने; सष्ठदिगीं सपतगें; (४)मनोजवं(for महां)
(३) (१)आगत्य; आसाद्य,
(४) (१)महावाणं (२)रणे त्वया
(५) (४)तन्मिथ्या न; न तन्मिथ्या; भविष्यति,
(६) (४)तूर्णे; तूणौ; चैवं; चैनं,

स द्वारकां परित्यज्य क्रूरो वृष्णिभिरार्दितः ।
सौभमास्थाय राजेन्द्र दिवमाचक्रमे तदा ।। ६० ।।

अस्मिन् कैरातपर्वणि १५अध्याये ६०श्लोकाः सन्ति

(कैरातपर्वणि पञ्चमोध्यायः)

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अर्जुनाभिगमनपर्वणि सौभवधोपाख्याने पञ्चदशोऽध्यायः ।। १५ ।।

## महाभारततात्पर्यनिर्णये २२ अध्याये

प्रद्युम्नसाम्बगदसारणचारुदेष्णाः सेनां निहत्य सह मन्त्रिगणैस्तदीयाम् ।
आह्लादिनः स्वपुरमाययुरप्यहं च तत्रागमं सपदि तैः श्रुतवानशेषम् ।। ४५ ।।

महाभारते- वनपर्वणि १६ अध्यायः

## 03- 03- 016

## १६. षोडशोऽध्यायः

कृष्णेन युधिष्ठिरं प्रति स्वस्य साल्वेन सह युद्धप्रकारकथनम् ।।

– ÷

आनर्तनगरं मुक्तं ततोऽहमगमं तदा ।
महाक्रतौ राजसूये निवृत्ते नृपते तव ।। १ ।।(१)

अपश्यं द्वारकां चाहं महाराज हतत्विषम् ।
निःस्वाध्यायवषट्कारां निर्भूषणवरस्त्रियम् ।। २ ।।(२)

---

(१) (१)श्रीकृष्ण; श्रीभगवान् (for वासुदेवः); (१) रम्यं (for मुक्तं) नगरीं मुक्तां (for मुकवा; मुख्यां) (४)निर्वृत्ते ; भरतर्षभ (for नृपते तव),
(२) (१)चैनां; चैव; चापि (for चाहं); (२) दूरादेव (for महां); (४)निर्भूषणमिव स्त्रियं; निर्भूषामिव

अनभिज्ञेयरूपाणि द्वारकोपवनानि च ।
दृष्ट्वा शङ्कोपपन्नोऽहमपृच्छं हृदिकात्मजम् ।। ३ ।।(१)

अस्वस्थनरनारीकमिदं वृष्णिकुलं भृशम् ।
किमिदं नरशार्दूल श्रोतुमिच्छामि तत्त्वतः ।। ४ ।।(२)

एवमुक्तः स तु मया विस्तरेणेदमब्रवीत् ।
रोधं मोक्षं च साल्वेन हार्दिक्यो राजसत्तम ।। ५ ।।(३)

ततोऽहं भरतश्रेष्ठ श्रुत्वा सर्वमशेषतः ।
विनाशे साल्वराजस्य तदैवाकरवं मतिम् ।। ६ ।।(४)

ततोऽहं भरतश्रेष्ठ समाश्वास्य पुरे जनम् ।
राजानमाहुकं चैव तथैव आनकदुन्दुभिम् ।। ७ ।।(५)

सर्वान्वृष्णिप्रवीरांश्च हर्षयन्नब्रुवं तदा ।
अप्रमादः सदा कार्यो नगरे यादवर्षभाः ।। ८ ।।(६)

साल्वराजविनाशाय प्रयातं मां निबोधत ।
नाहत्वा तं निवर्तिष्ये पुरीं द्वारवतीं प्रति ।। ९ ।।(७)

---

योषितं,
(१) (३)दृष्ट्वाहं शङ्कमानो वै; (४)अपश्यं; पप्रच्छ; ह्यपृच्छं,
(२) (२)कुलं (for पुरं) वरं; (महत् (for भृशम्); (४)इच्छामि तेनघ; मि तत्वतः; मि ते चचः (for इच्छामहे वयम्),
(३) (१)तु (स) (४)वृष्णिसत्तमः (for राजं),
(४) (१)भरतश्रेष्ठ; (२)श्रुत्वाप्रियमनुत्तमं; श्रुत्वा सुमहदप्रियं; (३)सालराजविनाशाय,
(५) (३)सर्वान् (for सर्व) तान् (for च); इदमब्रुवं (for अब्रुवं तदा),
(६) (४)प्रायान्तं मां; (अ)भियातोस्मि,
(७) (१)वि (for तं); तं हत्वा विनि वर्तिष्ये); (३) त्रि ( त्रिः)सामा ताड्यताम्,
त्रिः समाहन्य ताम्; त्रिः समाः (मे); ताड्यताम्; त्रिः सामाहन्यताम्; भृशमावाद्यताम् त्रिःसामा ( त्रिस्वरा नीचमन्द्रतारभावेन); एष प्रशाम्य तान्यतामेषां) दुन्दुभी भीषणा; भीषणा,

ससाल्वं सौभनगरं हत्वा द्रष्टास्मि वः पुनः ।
त्रिः समाहन्यतामेषा दुन्दुभिः शत्रुभीषणा ।। १० ।।

ते मयाऽऽश्वासिता वीरा यथावद्भरतर्षभ ।
सर्वे मामब्रुवन्हृष्टाः प्रयाहि जहि शात्रवान् ।। ११ ।।(१)

तैः प्रहृष्टात्मभिर्वीरैराशीर्भिरभिनन्दितः ।
वाचयित्वा द्विजश्रेष्ठान्प्रणम्य शिरसा भवम् ।। १२ ।।(२)

शैब्यसुग्रीवयुक्तेन रथेनानादयन्दिशः ।
प्रध्माप्य शङ्खप्रवरं पाञ्चजन्यम् अहं नृप ।। १३ ।।(३)

प्रयातोऽस्मि नरव्याघ्र बलेन महता वृतः ।
क्लृप्तेन चतुरङ्गेण यत्तेन जितकाशिना ।। १४ ।।

समतीत्य बहून्देशान्गिरींश्च बहुपादपान् ।
सरांसि सरितश्चैव मार्तिकावतम् आसदम् ।। १५ ।।(४)

दृष्टवानस्मि राजेन्द्र साल्वराजमथान्तिके।
तत्राश्रौषं नरव्याघ्र साल्वं सागरमन्तिकात् ।
प्रयान्तं सौभमास्थाय तमहं पृष्ठतोऽन्वयाम् ।। १६ ।।(५)

This Stanga is Interchenged in TRK after 18.

ततः सागरमासाद्य कुक्षौ तस्य महोर्मिणः ।

---

(१) (१)प्रकृष्टा; (४)त्वहं; भवं; च तान्; तथा (for (अ)हुकं),

(२) (१)शैब्यं (सैब्यं) (२)अनन्दं; आ च्छादं उन्नादं; (३)प्रगृह्यः प्रध्माय (४)च भारत; भयावहं (for अहं नृप),

(३) (१) ख-घ-सैन्य, नरश्रेष्ठ; महाराज (for नरं) (३)दृप्तेन; युक्तेन (४)यत्नेन; यत्तेन,

(४) (२)सागरम् (for नगरम्) अन्तिके; (३)प्रयान्तं ; (४) ()न्वगां; ()न्वियां,

(५) (२)चलों (for महो ),

समुद्रनाभ्यां साल्वोऽभूत्सौभम् आस्थाय शत्रुहन् ।। १७ ।।

स समालोक्य सहसा सेनां स्वां प्राहिणोद्युधि ।। १८ ।।(1)(२)

मद्बाहुना च सेनायां शिष्टायां किञ्चिदेव च ।
स समालोक्य दूरान्मां स्मयन्निव युधिष्ठिर ।

आह्वयामास दुष्टात्मा युद्धायैव मुहुर्मुहुः ।। १९ ।।(३)

तस्य शार्ङ्गविनिर्मुक्तैर्बहुभिर्मर्मभेदिभिः ।
पुरं नासाद्यत शरैस्ततो मां रोष आविशत् ।। २० ।।(४)

स चापि पापप्रकृतिर्दैतेयापसदो नृप ।
मय्यवर्षत दुर्धर्षः शरधाराः सहस्रशः ।। २१ ।।(५)

सैनिकान्मम सूतं च हयांश्च समवाकिरत् ।
अचिन्तयन्तस्तु शरान्वयं युध्याम भारत ।। २२ ।।

ततः शतसहस्राणि शराणां नतपर्वणाम् ।
चिक्षिपुः समरे वीरा मयि साल्वपदानुगाः ।। २३ ।।(६)

ते हयांश्च रथं चैव तदा दारुकमेव च ।

---

(१) स समालोक्य; सुधि (for मृधे),

(२) (१)समालोक्य च; स मामालोक्य; सहसा (for दूरान्मां),

(३) (१)ततः (for तस्य); (३)बलम्; परो (for पुरं); न आच्छाद्य च (न); नासाद्य स तदा (for शरैम्); (४)मा (for मां),

(४) (१)परमक्रुद्धो (for पापं); (२)यापशदो ()भवत् (for नृप); (३)अभ्यवर्षत; मय्यभ्यवर्षद्; मवयवर्षत्स; पर्यवर्षत; समं,

(५) (१)मां च; चैव (for मम); (२)स समां (for समवां); स हयांश्च समाकिरत्; (३)च; (अ)स्य (for तु) अचिन्तयंस्तु स शरान्; (४)योत्स्याम (for युध्यां ); प्रतियुध्यामहे परान्,

(६) (१)च (for मे); (२)स तं (सूतं); तथा; तच्च; ध्वजं (for तदा); (४)तैर्बाणैर सुबाणैर; शरैस्तैद्); मर्मभेदिभिः (बाणैर्मर्मातिभेदिभिः); साल्वराजेन चोदिताः

छादयामासुरसुरास्तैर्बाणैर्मर्मभेदिभिः ॥ २४ ॥[१]

न हया न रथो वीर न यन्ता मम दारुकः ।
अदृश्यन्त शरैश्छन्नास्तथाहं सैनिकाश्च मे ॥ २५ ॥

ततोऽहमपि कौन्तेय शराणामयुतान्बहून् ।
आमन्त्रितानां धनुषा दिव्येन विधिनाक्षिपम् ॥ २६ ॥[२]

न तत्र विषयस्त्वासीन्मम सैन्यस्य भारत ।
खे विषक्तं हि तत्सौभं क्रोशमात्र इवाभवत् ॥ २७ ॥[३]

ततस्ते प्रेक्षकाः सर्वे रङ्गवाट इव स्थिताः ।
हर्षयामासुरुच्चैर्मां सिंहनादतलस्वनैः ॥ २८ ॥[४]

मत्कराग्रविनिर्मुक्ता दानवानां शरास्तथा ।
अङ्गेषु रुचिरापाङ्गा विविशुः शलभा इव ॥ २९ ॥[५]

ततो हलहलाशब्दः सौभमध्ये व्यवर्धत ।
वध्यतां विशिखैस्तीक्ष्णैः पततां च महार्णवे ॥ ३० ॥

पतितास्त्रेपि भक्ष्ययन्ते समुद्राम्भोनिवासिभिः[6]

---

(१) (१)वीरा (for रं) (२)न वरूथो (थं) न दारुकः; न च रूपं न दारकं; न ध्वजो न च दारुकः; (४) ततोहं; न चाहं,

(२) (१)कौतेय(for कौरव्यं); (३)आमन्त्रितानां; अभिमन्त्रितेन; अभिमन्त्रितांश्च; अनुमन्त्र्य तांश्च; (तां); अभिमन्त्रिताश्च *अधिकपाठः आमन्त्रितानां अभिमन्त्रि तानां* धनुषि,(१)विषयं; विषायाश्चासीत्; चासन्; (३)सैन्यं (for सौभं); ) (४)क्रोशमात्रम्,

(३) (२) (अ)स्थिताः ते देवा; देवा वै) दीवमास्थिताः,

(४) (१)मत्क राग्रं; विमुक्तास्ते; (२)बाणास्ते वातरंहस (सा); दानवानां शरास्तथा; (दा; तः) बाणास्तान्दानवांस्तत (३)रुचि(धि) राङ्गास्ते; रुचिरापाङ्गा; रुधिराशास्ते; रुधीरासत्का,

(५) (२)व्यवर्ततः व्यवस्थितः प्रवर्तत ; ह्यवर्तत ()भ्यवर्तत्; (३)विद्धानां विज्ञानं (for वध्यतां) निशितैं (for विशीखैं),

(६) तेपि मज्जन्त ते ह्यक्ष्यन्त (for तेपि भक्ष्यन्ते),

ते निकृत्तभुजस्कन्धाः कबन्धाकृतिदर्शनाः ।
नदन्तो भैरवान्नादान्निपतन्ति स्म दानवाः ।। ३१ ।।(१)

पतितास्तेऽपि भक्ष्यन्ते समुद्राम्भोनिवासिभिः ।

ततो गोक्षीरकुन्देन्दुमृणालरजतप्रभम्।
जलजं पाश्चजन्यं वै प्राणेनाहमपूरयम् ।।३२ ।।(२)

तान्दृष्ट्वा पतितांस्तत्र साल्वः सौभपतिस्ततः ।६

असयः शक्तिमुशलपाशार्ष्टिकणपाः शराः(3)

मायायुद्धेन महता योधयामास मां युधि ।। ३३ ।। (४)

ततो गदा हलाः प्रासाः शूलशक्तिपरश्वधाः ।

असयः शक्तिकुलिशपाशर्ष्टिकनपाः शराः ।

पट्टिशाश्च भुशुण्ड्यश्च प्रपतन्त्यनिशं मयि ।। ३४ ।।(५)

अङ्गारपांशुवर्षं च शस्त्रवर्षं च भारत

तामहं माययैवाशु प्रतिगृह्य व्यनाशयम् ।
तस्यां हतायां मायायां गिरिशृङ्गैरयोधयत् ।। ३५ ।।(६)

स मोहयामास तदा मायया युधि दानवः

---

(१) (३)रुवन्तो (for नदन्तो)

(२) (२)ततः तथा तदा; साल्वराजपुरस्कृतान्,

(३) कुशल कुलिश (for मुशल) कनपा; घनपाः (for कणपाः);(३)पट्टसाश्च (पट्टप्रास) भुशण्ड्य; मुखण्डयं मुसं (सुं) ट्यं; मुसुढयं; मुसूलां; मुसृण्ट्यं (for भुशुण्ड्यं)
प्रपतन्ति (त); पातयन् (for प्रा पतन्); त्वनिशं; निशिता (for अनिशं),

(४) (१)तामहं; ततोहं; (२) प्रतिहत्य विनाशयं; (३)तु मया; मायां तु; दुष्टायां (for मायायां),

(५) (२)प्रकाश;) प्रभात (for प्रभातम्); वाभवत्; चाभिभो); (३)सुदिनं दुर्दिनं चैव,

(६) (१) प्र (for विं ); (२)मा (for मां); (४)तदा मायां (for माययैव) विनाशयं; वि( व्य) नाशयन्; विनाशनं; व्यशातयं यथाकालं च व्यधमं तामहं सं,

ततो हतायां च मया मायायां युधि दानवः

ततोऽभवत्तम इव प्रकाश इव चाभवत् ।
दुर्दिनं सुदिनं चैव शीतमुष्णं च भारत ।। ३६ ।।

अङ्गारपांशुवर्षं च शस्त्रवर्षं च भारत ।। ३७ ।।

एवं मायां प्रकुर्वाणो योधयामास मां रिपुः ।[१]
विज्ञाय तदहं सर्वं माययैव व्यनाशयम् ।। ३८ ।।

यथाकालं तु युद्धेन व्यधमं सर्वतः शरैः ।[२]
ततो व्योम महाराज शतसूर्यमिवाभवत् ।। ३९ ।।

शतचन्द्रं च कौन्तेय सहस्रायुततारकम्।
ततो नाज्ञायत तदा दिवारात्रं तथा दिशः ।। ४० ।।

ततोऽहं मोहमापन्नः प्रज्ञास्त्रं समयोजयम्।
ततस्तदस्त्रं कौन्तेय धूतं तूलमिवानिलैः ।। ४१ ।।

तथा तदभवद्युद्धं तुमुलं लोमहर्षणम् ।
लब्धालोकस्तु राजेन्द्र पुनः शत्रुमयोधयम् ।। ४२ ।।[३]

अस्मिन् कैरातपर्वणि १६अध्याये ४२श्लोकाः सन्ति

(कैरातपर्वणि षष्ठोध्यायः)

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अर्जुनाभिगमनपर्वणि षोडशोऽध्यायः ।। १६ ।।

---

(१) (१)मया; विभो (for तदा); (२) तथा रात्रिर्दिवानिशं; (३) तम् (for तद्); कौन्तेय (for अस्त्रेण) ) विधूय तृणं;(for तूलं) धूतं तृलं (ध्रतं तृण) मिवानिलैः; वायुना तूलराशिवत्,
(२) (१)तदा; एवं (for तथा); समभवद्; (२)तुमलं; रोमं (३)लोकं (for लोकश्); तु (for च);
(३) (३) क-ख-लब्धोतोकस्तु,

## महाभारततात्पर्यनिर्णये २२ अध्याये

यस्मिञ्छरे करगते विजयो ध्रुवः स्यात् मत्तेजसा तदनुसङ्ग्रहणात् सुतान्मे ।
यातं निशम्य रिपुमात्मपुरीं च भग्नां दृष्ट्वैव तेन तदनुव्रजनं कृतं मे ।। ४६ ।।
तं सागरोपरिगसौभगतं निशाम्य मुक्ते च तेन मयि शस्त्रमहास्त्रवर्षे ।
तं सन्निवार्य तु मया शरपूगविद्धो मायाः युयोज मयि पापतमः स साल्वः।।४७।।
ताः क्रीडया क्षणमहं समरे निशाम्य
ज्ञानास्त्रतः प्रतिविधूय बहूंश्च दैत्यान् ।
हत्वाऽऽशु तं च गिरिवर्षिणमाशु
सौभं वार्धौ न्यपातयमरीन्द्रविभिन्नबन्धम् ।। ४८ ।।
तं स्यन्दनस्थितमथो विभुजं विधाय बाणेन तद्रथवरं गदया विभिद्य ।
चक्रेण तस्य च शिरो विनिकृत्य धातृशर्वादिभिः प्रतिनुतः स्वपुरीमगां च।।४९।।
तस्मादिदं व्यसनमास हि विप्रकर्षात्
मे कार्यतस्त्विति निगद्य पुनश्च पार्थान् ।
कृष्णां च सान्त्वयितुमत्र दिनान्युवास
सत्या च सोमकसुतामनुसान्त्वयन्ती।। ५०।।

महाभारते- वनपर्वणि १७, अध्यायः

## १७.सप्तदशोऽध्यायः

कृष्णसाल्वयोर्युद्धम् ।।१ ।। साल्वेन स्वमायासृष्टवसुदेवस्य शिरश्छेदनप्रदर्शनेन कृष्णाव्यामोहनम् ।। २ ।। ततो मुहूर्तेन प्रतिबुद्धेन कृष्णेन स्वानुभूतस्य मायिकत्वाध्यवसायः ।। ३ ।।

– ÷

एवं स पुरुषव्याघ्र साल्वराजो महारिपुः ।

युध्यमानो मया सङ्ख्ये वियदभ्यगमत्पुनः ॥ १ ॥[१]

ततः शतघ्नीश्च महागदाश्च दीप्तांश्च शूलान्मुसलानसींश्च ।
चिक्षेप रोषान्मयि मन्दबुद्धिः साल्वो महाराज जयाभिकाङ्क्षी॥ २ ॥[२]

तानाशुगैरापततोऽहमाशु निवार्य हन्तुं खगमान्ख एव ।
द्विधा त्रिधा चाच्छिदमाशुमुक्तैस्ततोऽन्तरिक्षे निनदो बभूव ॥३॥[३]

ततः शतसहस्रेण शराणां नतपर्वणाम् ।
दारुकं वाजिनश्चैव रथं च समवाकिरत् ॥ ४ ॥[४]

ततो मामब्रवीद्वीर दारुको विह्वलन्निव ।
स्थातव्यमिति तिष्ठामि साल्वबाणप्रपीडितः ॥ ५ ॥[५]

अवस्थातुं न शक्यामि अङ्गं मे व्यवसीदति।

इति तस्य निशम्याहं सारथेः करुणं वचः ।
अवेक्षमाणो यन्तारमपश्यं शरपीडितम् ॥ ६ ॥[६]

न तस्योरसि नो मूर्ध्नि न काये न भुजद्वये ।
अन्तरं पाण्डवश्रेष्ठ पश्याम्यनिचितं शरैः ॥ ७ ॥[७]

---

(१) श्रीकृष्णःश्रीभगवान् (for वासु देवः); (१) पुरुषव्याघ्रः; (२) ख-घ-राजा, सर्वराज्ञां; साल्वराजो; साल्वो राजा; (४)अभ्यगमत्,

(२) (२)मुशलान्; च महान् अपि (सि) सायकांश्च (for मुस लानं); शूलांस्तथा मुद्गरकानसींश्च ; (३) राजन् (for रोषान्),

(३) (१)तानाशुगान्; तैश्चासु तान्; तानाशु बाणैश्च ततो महास्त्रैः; (२)हन्तुं (for तूणं) शतशः (for खगमान्); खगैश्च; समेत्य (for रव एव); चाच्छिदं; छिद्यमानाः अस्त्रमुक्तैस्; चाशु मुक्तौ; सुमुक्तैस्,

(४) (४)रथचक्रमवाकिरत्,

(५) (१)वीरो; धीरो (for वीर); (२) विङ्कलन्निव दारुकः; (४) (अ)भि (प्र); साल्वराजाभिपी,

(६) (४)अवश्यं; अतीव; अवशं (for अपश्यं); भृशं (for शरं),

(७) (१)तस्योरसि ततो(तथा); मूर्ध्नि (४) यद (दि) नाह (हु)तं;(अ) (अ)निचितं शरैः; निशितं (तैः) शरैः; निहतं शरैः; (अ)निहतं शरैः,

स तु बाणवरोत्पीडाद्विस्रवत्यसृगुल्बणम् ।
अभिवृष्टे यथा मेघे गिरिर्गैरिकधातुमान् ।। ८ ।।[१]

अभीषुहस्तं तं दृष्ट्वा सीदन्तं सारथिं रणे ।
अस्तम्भयं महाबाहो साल्वबाणप्रपीडितम्।[२]
अथ मां पुरुषः कश्चिद्द्वारकानिलयोऽब्रवीत् ।। ९ ।।

त्वरितो रथमभ्येत्य सौहृदादिव भारत।[३]
आहुकस्य वचो वीर तस्यैव परिचारकः ।। १० ।।

विषण्णः सन्नकण्ठेन तन्निबोध युधिष्ठिर ।[४]
द्वारकाधिपतिर्वीर आह त्वामाहुको वचः ।। ११ ।।[५]

आहुकः-
केशवैहि विजानीष्व यत्त्वां पितृसखोऽब्रवीत् ।। १२ ।।[६]

उपयायाद्य साल्वेन द्वारकां वृष्णिनन्दन ।
विषक्ते त्वयि दुर्धर्ष हतः शूरसुतो बलात् ।। १३ ।।[७]

तदलं साधु युद्धेन निवर्तस्व जनार्दन ।

---

(१) (१)शरोत्पीडाद्; वधोत्पीडाद्; मयो त्यीडो; (२)विसृजन्नसृगुं ; व्यसृजद्रुधिरं बहु (व्यसृजच्चासृगुल्वणं);
(३) अभिवृष्टे; अतिवृष्टे; अतिसृष्टो); मैधे ) (४)धातुभिः,
(२) (१)अभीशुं; (३)संस्तभयं; (४)बाणाभिपीं,
(३) (३)आरोप्य (for अभ्येत्य ) ,
(४) (३)विवर्णः (for विषण्णः) कण्ठेन; (कण्ठश्व)
(५) (१)वीरम् (२)प्राह (for आह),
(६) (१) (ए)हि; (ए)तद् (ए)वं (इ)ह; विजानीहि,
(७) (१)उपयाय उपायाय; उपगम्य; उपायातो; उपागत्य; उपपद्य; उपायात्वा; (अ)थ; तु
क्य (अ)द्य); साल्वो वै); (३) निसृते; विमुक्ते; प्रयाते (for विषक्ते); दुर्धर्षे; (४)हृतः (for हतः)

द्वारकामेव रक्षस्व कार्यमेतन्महत्तव ।। १४ ।।[१]

श्रीभगवान्-

इत्यहं तस्य वचनं श्रुत्वा परमदुर्मनाः ।
निश्चयं नाधिगच्छामि कर्तव्यस्येतरस्य च ।। १५ ।।[२]

सात्यकिं बलदेवं च प्रद्युम्नं च महारथम् ।
जगर्हे मनसा वीर तच्छ्रुत्वा महदप्रियम् ।। १६ ।।[३]

अहं हि द्वारकायाश्च पितुश्च कुरुनन्दन ।
तेषु रक्षां समाधाय प्रयातः सौभपातने।
बलदेवो महाबाहुः कच्चिज्जीवति शत्रुहा ।। १८ ।।

सात्यकी रौक्मिणेयश्च चारुदेष्णश्च वीर्यवान् ।
साम्बप्रभृतयश्चैवेत्यहमासं सुदुर्मनाः ।। १८ ।।[४]

एतेषु हि नरव्याघ्र जीवत्सु न कथञ्चन ।
शक्यः शूरसुतो हन्तुमपि वज्रभृता स्वयम् ।। १९ ।।[५]

हतः शूरसुतो व्यक्तं व्यक्तं चैते परासवः ।
बलदेवमुखाः सर्व इति मे निश्चिता मतिः ।। २० ।।[६]

---

(१) (२)जनाधिप (for दन); (४) महत्तरं; महत्तमं,

(२) (१)इत्येवं; वचनं तस्य ; (४)च (for वा),

(३) (२)बलं; बलीं(for रथम्); (३) ख-घ-विगर्हे, विगर्हे सर्वान्; वीरान् (for वीर); (४) महदप्रियं; ह्यप्रियं वचः

(४) (२)शत्रुहन्; वा न वा सात्वतो (for सात्यकी); रौक्मि चारुं शाम्ब सर्वे; चेमे (for चैव) हि ()ति); इति,

(५) (१)च; (अ)पि (for हि); (३) हर्तुम्; कर्तुम् (for हन्तुम्),

(६) (१)ख-हतशख्शूरसुतो व्यक्तमिति मे निश्चिता मतिः । मध्ये अर्धं नास्ति, हतः; चैव (for व्यक्तं); (२)चैते; चैव (for ते च); तेपि सर्वे पराजिताः; वर्तन्ते च परासवः

सोऽहं सर्वविनाशं तं चिन्तयानो मुहुर्मुहुः ।
अविह्वलो महाराज पुनः साल्वमयोधयम् ॥ २१ ॥[१]

ततोऽपश्यं महाराज प्रपतन्तमहं तदा ।
सौभाच्छूरसुतं वीर ततो मां मोह आविशत् ॥ २२ ॥[२]

तस्य रूपं प्रपततः पितुर्मम नराधिप ।
ययातेः क्षीणपुण्यस्य स्वर्गादिव महीतलम् ॥ २३ ॥

विशीर्णमलिनोष्णीषः प्रकीर्णाम्बरमूर्धजः ।
प्रपतन्दृश्यते ह स्म क्षीणपुण्य इव ग्रहः ॥ २४ ॥[३]

ततः शार्ङ्गं धनुःश्रेष्ठं करात्प्रपतितं मम ।
मोहापन्नश्च कौन्तेय रथोपस्थ उपाविशम् ॥ २५ ॥[४]

ततो हाहाकृतं सर्वं सैन्यं मे गतचेतनम् ।
मां दृष्ट्वा रथनीडस्थं गतासुमिव भारत ॥ २६ ॥[५]

प्रसार्य बाहू पततः प्रसार्य चरणावपि ।
रूपं पितुर्मे विबभौ शकुनेः पततो यथा ॥ २७ ॥[६]

तं पतन्तं महाबाहो शूलपट्टिशपाणयः ।

---

(१) (१)तु; च (for तं); (३) सविह्वलो; (अविं); (४)सौभम् (for साल्वम्),

(२) (२)रथं; रथात् (for अहं) नृप (for तदा); प्रपपात महानृपः; (३)वीरं (४)मा (for मां), ततो मोहश्च माविशत्

(३) (१)विकीर्ण रणित; मलिन (for गलित) उष्णीष; (२)क-ख-प्रकीर्णाम्बरमूर्धजः,स्रस्तकुण्डलभूषणः (३)भस्य; पार्थ(for ह स्म)

(४) (१)शार्ङ्ग (२) कराग्रात् मा प्रा(पतन्मम)(३)मोहात्मनश्च; पन्नश्च; त्सन्नस्य; सर्वत्र तु (for च)

(५) (२)गतचेतसं; समपद्यत; हत चेतनं; (३)च रथोपस्थे (for रथनी ),

(६) (३)अपश्यन्त; मे विबभौ; अपश्यन्ति; अपश्यं तु; अपश्यन्तः; अपश्यंस्तु,

अभिघ्नन्तो भृशं वीर मम चेतो ह्यकम्पयन् ।। २८ ।।[१]

ततो मुहूर्तात्प्रतिलभ्य सञ्ज्ञामहं तदा वीर महाविमर्दे ।

न तत्र सौभं न रिपुं च साल्वं पश्यामि वृद्धं पितरं न चापि।। २९ ।।[२]

ततो ममासीन्मनसि मायेयमिति निश्चितम् ।

प्रबुद्धोऽस्मि ततो भूयः शतशोऽवाकिरं शरान्।। ३० ।।[३]

**अस्मिन् कैरातपर्वणि १७अध्याये ३०श्लोकाः सन्ति**

(कैरातपर्वणि सप्तमोध्यायः)

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अर्जुनाभिगमनपर्वणि सौभवधोपाख्याने सप्तदशोऽध्यायः ।। १७ ।।

## महाभारततात्पर्यनिर्णये २२ अध्याये

पाण्डवानां च या भार्याः पुत्रा अपि हि सर्वशः ।

अन्वेव पाण्डवान् याता वनमत्रैव संस्थिताः ।। ५१ ।।

धृष्टद्युम्नस्ततः कृष्णां सान्त्वयित्वैव केशवम् ।

प्रणम्य समनुज्ञातो भागिनेयैः पुरं ययौ ।। ५२ ।।

धृष्टकेतुश्च भगिनीं काशिराजः सुतामपि ।

पुरं ययतुरादाय कुन्त्यैवान्याः सह स्थिताः ।। ५३ ।।

पार्वती नकुलस्याऽसीद् भार्या पूर्वं तिलोत्तमा ।

पूर्वोक्ते चैव यमयोर्भार्ये कुन्त्या हि वारिताः ।। ५४ ।।

सुभद्रामभिमन्युं च रथमारोप्य केशवः ।

---

(१) (२)पट्टसं (३)भृशं वीर; भृशं वीरं; महावीर); (४)ह्यकम्पयन्; व्यमोहं; त्वकम्पं; व्यचिन्तं,

(२) (१)उप (for प्रति);(२)विमोहात्; विमर्दने;(३)पुरं; नगरं; न पुनः (for न रिपुं); च (for न)

(३) (१)ततोसुराणां विज्ञाय; (२) (ए)वम् (for (इ)०य भू निश्चयः; निश्चतः (३)तदा (for ततो);

(४) (१)वाकिरन् (२)भ्यकिरन् व्यकिरन्; विसृजन् (for विकिरन्); विकिरञ्शतशः शरान्,

पाण्डवानभ्यनुज्ञाय सभार्यः स्वपुरीं ययौ ।। ५५ ।।

महाभारते- वनपर्वणि १८, अध्यायः

# १८. अष्टदशोऽध्यायः

कृष्णेन युधिष्टिरं प्रति स्वेन साल्वसंहारकथनपूर्वकं सुभद्राभिमन्युभ्यां सह द्वारकागमनम् ।। १।। धृष्टद्युम्नधृष्टकेतुभ्यां यथाक्रमं द्रौपदेयान्नकुलभार्यां चादाय स्वस्वनगरगमनम् ।

− ÷

ततोऽहं भरतश्रेष्ठ प्रगृह्य रुचिरं धनुः ।
शरैरपातयं सौभाच्छिरांसि विबुधद्विषाम् ।। १ ।।[१]

शरांश्चाशीविषाकारानूर्ध्वगांस्तिग्मतेजसः ।
प्रैषयं साल्वराजाय शार्ङ्गमुक्तान्सुवाससः ।। २ ।।[२]

ततो नादृश्यत तदा सौभं कुरुकुलोद्वह ।
अन्तर्हितं माययाभूत्ततोऽहं विस्मितोऽभवम् ।। ३ ।।[३]

अथ दानवसङ्घास्ते विकृताननमूर्धजाः ।
उदक्रोशन्महाराज विष्ठिते मयि भारत ।। ४ ।।[४]

ततोऽस्त्रं शब्दसाहं वै त्वरमाणो महारणे ।
अयोजयं तद्वधाय ततः शब्द उपारमत् ।। ५ ।।[५]

हतास्ते दानवाः सर्वे यैः स शब्द उदीरितः ।

---

(१) श्रीकृष्णः; श्रीभगवान् (for वसुद्वेवः) (३)सर्व (for सौभात्),
(२) (१)च (२)सुपितान्(for ऊर्ध्वगान्); (३)प्रेषयं; प्रेषयञ् (for अप्रैषं); साल्वराजस्य; सौभराजाय,
(३) (१)रणे (for तदा); (२)सौभः; साल्वः (३)अन्तर्हितो,
(४) (४)धिष्टिते; ( विष्ठिवे ),
(५) (२)महारणे (for हवे),

शरैरादित्यसङ्काशैर्ज्वलितैः शब्दसाधनैः ॥ ६ ॥[१]

तस्मिन्नुपरते शब्दे पुनरेवान्यतोऽभवत् ।
शब्दोऽपरो महाराज तत्रापि प्राहरं शरैः ॥ ७ ॥[२]

एवं दश दिशः सर्वास्तिर्यगूर्ध्वं च भारत ।
नादयामासुरसुरास्ते चापि निहता मया ॥ ८ ॥[३]

शरैर्नानाविधाकारैर्दिव्यास्त्रप्रतिमन्त्रितैः
अस्त्रैः शस्त्रैश्च विविधैः खस्था ह्यन्तर्हिता अपि

ततः प्राग्ज्योतिषं गत्वा पुनरेव व्यदृश्यत ।
सौभं कामगमं वीर मोहयन्मम चक्षुषी ॥ ९ ॥[४]

ततो लोकान्तकरणो दानवो दारुणाकृतिः ।
शिलावर्षेण महता सहसा मां समावृणोत् ॥ १० ॥[५]

सोऽहं पर्वतवर्षेण वध्यमानः पुनः पुनः ।
वल्मीक इव राजेन्द्र पर्वतोपचितोऽभवम् ॥ ११ ॥[६]

ततोऽहं पर्वतचितः सहयः सहसारथिः ।

---

(१) (२)शब्दः स (इतीरितः चैः शब्दःसमुदीं); (३)शस्त्रैर् (for शरैर्); (४)ज्वलद्भिः (for ज्वलितैः) इव पन्नगैः; शब्दशातनैः शत्रुवधनैः; शब्दपातनैः

(२) (२)महत् (for ऽभवत्); विकृताननमूर्धजाः (३)यतो (for ऽपरो); (४)तत्राहं चरान्; शरैः (for शरान्),

(३) (१)नादैर् (for दश),

(४) (१)कृत्वा (for गत्व); (२) (अ)पि (for वि); (३) स सौभं कामगं वीर,

(५) (१)देवान्तं (for लोकान्तं); (२)दारुणां; ()थ नरां(for धनुरा); (for वानरां); शैलं (for शिलां); महता सहसा समवां (for मां समा),

(६) (२)वार्यमाणः (for वध्यं ) पुनः पुनः (for समन्ततः); (४)सर्वतों (for पर्वतों) ततोहं पर्वतोभवं,

अप्रख्यातिमियां राजन्सर्वतः पर्वतैश्चितः ॥ १२ ॥[(१)]

ततो वृष्णिप्रवीरा ये ममासन्सैनिकास्तदा ।
ते भयार्ता दिशः सर्वे सहसा विप्रदुद्रुवुः ॥ १३ ॥[(२)]

ततो हाहाकृतमभूत्सर्वं किल विशाम्पते ।
द्यौश्च भूमिश्च खं चैवादृश्यमाने तथा मयि ॥ १४ ॥[(३)]

ततो विषण्णमनसो मम राजन्सुहृज्जनाः ।
रुरुदुश्चुक्रुशुश्चैव दुःखशोकसमन्विताः ॥ १५ ॥

द्विषतां च प्रहर्षोऽभूदार्तिश्चाद्विषतामपि ।
एवं विजितवान्वीर पश्चादश्रौषमच्युत ॥ १६ ॥[(४)]

ततोऽहमिन्द्रदयितं सर्वपाषाणभेदनम् ।
वज्रमुद्यम्य तान्सर्वान्पर्वतान्समशातयम् ॥ १७ ॥[(५)]

ततः पर्वतभारार्त्ता मन्दप्राणविचेष्टिताः ।
हया मम महाराज वेपमाना इवाभवन् ॥ १८ ॥[(६)]

मेघजालमिवाकाशे विदार्याभ्युदितं रविम् ।

---

(१) (२)रथः (for हयः); (३)गतो(for इयां) वीरः (for राजन्); (४)सर्वतः (for सध्वजः); सायुधः; सर्वतः (for पर्वतैः) तथा; तद (for चितः),

(२) (३)सर्वे (for सर्वाः) (४)च विं (for विप्रं),

(३) सर्वम् अभूत्; अभूज्जगत्सर्वं;(for सर्वमभूत्किल); (३)द्यौरन्तरिक्षं भूश्चैव (दिशो भूश्चैव स्वं चैवम्); (४)तदा (for तथा); अदृश्ये मयि भारत,

(४) (१)सं; तु (for च); (२)सुहृदाम् (for (अ)द्विषताम्); (३)अज्ञातं (for विजितं); (४)अद्भुतं; अच्युतः

(५) (१)महास्त्रं (हमस्त्रं) इन्द्र (for अस्त्रं); (४)समन्तात् (for पर्व तान्); ताडयं (for शातयम्),

(६) (२)प्राणां (for प्राण); विचेतसः; विचेतनः;(for विचेष्टिताः); (३) हया मे सहसा राजन् ) (४) महाहवे; इवावहन्,

दृष्ट्वा मां बान्धवाः सर्वे हर्षमाहारयन्पुनः ।[१]
ततो मामब्रवीत्सूतः प्राञ्जलिः प्रणतो नृप ।। १९ ।।

सूतः

साधु सम्पश्य वार्ष्णेय साल्वं सौभपतिं स्थितम्।

हया न्सन्दृश्य मां सूतः प्राह तात्कालिकं वचः
ततः पर्वतभारार्त्तान्मन्दप्राणविचेष्टितान् ।

अलं कृष्णावमत्यै(न्यै)नं साधु यत्नं समाच ।। २० ।।

मार्दवं सखितां चैव साल्वादद्य व्यपाह।[२]
जहि साल्वं महाबाहो मैनं जीवय केशव ।। २१ ।।

सर्वैः पराक्रमैर्वीर वध्यः शत्रुरमित्रहन् ।। २२ ।।[३]

न शत्रुरवमन्तव्यो दुर्बलोऽपि बलीयसा ।
योऽपि स्यात्पीठगः कश्चित्किं पुनः समरे स्थितः ।। २३ ।।[४]

स त्वं पुरुषशार्दूल सर्वयत्नैरिमं प्रभो।
जहि वृष्णिकुलश्रेष्ठ मा त्वां कालोऽत्यगात्पुनः ।। २४ ।।[५]

जितवाञ्जामदग्न्यं स कोटिवर्षगणान्बहून्।
स एष नान्यैर्वध्यो हि त्वदृते नैव कश्चन ।। २५ ।।

---

(१) (१)जाल (for जालम्); आकाशं; (२) विपाट्यां (for विदार्यां) (अ)भ्युत्थितं चिरं(for रविम्) (३) मामकाः(for बान्धवाः); भारार्तान् विचेष्टितान् (for विचेतसः),
(२) (१)अवमन्यैवं (वं);) अवमत्यैनं; अवमानेन) (२) साल्वे; साल्वं (for साधु); (३)मुञ्च (for चैव); (४) रम नुद (for हर); साल्वादुद्यम्य भारत,
(३) भीमः साल्वो (for जहि साल्वं) स वध्यः परवीरहा (for हन्)
(४) (१)शत्रुर्हि नावमन्तव्यो; (२) प्राकृतो (for दुर्बलो); (३)पीठक; क्षुल्लकः; पीडितः (for पीठगः),
(५) सर्वैर्यत्नैर; (४) त्व स्म (नः) (for त्वां) अयं (for पुनः),

नैष मार्दवसाध्यो वै मतो नापि सखा तव ।
येन त्वं योधितो वीर द्वारका चावमर्दिता ।। २६ ।।[१]

श्रीभगवान्

एवमादि तु कौन्तेय श्रुत्वाहं सारथेर्वचः ।
तत्त्वमेतदिति ज्ञात्वा युद्धे मतिमधारयम् ।। २७ ।।

वधाय साल्वराजस्य सौभस्य च निपातने।
दारुकं चाब्रुवं वीर मुहूर्तं स्थीयतामिति ।। २८ ।।

ततोऽप्रतिहतं दिव्यमभेद्यमतिवीर्यवान्(वत)।
आग्नेयमस्त्रं दयितं सर्वसाहं महाप्रभम् ।। २९ ।।[२]

योजयं तत्र धनुषा दानवान्तकरं रणे।

यक्षाणां राक्षसानां च दानवानां च संयुगे ।
राज्ञां च प्रतिलोमानां भस्मान्तकरणं महत् ।। ३० ।।[३]

क्षुरान्तममलं चक्रं कालान्तकयमोपमम् ।
अनुमन्त्र्याहमतुलं द्विषतां विनिबर्हणम् ।। ३१ ।।[४]

जहि सौभं स्ववीर्येण ये चात्र रिपवो मम ।
इत्युक्त्वा भुजवीर्येण तस्मै प्राहिणवं रुषा ।। ३२ ।।[५]

रूपं सुदर्शनस्यासीदाकाशे पततस्तदा ।

---

(१) (२)नैष (for नापि),
(२) हतं; (२)अच्छेद्यम्; वान्; मत् (for वत्) (४)भयं (for प्रभम्),
(३) (२)संयुगे नाशकृत्तदा,
(४) अनुं (for अभिं) वि(for च),
(५) (२) ख-अयं पादोऽनन्तरश्च नस्तः,

द्वितीयस्येव सूर्यस्य युगान्ते प्रपतिष्यतः ।। ३३ ।।(१)

तत्समासाद्य नगरं सौभं व्यपगतत्विषम् ।
मध्येन पाटयामास क्रकचो दार्विवोच्छ्रितम् ।। ३४ ।।(२)

द्विधा कृतं ततः सौभं सुदर्शनबलाद्धतम् ।
महेश्वरशरोद्धूतं पपात त्रिपुरं यथा।(३)
तस्मिन्निपतिते सौभे चक्रमागात्करं मम ।। ३५ ।।

पुनश्चादाय वेगेन साल्वायेत्यहमब्रुवम् ।। ३६।।(४)
ततः साल्वं गदां गुर्वीमाविध्यन्तं महाहवे ।
द्विधा चकार सहसा प्रजज्वाल च तेजसा ।। ३७ ।।

तस्मिन्विनिहते वीरे दानवास्त्रस्तचेतसः ।
हाहाभूता दिशो जग्मुरर्दिता मम सायकैः ।। ३८ ।।(५)

ततोऽहं समवस्थाप्य रथं सौभसमीपतः ।
शङ्खं प्रध्माप्य हर्षेण सुहृदः पर्यहर्षयम् ।। ३९ ।।(६)

तन्मेरुशिखराकारं विध्वस्ताट्टालगोपुरम् ।
दह्यमानमभिप्रेक्ष्य स्त्रियस्ताः सम्प्रदुद्रुवुः ।। ४० ।।(७)

---

(१) (४)परिवेशिनः; प्रपतिष्यतः; परिवेषिणः; प्रतपिष्यतः; प्रभविष्यतः; परिलेक्ष्यतः; परिपिष्यतः परिवेष्यतः; परिधक्ष्यतः,

(२) (३) अ-ख-चक्रं विदारयामास, चक्रं विदारयां; मध्येन दारयां; (४)महामेरु (घ) मिवोच्छ्रितं,

(३) तु तत्; तदा (for ततः) द्विधाकृतेत्र तत्सौभं; (२) बलाहतं (३)शरैर्ध्वस्तं; शरैर्धूतं (४)अपतत्; अपरं (for पपात),

(४) (३)आधूय; आदाय; आह्वाय; आधाय (for उद्धूय); (४)अच्युतं (for अब्रुवम्),

(५) (१)विनिहते (for निपतिते); पापे साल्वे(for वीरे),

(६) (३)प्रध्माय वेगेन (for हर्षेण); (४)सम्प्रहर्षयं; चाप्यहं,

(७) (३)महीं प्रेक्ष्य; समुद्वीक्ष्य (for अभिं),

एवं निहत्य समरे सौभं साल्वं निपात्य च ।
आनर्तान्पुनरागम्य सुहृदां प्रीतिमावहम् ॥ ४१ ॥[१]

तदेतत्कारणं राजन्यदहं नागसाह्वयम् ।
नागमं परवीरघ्न न हि जीवेत्सुयोधनः ॥ ४२ ॥[२]

मय्यागतेऽथवा वीर द्यूतं न भविता तथा ।
अद्याहं किं करिष्यामि भिन्नसेतुरिवोदकम्।

– –

एवमुक्त्वा महाबाहुः कौरवं पुरुषोत्तमः ।
आमन्त्र्य प्रययौ श्रीमान्पाण्डवान्मधुसूदनः ॥ ४३ ॥[३]

अभिवाद्य महाबाहुर्धर्मराजं युधिष्ठिरम् ।
राज्ञा मूर्धन्युपाघ्रातो भीमेन च महाभुजः ॥ ४४ ॥[४]

परिष्वक्तश्चार्जुनेन यमाभ्यां चाभिवादितः ।
सम्मानितश्च धौम्येन द्रौपद्या चार्चितोऽश्रुभिः ।

सुभद्रामभिमन्युं च रथमारोप्य काञ्चनम् ।
आरुरोह रथं कृष्णः पाण्डवैरभिपूजितः ॥ ४५ ॥[५]

शैब्यसुग्रीवयुक्तेन रथेनादित्यवर्चसा ।

---

(१) (२)साल्वं सौभं; (३) आनर्तात् पुनरागत्य; (४)प्रियम् (for प्रीतिम्) ,
(२) (१)तदेतत् (एतद्वै;) त एतत्; एतत्तत्; (एततु) कारणं राजन्; (२)येनाहं; यदहं (for नागमं) हस्तिनापुरं; गजसाह्वयं); (३)नागमं; यद्यागं; यद्यागां); (४)जीयेत् शासितुं तं सुयोधनं,
(३) (३)श्री (सी) मान्; वीरान् (for धीमान्),
(४) (३)उपघ्रातो राज्ञा च मूर्ध्न्युपाघ्रातो (य); (४)ततो भीमो (for भीमेन च); महाबलः,
(५) प्रयातुं द्वारकां प्रति,

द्वारकां प्रययौ कृष्णः समाश्वास्य युधिष्ठिरम् ।। ४६ ।।[१]

ततः प्रयाते दाशार्हे धृष्टद्युम्नोऽपि पार्षतः ।
द्रौपदेयानुपादाय प्रययौ स्वपुरं तदा ।। ४७ ।।[२]

धृष्टकेतुः स्वसारं च समादायाथ चेदिराट् ।
जगाम पाण्डवान्दृष्ट्वा रम्यां शुक्तिमतीं पुरीम् ।। ४८ ।।[३]

केकयाः चाप्यनुज्ञाताः कौन्तेयेनामितौजसा ।
आमन्त्र्य पाण्डवान्सर्वान्प्रययुस्तेऽपि भारत ।। ४९ ।।[४]

ब्राह्मणाश्च विशश्चैव तथा विषयवासिनः ।
विसृज्यमानाः सुभृशं न त्यजन्ति स्म पाण्डवान् ।। ५० ।।[५]

समवायः स राजेन्द्र सुमहाद्भुतदर्शनः ।
आसीन्महात्मनां तेषां काम्यके भरतर्षभ ।। ५१ ।।[६]

युधिष्ठिरस्तु विप्रांस्ताननुमान्यं महामनाः ।
शशास पुरुषान्काले रथान्योजयतेति वै ।। ५२ ।।[७]

**अस्मिन् कैरातपर्वणि १८अध्याये ५२श्लोकाः सन्ति**

---

(१) (१)शै (सै)ब्यं (for सैन्यं),
(२) (१)प्रति (for ततः) दुर्धर्षे(for दाशार्हे); प्रययौ (४)स्वपुरं,
(३) (२)स समादाय चेदिं
(४) कैकेयाशु; कैकयाशु; अभि(for अपि) ज्ञप्ताः; गताः (for ज्ञाताः) (२) तौजसः; (४)चापि (for तेपि),
(५) (१)महाभागाम् ( बाहो) (for विशश्चैव),
(६) (२)महानद्भुतं ( सु),
(७) (१)तान्विप्रान् (२)महात्मनः; महायशाः (४)रथं संयोजयेति वै; सः(च)(for ह),
आरण्यः सौभवध; सौभवधाख्यान; सौभवधोपाख्यान; साल्ववध; समाप्त
श्रीकृष्णसाल्वयुद्धं,

(कैरातपर्वणि अष्टमोध्यायः)

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अर्जुनाभिगमनपर्वणि सौभवधोपाख्याने अष्टादशोऽध्यायः ।। १८ ।।

## महाभारततत्तात्पर्यनिर्णये २२ अध्याये

कश्चित् कालं द्रौपदेया उष्य पाञ्चालके पुरे ।
ययुर्द्वारवतीमेव तत्रोषुः कृष्णलालिताः ।। ५६ ।।
ततः परं धर्मराजो निर्विण्णः स्वकृतेन ह ।
भ्रातृभार्यापदे कृष्णां स्थापयामास सर्वदा ।। ५७ ।।
ऊषुर्वने च ते पार्था मुनिशेषान्नभोजिनः ।
भुक्तवत्स्वेवानुजेषु भुङ्क्ते राजा युधिष्ठिरः ।। ५८ ।।
अलङ्घ्यत्वात् तदाज्ञाया अनुजाः पूर्वभोजिनः ।
तस्यानन्तरमेवैका भुङ्क्ते सा पार्षतात्मजा ।। ५९ ।।

महाभारते- वनपर्वणि १९, अध्यायः

## १९. एकोनविंशोऽध्यायः

कृष्णादीनां पाण्डवान् दृष्ट्वा वनात् स्वनगरगमनानन्तरं पाण्डवैः पौराणामाश्वासनपूर्वकं नगरं प्रति निवर्तनम् ।। १ ।।

– –

तस्मिन्दशार्हाधिपतौ प्रयाते युधिष्ठिरो भीमसेनार्जुनौ च ।
यमौ च कृष्णा च पुरोहितश्च स्थान्महार्हान्परमाश्वयुक्तान् ।। १ ।।
आस्थाय वीराः सहिता वनाय प्रतस्थिरे भूतपतिप्रकाशाः ।

हिरण्यनिष्कान्वसनानि गाश्च प्रदाय शिक्षाक्षरमन्त्रविभ्द्यः ।। २ ।।[१]

प्रेष्याः पुरो विंशतिरात्तशस्त्रा धनूंषि शस्त्राणि शरांश्च दीप्तान्।

मौर्वीश्च यन्त्राणि च सायकांश्च सर्वे समादाय जघन्यमीयुः ।। ३ ।।[२]

ततस्तु वासांसि च राजपुत्र्या धात्र्यश्च दास्यश्च विभूषणं च ।

तदिन्द्रसेनस्त्वरितः प्रगृह्य जघन्यमेवोपययौ रथेन ।। ४ ।।[३]

ततः कुरुश्रेष्ठमुपेत्य पौराः प्रदक्षिणं चक्रुरदीनसत्त्वाः ।

तं ब्राह्मणाश्चाभ्यवदन्प्रसन्ना मुख्याश्च सर्वे कुरुजाङ्गलानाम्।। ५ ।।[४]

स चापि तानभ्यवदत्प्रसन्नः सहैव तैर्भ्रातृभिर्धर्मराजः ।

तस्थौ च तत्राधिपतिर्महात्मा दृष्ट्वा जनौघं कुरुजाङ्गलानाम्।। ६ ।।[५]

पितेव पुत्रेषु स तेषु भावं चक्रे कुरूणामृषभो महात्मा ।

ते चापि तस्मिन्भरतप्रबर्हे तदा बभूवुः पितरीव पुत्राः ।। ७ ।।[६]

ततस्तमासाद्य महाजनौघाः कुरुप्रवीरं परिवार्य तस्थुः ।

हा नाथ हा धर्म इति ब्रुवाणा भीताश्च सर्वेऽश्रुमुखाश्च राजन्।। ८ ।।[७]

\ारः कुरूणामधिपः प्रजानां पितेव पुत्रानपहाय चास्मान् ।

---

(१) (४)प्रदाय,

(२) (१)परे (for पुरो); (२)चित्राणि; शस्त्राणि; दीप्तानि; चर्माणि (for वर्माणि); दीप्तान् (for पीतान्); (३)सु (for च); कलापकांश्च; सुसायकांश्च (for च सायं),

(३) (२)विभूषणं यत् (षणानि); (३) त्वरितः नि (for प्र); परिगृह्य राजन् (for त्वरितं प्र),

(४) (२)सत्वं; चेतसं सत्त्वाः); (३)प्रहृष्टा; प्रपन्ना; (४) जङ्गलानां,

(५) (१)प्रपन्नः (४)जङ्गलानां,

(६) (१)सुतेषु (for स तेषु); (२)अधिपो (for ऋषभो); (३)वीरे (for बर्हे); (४)तथा (for तदा),

(७) तम् (for सम्) महाजनौघाः कुरुप्रवीरं; (३)नाथ कंष्टं (for धर्म); ब्रुवाणा (for ब्रुवन्तो) (४) हीताश्च; दीनाश्च; भीताश्च (for ह्रिया च); भीताः च राजन् ( च तस्थुः); (for बभूवुः),

पौरानिमाञ्जानपदांश्च सर्वान्हित्वा प्रयातः क्व नु धर्मराजः ।। ९ ।।(१)

धिग्धार्तराष्ट्रं सुनृशंसबुद्धि धिक्सौबलं पापमतिं च कर्णम् ।

अनर्थमिच्छन्ति नरेन्द्र पापा ये धर्मनित्यस्य सतस्तवैवम्।। १० ।।(२)

स्वयं निवेश्याप्रतिमं महात्मा पुरं महादेवपुरप्रकाशम् ।

शतक्रतुप्रस्थममेयकर्मा हित्वा प्रयातः क्व नु धर्मराजः ।। ११ ।।(३)

चकार यामप्रतिमां महात्मा सभां मयो देवसभाप्रकाशाम् ।

तां देवगुप्तामिव देवमायां हित्वा प्रयातः क्व नु धर्मराजः ।(४)

तान्धर्मकामार्थविदुत्तमौजा बीभत्सुरुच्चैः सहितानुवाच । ।। १२ ।।

&

आदास्यते वासमिमं निरुष्य वनेषु राजा द्विषतां यशांसि।। १३ ।।

द्विजातिमुख्याः सहिताः पृथक्च भवद्भिरासाद्य तपस्विनश्च ।

प्रसाद्य धर्मार्थविदश्च वाच्या यथार्थसिद्धिः परमा भवेन्नः ।। १४ ।।(५)

– –

इत्येवमुक्ते वचनेऽर्जुनेन ते ब्राह्मणाः सर्ववर्णाश्च राजन् ।

मुदाभ्यनन्दन्सहिताश्च चक्रुः प्रदक्षिणं धर्मभृतां वरिष्ठम्।। १५ ।।

आमन्त्र्य पार्थं च वृकोदरं च धनञ्जयं याज्ञसेनीं यमौ च ।

---

(१) (१)पतिः; ऊचुः ततः; इतः कुतः; (for वरः),

(२) (१)सुनृशंसमस्तु; सुभृशं कुबुद्धि; सुनृशंसवृत्तं (२) धित्त्यौबलं (४) तवैवं( व); तवेमं; मे); तवाग्र्यां तवोग्राः)

(३) (२)महादेवं; अमेयं (अजेयं)(for अमोघं ),

(४) (३)तां देवमायामिव देवकल्पो (गुप्तां),

(५) (१)पृथक्पृथक् (for पृथत्त्व),

प्रतस्थिरे राष्ट्रमपेतहर्षा युधिष्ठिरेणानुमता यथास्वम ् ।। १६ ।।(१)

अस्मिन् कैरातपर्वणि १९अध्याये १६श्लोकाः सन्ति

कैरातपर्वणि नवमोध्यायः

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अर्जुनाभिगमनपर्वणि द्वैतवनप्रवेशे एकोनविंशोऽध्यायः ।। १९ ।।

# २०. विंशतितमोऽध्यायः

पाण्डवैचिरावस्थाननिर्धारणपूर्वकं द्वैतवनप्रवेशः ।। १ ।।

– –

ततस्तेषु प्रयातेषु कौन्तेयः सत्यसङ्गरः ।
अभ्यभाषत धर्मात्मा भ्रातन्सर्वान्युधिष्ठिरः ।। १ ।।(२)

**युधिष्टिरः-**

द्वादशेमास्समास्माभिः वस्तव्यं निर्जने वने ।
समीक्षध्वं महारण्ये देशं बहुमृगद्विजम् ।। २ ।।(३)

बहुपुष्पफलं रम्यं शिवं पुण्यजनावृतम् ।
यत्रेमाः शरदः सर्वाः सुखं प्रतिवसेमहि ।। ३ ।।(४)

– –

एवमुक्ते प्रत्युवाच धर्मराजं धनञ्जय ।
गुरुवन्मानवगुरुं मानयित्वा मनस्विनम् ।। ४ ।।(५)

---

(१) (४)यथार्थं; सुखं; स्वयं,

(२) (४)सर्वान्भ्रात्मन्,

(३) (१) (इ)ह; (इ)माः); सहा (for समां) द्वादशेमानि वर्षाणि;-घ (२)विजने वने,

(४) (१)मूलं (for पुष्पं); (२)पुण्यज्रनावृतं; (३) द्वादशास्मासु; द्वादश समाः (for शरदः सर्वाः),

(५) (३)गुरुं स (for गुरुवन्); मानववरं (४)यशस्विनं; तपस्विनं;

अर्जुनः

भवानेव महर्षीणां वृद्धानां पर्युपासिता ।
अज्ञातं मानुषे लोके भवतो नास्ति किश्चन ।। ५ ।।[१]

त्वया ह्युपासिता नित्यं ब्राह्मणा भरतर्षभ ।
द्वैपायनप्रभृतयो नारदश्च महातपाः ।। ६ ।।[२]

यः सर्वलोकद्वाराणि नित्यं सञ्चरते वशी ।
देवलोकाद्ब्रह्मलोकं गन्धर्वाप्सरसामपि ।। ७ ।।

अनुभावांश्च जानासि ब्राह्मणानां न संशयः ।
प्रभावांश्चैव वेत्थ त्वं सर्वेषामेव पार्थिव ।। ८ ।।[३]

त्वमेव राजञ्जानासि श्रेयःकारणमेव च ।
यत्रेच्छसि महाराज निवासं तत्र कुर्महे ।। ९ ।।

इदं द्वैतवनं नाम सरः पुण्यजलोचितम् ।
बहुपुष्पफलं रम्यं नानाद्विजनिषेवितम् ।। १० ।।[४]

अत्रेमा द्वादश समा विहरेमेति रोचये ।
यदि तेऽनुमतं राजन्किमन्यन्मन्यसे भवान् ।। ११ ।।[५]

÷९ ÷

ममाप्येतन्मतं पार्थ त्वया यत्समुदाहृतम् ।

---

(१) मानुषे; भवतो,
(२) () (अ) भि(for हि); (२) वेदपारगाः(for भरं),
(३) (१)अनुभावान्; सर्वां गतिं; सद्वाग्गतिं च जानासि; विजानीत; (३)आवासांश्चैव,
(४) (२)जलों (for जनों),
(५) (१)यत्र (for अत्र); (इ)मे; (ए)व ((इ)मा); (२)विहरामें विचरे रा (में); नराधिप; ( )ति मे मतिः; ()ति रोचते; (३) नुमतिं रोचते (४) कथं वा;) किमन्यन् (for किं वान्यन्),

गच्छामः पुण्यविख्यातं महद्द्वैतवनं सरः ॥ १२ ॥[१]

– –

ततस्ते प्रययुः सर्वे पाण्डवा धर्मचारिणः ।
ब्राह्मणैर्बहुभिः सार्धं पुण्यं द्वैतवनं सरः ॥ १३ ॥

ब्राह्मणाः साग्निहोत्राश्च तथैव च निरग्नयः ।
स्वाध्यायिनो भिक्षवश्च तथैव वनवासिनः ॥ १४ ॥[२]

बहवो ब्राह्मणास्तत्र परिवव्रुर्युधिष्ठिरम् ।
तपःसिद्धा महात्मानः शतशः संशितव्रताः ॥ १५ ॥[३]

ते यात्वा पाण्डवास्तत्र ब्राह्मणैर्बहुभिः सह ।
पुण्यं द्वैतवनं रम्यं विविशुर्भरतर्षभाः ॥ १६ ॥[४]

तमालतालाम्रमधूकनीपक्यअदम्बसर्जार्जुनकर्णिकारैः ।
तपात्यये पुष्पधरैरुपेतं महावनं राष्ट्रपतिर्ददर्श ॥ १७ ॥[५]

महाद्रुमाणां शिखरेषु तस्थुर्मनोरमां वाचमुदीरयन्तः ।
मयूरदात्यूहचकोरसङ्घास्तस्मिन्वने बर्हिणकोकिलाः च ॥१८ ॥[६]

करेणुयूथैः सह यूथपानां मदोत्कटानामचलप्रभाणाम् ।

---

(१) (१)सर्वं (for पार्थ); (२)यत्त्वया (३)गच्छामः; पुण्यविं; पुण्यं द्वैतवनं; (४)सुविख्यातं महत्सरः,

(२) (४)तथैव; सद्वैत (for सजपा); वनचारिणः जपाश्च वनवासिनः ग्रजाश्च वनं जपाध्ययनचारिणः); जपस्वा ध्यायचारिणः,

(३) (३)तपः (ततः) सिद्धा महात्मानः (४)सततं (for शतशः); संश्रितं शंसितं,

(४) (१)तै प्राप्य; प्रयाताः; ते याताः ब्राह्मणैस्तत्र; (२) ब्राह्मणैर्बहुभिः सह; पाण्डवा बहुभिः सह ) (३) सर्वे (for रम्यं); (४)र्षभ

(५) (१)तत्सालं;) (३)वरैं; फलैं (for धरैं); (४)महाबलं; महद्वनं द्वैतवनं प्रपेदुः (for राष्ट्रपतिर्ददर्श),

(६) (२)मनोरमा वाच उदीं (३) नत्यूहं (for दात्यूहं ); (४)क-ख-काननकोकिलाश्च, बर्हिणं; सारसं; शारिकाः कों; कोकिलाः शारिका च,

महान्ति यूथानि महाद्विपानां तस्मिन्वने राष्ट्रपतिर्ददर्श ।। १९ ।।[१]

मनोरमां भोगवतीमुपेत्य पूतात्मनां चीरजटाधराणाम् ।

तस्मिन्वने धर्मभृतां निवासे ददर्श सिद्धर्षिगणाननेकान् ।।[२]

ततः स यानादवरुह्य राजा सभ्रातृकः सजनः काननं तत् ।

विवेश धर्मात्मवतां वरिष्ठस्त्रिविष्टपं शक्र इवामितौजाः ।। २१ ।।[३]

तं सत्यसन्धं सहसाभिपेतुर्दिदृक्षवश्चारणसिद्धसङ्घाः ।

वनौकसश्चापि नरेन्द्रसिम्हं मनस्विनं तं परिवार्य तस्थुः ।।[४]

स तत्र सिद्धानभिवाद्य सर्वान्प्रत्यर्चितो राजवद्देववच्च ।

विवेश सर्वैः सहितो द्विजाग्र्यैः कृताञ्जलिर्धर्मभृतां वरिष्ठः ।।[५]

स पुण्यशीलः पितृवन्महात्मा तपस्विभिर्धर्मपरैरुपेत्य ।

प्रत्यर्चितः पुष्पधरस्य मूले महाद्रुमस्योपविवेश राजा ।। २४ ।।[६]

भीमश्च कृष्णा च धनञ्जयश्च यमौ च ते चानुचरा नरेन्द्रम् ।

विमुच्य वाहानवशाश्च सर्वे तत्रोपतस्थुर्भरतप्रबर्हाः ।। २५ ।।[७]

लतावतानावनतः स पाण्डवैर्महाद्रुमः पञ्चभिरेव धन्विभिः ।

---

(१) यूथवर्तिनां (for यूथपानां) अमलं (for अचल); (४)वृन्दानि (for यूथानि),

(२) (१)मनोहरां मोघं (मेघं); ; भोगं; (२)पूतात्मनां; जितां; महां;(३) ख-सकङ्गाननेकान्स दद‍र्श भूमिपस् तथैव सिद्धर्षिगणाननेकान् ।।

(३) (१)वीरः(for राजा); (२)सज्जन; स्वजनः; सुजनः(for सजनः);धर्मात्मभृतां; धर्मार्थव(भृ) तां,

(४) (१)सहसा (for सहिताः) (अ)भ्यपेतुः; निपेतुः (४) युधिष्ठिरं; मनस्विनःतं (for सं),

(५) (१)वृद्धान् सिद्धान्) वृद्धान् (for सर्वान्) सिद्धान् सर्वान् (२) वर्चाः वच्च)

(६) (१)सु (for स); पुण्यशीलैः सहितो (for पितृवन्); (२)भृतैर् (for परैर्); उपेतः,

(७) (२)नरेद्र द्रः द्राः; (३)विमोच्य; विमोह्य अवच्छ पगतैः अवशा (शां)श्च; अनुगाश्ष; अव(वि)गाह्य; (for अवरुह्य); (४)क-ख-प्रबर्हाः, तत्रैव (for तत्रोप) बर्हं बर्हान्,

बभौ निवासोपगतैर्महात्मभिर्महागिरिर्वारणयूथपैरिव ।। २६ ।।(१)

### अस्मिन् कैरातपर्वणि २०अध्याये २६३श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अर्जुनाभिगमनपर्वणि द्वैतवनप्रवेशे विंशातितमोऽध्यायः ।। २० ।।

# २१. एकविंशोऽध्यायः

मार्कण्डेयेन पाण्डवानुपेत्य धर्मोपदेशपूर्वकमुत्तरदिग्गमनम् ।। १ ।।

– –

तत्काननं प्राप्य नरेन्द्रपुत्राः सुखोचिता वासमुपेत्य कृच्छ्रम्।
विजह्रुरिन्द्रप्रतिमाः शिवेषु सरस्वतीशालवनेषु तेषु।। १ ।।(२)
यतींश्च राजा स मुनींश्च सर्वांस्तस्मिन्वने मूलफलैरुदग्रैः ।
द्विजातिमुख्यानृषभः कुरूणां सन्तर्पयामास महानुभावः ।। २ ।।(३)
इष्टीश्च पित्र्याणि तथा क्रियाश्च महावने वसतां पाण्डवानाम् ।
पुरोहितस्तत्र समृद्धतेजाश्चकार धौम्यः पितृवन्नृपाणाम्।। ३ ।।(४)
अपेत्य राष्ट्राद्वसतां तु तेषामृषिः पुराणोऽतिथिराजगाम ।
तमाश्रमं तीव्रसमृद्धतेजा मार्कण्डेयः श्रीमतां पाण्डवानाम् ।। ४ ।।(५)

---

(१) (१)वितान; प्रतान (for वतान);(अ)वनतः;(for (अ)वनतः); (२)एव (for उग्र)

(२) (१)तत्कारणं (for तत्काननं); (२)दुःखम् (for प्वासम्; (३)प्रतिमप्रकाशाः; (४) अ-सरस्वती, भागीरथीसालं ( साल्वं),

(३) (१)सर्वा राजा नृपतिः (for ऋषभः),

(४) (१)मुख्याश्च (for पित्र्याणि); क्रियाश्च; तथाग्रयाणि; तथाश्रयाणि; तथा क्रियाणि (for तथाग्रियाणि); (२) तस्मिन् (for महा); (३)तत्र (for सर्व) पुरोहितः सत्यसमिद्धतेजाः (४) नृपाणां; महात्मा (for कुरूणाम्),

(५) (१) च (तु) मुनिः (for ऋषिः); ()तिचरो जगाम; ()भिजगाम राजन् (तिथिरां)) (३)तिग्मं;

स सर्वविद्द्रौपदीं वीक्ष्य कृष्णां युधिष्ठिरं भीमसेनार्जुनौ च ।

संस्मृत्य रामं मनसा महात्मा तपस्विमध्येऽस्मयतामितौजाः ।। ५ ।।(१)

तं धर्मराजो विमना इवाब्रवीत्सर्वे ह्रिया सन्ति तपस्विनोऽमी।

भवानिदं किं स्मयतीव हृष्टस्तपस्विनां पश्यतां मामुदीक्ष्य ।। ६ ।।(२)

– छि

न तात हृष्यामि न च स्मयामि प्रहर्षजो मां भजते न दर्पः ।

तवापदं त्वद्य समीक्ष्य रामं सत्यव्रतं दाशरथिं स्मरामि ।। ७ ।।(३)

स चापि राजा सह लक्ष्मणेनवने निवासं पितुरेव शासनात्।

धन्वी चरन्पार्थ मयैव दृष्टो गिरेः पुरा ऋष्यमूकस्य सानौ ।। ८ ।।(४)

सहस्रनेत्रप्रतिमो महात्मा यमस्य नेता नमुचेः च हन्ता ।

पितुर्निदेशादनघः स्वधर्मं वासं वने दाशरथिश्चका ।। ९ ।।(५)

स चापि शक्रस्य समप्रभावो महानुभावः समरेष्वजेयः ।

---

प्रीतिं; सर्व (for तीव्रं); ४()मार्कण्डेयः

९३*अधिकपाठः

तमागतं ज्वलितहुताशनप्रभं महामनाः कुरुवृषभो युधिष्ठिरः ।

अपूजयत्सुरऋषिमानवार्चितं महामुनिं ह्यनुपमसत्त्ववीर्यवान्।

त्विषं (for प्रभं); वीर्यसत्ववान्; सत्यवीर्यवान्),

(१) (१)वीक्ष्य; प्राप्य (for प्रेक्ष्य); दीनां (कृष्णां); (४)स्मयते (for स्मयत); महौजाः (अ) मितौजाः),

(२) (२)यान्ति (for सन्ति); ()पि मां (for मी); (३)स्यते प्र; स्मयतेव (for तीव),

(३) (२)प्रहर्षतो मा (for मां); (३)तात (for त्वद्य),

(४) (१)रामः(for राजा); मयैव दृष्टो (for पुरा मयैव) गिरेः पुरा (for दृष्टो गिरेर्),

(५) (२)यमस्य नेता; रणे विजेता; यमस्य जेता निहन्ता; यथेन्द्रः (for च हन्ता); (३)अनयत् (for अनघः); (४)वासं वने; रामो वने; चचार (for चकार),

विहाय भोगानचरद्वनेषु नेशे बलस्येति चरेदधर्मम् ।। १० ।।[(१)]

भूपाश्च नाभागभगीरथादयो महीमिमां सागरान्तां विजित्य।

सत्येन तेऽप्यजयंस्तात लोकान्नेशे बलस्येति चरेदधर्मम् ।। ११ ।।[(२)]

अलर्कमाहुर्नरवर्य सन्तं सत्यव्रतं काशिकरूषराजम् ।

विहाय राज्यानि वसूनि चैव नेशे बलस्येति चरेदधर्मम् ।। १२ ।।[(३)]

धात्रा विधिर्यो विहितः पुराणैस्तं पूजयन्तो नरवय सन्तः ।

सप्तर्षयः पार्थ दिवि प्रभान्ति नेशे बलस्येति चरेदधर्मम् ।। १३ ।।[(४)]

महाबलान्पर्वतकूटमात्रान्विषाणिनः पश्य गजान्नरेन्द्र ।

स्थितान्निदेशे नरवर्य धातुर्नेशे बलस्येति चरेदधर्मम् ।। १४ ।।[(५)]

सर्वाणि भूतानि नरेन्द्र पश्य तथा यथावद्विहितं विधात्रा ।

स्वयोनितः कर्म सदा चरन्ति नेशे बलस्येति चरेदधर्मम्।। [(6)]

सत्येन धर्मेण यथार्हवृत्त्या ह्रिया तथा सर्वभूतान्यतीत्य ।

यशश्च तेजश्च तवापि दीप्तं विभावसोर्भास्करस्येव पाथ ।। १५ ।।[(७)]

यथाप्रतिज्ञं च महानुभाव कृच्छ्रं वने वासमिमं निरुध्य(ष्य)।

---

(१) (१)शक्रप्रतिमप्रभावो; (३)व्यचं (for अचं); (४) नेशो (for नेशे),

(२) (२)भूपा(for नृपां); (३) व्य (for प्यं); (४) नेशो (for नेशे) ,

(३) (१)देव (for वर्य); नरधर्मसेतुं; नरदेववर्यं; नरवर्यमुत्तमं (for नरवर्य सन्तं); सिद्धं; मुक्तं (for सन्तं); (२)करूशं (३)राज्यानि (for राष्ट्राणि); (४)नेशो,

(४) (१)पुराणैस् पुरस्तात् (२)वीर; देव (for वर्य); (३)भ्रमन्ति (for प्रभान्ति); (४)नेशो (for नेशे),

(५) (३)बलिनश्च सर्वान् नरदेव यन्तुर् (for नरवर्य धातुर्); (४)नेशो

(६) (२)तथा (for यथा); यथास्वं (for यथावद्); (३)कुर्वते न (तत्) कर्म सदा (for तत्कुरुते) कर्म समाचरन्ति (for तत्कुरुते प्रं); (आ)चरन्ति स्वभावात्; प्रभावं; स्वभावं ( प्रभा वात्); (४) नेशो

(७) (१)यथार्थं; तथार्यं; यथानुं; (२)श्रिया यथा (for ह्रिया तथा); (३)तव प्रदीप्तं; तथातिदीप्तं,

ततः श्रियं तेजसा तेन दीप्तामादास्यसे पार्थिव कौरवेभ्यः ।। १६ ।।(१)

– –

तमेवमुक्त्वा वचनं महर्षिस्तपस्विमध्ये सहितं सुहृद्भिः ।

आमन्त्र्य धौम्यं सहितांश्च पार्थांस्ततः प्रतस्थे दिशमुत्तरां सः ।। १७ ।।(२)

अस्मिन् कैरातपर्वणि २१अध्याये १७ श्लोकाः सन्ति

कैरातपर्वणि दशमोध्यायः

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अर्जुनाभिगमनपर्वणि द्वैतवनप्रवेशे एकविंशोऽध्यायः ।। २१ ।।

# २२. एकविंशोऽध्यायः

**दाल्भ्येन युधिष्टिरं प्रति ब्राह्मणास्य क्षत्रवृद्धिकारणत्वकथनम् ।। १ ।। महर्षीणां युधिष्टिरभिगमनम् ।। २ ।।**

– –

\ासत्सु वै द्वैतवने पाण्डवेषु महात्मसु ।
अनुकीर्णं महारण्यं ब्राह्मणैः समपद्यत ।। १ ।।(३)

ईर्यमाणेन सततं ब्रह्मघोषेण सर्वशः ।
ब्रह्मलोकसमं पुण्यमासीद्द्वैतवनं सरः ।। २ ।।(४)

यजुषामृचां साम्नां च गद्यानां चैव सर्वशः ।
आसीदुच्चार्यमाणानां निःस्वनो हृदयङ्गमः ।। ३ ।।(५)

---

(१) (१)तु (for च); (३) तेन (for स्वेन); (४)कौरव पार्थिवेभ्यः

(२) (२)सहितः सुं ; नृप धर्मनन्दनं; (३)संमन्त्र्य (for आं)

(३) (१) (अ)थो; वै (for (अ)थ),

(४) (१)पूर्य (for ईर्यें); (२)ब्राह्मणौ घेन सर्वशः,

(५) (१)च (२)भाषाणां चैव; भाष्याणां चैव; निगमानां च; भारत (for सर्वशः); भाष्याणां च

ज्याघोषश्चैव पार्थानां ब्रह्मघोषश्च धीमताम् ।
संसृष्टं ब्रह्मणा क्षत्रं भूय एव व्यरोचत ॥ ४ ॥[१]

अथाब्रवीद्बको दाल्भ्यो धर्मराजं युधिष्ठिरम् ।
सन्ध्यां कौन्तेयमासीनमृषिभिः परिवारितम् ॥ ५ ॥[२]

**दाल्भ्यः**

पश्य द्वैतवने पार्थ ब्राह्मणानां तपस्विनाम् ।
होमवेलां कुरुश्रेष्ठ सम्प्रज्वलितपावकाम् ॥ ६ ॥[३]

चरन्ति धर्मं पुण्येऽस्मिंस्त्वया गुप्ता धृतव्रताः ।
भृगवोऽङ्गिरसश्चैव वाशिष्ठाः काश्यपैः सह ॥ ७ ॥[४]

आगस्त्याश्च महाभागा आत्रेयाश्चोत्तमव्रताः ।
सर्वस्य जगतः श्रेष्ठा ब्राह्मणाः सङ्गतास्त्वया ॥ ८ ॥[५]

इदं तु वचनं पार्थ शृणुष्व गदतो मम ।
भ्रातृभिः सह कौन्तेय यत्त्वां वक्ष्यामि कौरव ॥ ९ ॥[६]

ब्रह्म क्षत्रेण संसृष्टं क्षत्रं च ब्रह्मेणा सह ।
उदीर्णे दहतः शत्रून्वनानीवाग्निमारुतौ ॥ १० ॥[७]

---

सहस्रशः,
(१) (१)चैव पार्थानां; पाण्डवानां च(पाण्डवें) (४)व्यरो चयत्; व्यवर्धत; (अ)भिवर्धत, ०भ्यवर्तत,
(२) (१)तथां(for अथां) (अ)भ्येत्य (for दाल्म्यो),
(३) (२)महात्मनां (for तपं)) (४) पावकं,
(४) (२)महावने; महाव्रताः (for धृतं); (४)कश्यपैः सह; कश्यपः सह; काश्यपास्तथा,
(५) (२)प्रभाः (for व्रताः),
(६) (२)शृणुष्वैकमना; श्रृणुष्व गदतो; (३)सभ्रातृभृत्यः (भार्यः) कौंतेयः (४)त्वां,
(७) (३)उदीर्णे; र्णं

नाब्राह्मणस्तात चिरं बुभूषेदिच्छन्निमं लोकममुं च जेतुम् ।
विनीतधर्मार्थमपेतमोहं लब्ध्वा द्विजं नुदति नृपः सपत्नान्।। ११ ।।[१]

चरन्नैःश्रेयसं धर्मं प्रजापालनकारितम् ।
नाध्यगच्छद्बलिर्लोके तीर्थमन्यत्र वै द्विजात् ।। १२ ।।[२]

अनूनमासीदसुरस्य कामैर्वैरोचनेः श्रीरपि चाक्षयाऽऽसीत् ।
लब्ध्वा महीं ब्राह्मणसम्प्रयोगात्तेष्वाचरन्दुष्टमथो व्यनश्यत् ।। १३ ।।[३]

नाब्राह्मणं भूमिरियं सभूतिर्वर्णं द्वितीयं भजते चिराय ।
समुद्रनेमिर्नमते तु तस्मै यं ब्राह्मणः शास्ति नयैर्विनीतम् ।। १४ ।।[४]

कुञ्जरस्येव सङ्ग्रामे परिगृह्याङ्कुशग्रहम् ।
ब्राह्मणैर्विप्रहीणस्य क्षत्रस्य क्षीयते बलम् ।। १५ ।।[५]

ब्राह्मण्यनुपमा दृष्टिः क्षात्रमप्रतिमं बलम् ।
तौ यदा चरतः सार्धं तदा लोकः प्रसीदति ।। १६ ।।[६]

यथा हि सुमहानग्निः कक्षं दहति सानिलः ।

---

(१) (२)ईक्षन् (for इच्छन्) इमं (for अमुं) इमं अमुं; लोकं जेतुम्; (३)दोषं (for मोहं); (४)जयति; हन्तिः तुदति; भूति (for नुदति) सदा; भूपः(for नृपः),

(२) (१)निश्रेयसं; (२) राज्यं; राजं (for प्रजां); (३)नाभ्यगच्छद्,

(३) (१)ख-सान्या स चैवमसु; घ-सानून, अन्यूनम्; सानूनम् विक्रमैर्; राजन् (for कामो) (for कामैर्); (२)विरोचनेः श्रीरभिकाङ्क्षिता या (४)नष्टा चारो; तेषां चरन् (चिरं); दुःखम् (for दुष्टम्); अथो (for अतो),

(४) (१)सहेत; सहैति (४) नयैर्विनीतं; नयेरितात्मा,

(५) (२)त्यज्यां; हायां (for गृह्यां ); (३)अ-ब्रह्मणाप्रति, ख-एतदादि अर्धपञ्चकं नास्ति, ब्रह्मणैः, सहचारिभिः, इति एकः पादोऽस्ति, ब्र(ब्रा)हाणा विप्रहीणस्य; ब्राह्मणाभिप्रं; (४)हीयते (for क्षीं)

(६) (१) ब्राह्मणान्ना (न्न) परा; ब्राह्मणानुपरा; (२) क्षत्रम्; क्षत्रे अनुपमं; चाप्रतिमं; (४) तदा (for अथ),

तथा दहति राजन्यो ब्राह्मणेन समं रिपुम् ।। १७ ।।(१)

ब्राह्मणेष्वेव मेधावी बुद्धिपर्येषणं चरेत् ।
अलब्धस्य च लाभाय लब्धस्य परिवृद्धये ।। १८ ।।(२)

अलब्धलाभाय च लब्धवृद्धये यथार्हतीर्थप्रतिपादनाय ।
यशस्विनं वेदविदं विपश्चितं बहुश्रुतं ब्राह्मणमेव वासय ।। १९ ।।(३)

ब्राह्मणेषूत्तमा वृत्तिस्तव नित्यं युधिष्ठिर ।
तेन ते सर्वलोकेषु दीप्यते प्रथितं यशः ।। २० ।।(४)

– –

ततस्ते ब्राह्मणाः सर्वे बकं दाल्भ्यमपूजयन् ।
युधिष्ठिरे स्तूयमाने भूयः सुमनसोऽभवन् ।। २१ ।।(५)

द्वैपायनो नारदश्च जामदग्न्यः पृथुश्रवाः ।
इन्द्रद्युम्नो भालुकिश्च कृतचेताः सहस्रपात् ।। २२ ।।(६)

कर्णश्रवाश्च मुञ्जश्च लवणाश्वश्च काश्यपः ।
हारीतः स्थूणकर्णश्च अग्निवेश्योऽथ शौनकः ।। २३ ।।(७)

---

(१) (१)तु; (अ)ति (for हि); (३) चरं (for दह); (४)समं रिपुं; सहा रिषु; ब्राह्मणैः सहितो रिपून् सहचारिभिः सहितोरिषु,

(२) (१)ब्राह्मणो ह्येव; णेष्वेव; णस्यैव (for णेभ्योथ); (२)बुद्धेः बुद्ध्या (for बुद्धि); (४)परिवृद्धचेन् (अ)य विवृं

(३) (१)भावाय (for लाभाय); (२)यथा वदर्हप्र; यथार्हवृद्धप्र; पादनाय च; तपस्विनं (for यशं); विप बहुं वासयेत् (for य),

(४) (१)भक्तिः (for वृत्तिः); (४)प्रथमं; ()प्रतिमं (for प्रथितं),

(५)(४)सर्वे; पुनः (for भूयः),

(६) (३)वालकिश्च; भालकं; भाल्लुकिं; दालुकं; दालुकिं धुत्रो(द्युम्नौ)द्दालु किश्च; (४)हृत चेताः; कृतमेधाः

(७) मार्ज (for मुञ्ज); कण्वश्च लवणाश्चश्च (णश्चव) काश्यपश्च महातपाः (३)तृणं; स्थलं (for

कृतवाक्च सुवाच चैव बृहदश्वो विभावसुः ।
ऊर्ध्वरेता वृषामित्रः सुहोत्रो होत्रवाहनः ।। २४ ।।(१)

एते चान्ये च बहवो ब्राह्मणाः संशितव्रताः ।
अजातशत्रुमानर्चुः पुरन्दरमिवर्षयः ।। २५ ।।(२)

अस्मिन् कैरातपर्वणि २२अध्याये २५श्लोकाः सन्ति

कैरातपर्वणि एकादशोध्यायः

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अर्जुनाभिगमनपर्वणि द्वैतवनप्रवेशे द्वाविंशोऽध्यायः ।। २२ ।।

# २३. त्रयोविंशोऽध्यायः

भीमादिसन्निधाने युधिष्ठिरं प्रति द्रौपद्याः सविषादवचनम् ।।

– –

ततो वनगताः पार्थाः सायाह्ने सह कृष्णया ।
उपविष्टाः कथाश्चक्रुर्दुःखशोकपरायणाः ।। १ ।।(३)

प्रिया च दर्शनीया च पण्डिता च पतिव्रता ।
अत कृष्णा धर्मराजमिदं वचनमब्रवीत् ।। २ ।।(४)

– ÷६

---

स्थूणं); (४)अपि अग्नि; होत्रो (for वैश्यो) कौशिकः (for शौनं),

(१) (१)कृतं (for ऋतं) कृतवास्तु वहश्चैव; ऋतवाग्वसुवाक्यैव; (२) ख-अयं पादोऽनन्तरश्च न स्तः, विभां (for ऋतां); (३) बृहन् (for वृषा),

(२) (२)मुनयः (for ब्राह्मणाः); संश्रितं शंसितं मुनयो ब्राह्मणास्तथा; (३)मान्यन्त अर्चन्तः; आर्छन्त(for आनर्चुः)

(३) (२)कथां चक्रुर्

(४) (३)अथ (for ततः); (४)वचनं चेदमब्रवीत्,

न नूनं तस्य पापस्य दुःखमस्मासु किञ्चन ।
विद्यते धार्तराष्ट्रस्य नृशंसस्य दुरात्मनः ॥ ३ ॥[१]

यस्त्वां राजन्मया सार्धमजिनैः प्रतिवासितम्।
भ्रातृभिश्च तदा सर्वैर्नाभ्यभाषत किञ्चन
वनं प्रस्थाप्य दुष्टात्मा नान्वतप्यत दुर्मतिः ॥ ४ ॥[२]

आयसं हृदयं नूनं तस्य दुष्कृतकर्मणः ।
यस्त्वां धर्मपरं श्रेष्ठं रूक्षाण्यश्रावयत्तदा ॥ ५ ॥[३]
वचनान्यमनोज्ञानि दुर्वाच्यान्रि च संसदि

सुखोचितमदुःखार्हं दुरात्मा ससुहृद्गणः ।
ईदृशं दुःखमानीय मोदते पापपूरुषः ॥ ६ ॥

चतुर्णामेव पापानामस्रं न पतितं तदा ।
त्वयि भारत निष्क्रान्ते वनायाजिनवाससि ॥ ७ ॥[४]

दुर्योधनस्य कर्णस्य शकुनेश्च दुरात्मनः ।
दुर्भ्रातुस्तस्य चोग्रस्य राजन्दुःशासनस्य च ॥ ८ ॥[५]

इतरेषां तु सर्वेषां कुरूणां कुरुसत्तम ।
दुःखेनाभिपरीतानां नेत्रेभ्यः प्रापतज्जलम् ॥ ९ ॥[६]

---

(१) द्रौपधुवाच (for द्रौपदी),
(२) (१)त्वा (for त्वां); (२)परिवारितं वासितं; (वारितः); (३)सहितः(for च तथा); दुर्मेधा (for दुष्टात्मा); नानुतप्यति (त),
(३) (२)तस्यासीत्क्रूरकर्मणः); (३)त्वा (for त्वां) ज्येष्ठं (for श्रेष्ठं),
(४) (२)असूया दृश्य (विद्य)ते त्वयि; अस्त्रं न पन्तितं तदा (भुवि),
(५) (३)दुर्दान्तस्; दुर्हृदस् (for दुर्भ्रातुस्) तव (for तस्य); (४) राचन् (for तथा) वै तु (for च)
(६) (१)च(तु); अथेतरेषां सं; (३) (अ)पि (for (अ)भि;)

इदं च शयनं दृष्ट्वा यच्चासीत्ते पुरातनम् ।
शोचामि त्वां महाराज दुःखानर्हं सुखोचितम् ।। १० ।।[१]

दान्तं यच्च सभामध्य आसनं रत्नभूषितम् ।
दृष्ट्वा कुशवृषीं चेमां शोको मां रुन्धयत्ययम् ।। ११ ।।[२]

यदपश्यं सभायां त्वां राजभिः परिवारितम् ।
तच्च राजन्नपश्यन्त्याः का शान्तिर्हृदयस्य मे ।। १२ ।।

या त्वाहं चन्दनादिग्धमपश्यं सूर्यवर्चसम् ।
सा त्वां पङ्कमलादिग्धं दृष्ट्वा मुह्यामि भारत ।। १३ ।।[३]

या त्वाहं कौशिकैर्वस्त्रैः शुभ्रैराच्छादितं पुरा ।
दृष्टवत्यस्मि राजेन्द्र सा त्वां पश्यामि चीरिणम्।। १४ ।।[४]

यच्च तद्रुक्मपात्रीभिर्ब्राह्मणेभ्यः सहस्रशः ।
ह्रियते ते गृहादन्नं संस्कृतं सार्वकामिकम् ।। १५ ।।[५]

यतीनामगृहाणां ते तथैव गृहमेधिनाम्।
दीयते भोजनं राजन्नतीवगुणवत्प्रभो ।। १६ ।। [६]

तच्च राजन्नपश्यन्त्याः का शान्तिर्हृदयस्य मे ।। १७ ।।

सत्कृतानि सहस्राणि सर्वकामैः पुरा गृहे।

---

(१) (३)त्वा (for त्वां); बाहो ( राज) (४)दृष्ट्वा भूतलशायिनं,
(२) (३)बृषीं बृशीं एतां; चैतां (for चेमां); (४)मा (for मां); मन्थय; प्रदहं दारयं (for रुन्धयं ),
(३) (१)त्वा श्त्रक्; त्वा सच् (for त्वाहं); (३)त्वां (for त्वा),
(४) (१)या त्वाहं; या त्वां वै; या वै त्वां या वीतं; (२) क-ख-शतैः पुरा, शुभैर् (for शुभ्रैर्); आच्छादितं (बहुविधैः); बहुशतैः (for बहुधनैः); (४)सा त्वां; साद्य; साहं,
(५) (१)ते (for तद्); (३)दीयते(for हि); च; त्वद्; वै (for ते); (४)सार्वकालिकं,
(६) (१)च; तु (for ते); यतीनां (for दीयते),

सर्वकामैः सुविहितैर्यदपूजयथा द्विजान्।

यत्ते भ्रातन्महाराज युवानो मृष्टकुण्डलाः ।
अभोजयन्त मिष्टान्नैः सूदाः परमसंस्कृतैः ॥ १८ ॥(१)

सर्वांस्तानद्य पश्यामि वने वन्येन जीविनः ।
अदुःखार्हान्मनुष्येन्द्र नोपशाम्यति मे मनः ॥ १९ ॥(२)

भीमसेनमिमं चापि दुःखितं वनवासिनम् ।
ध्यायतः किं न मन्युस्ते प्राप्ते काले विवर्धते ॥ २० ॥(३)

भीमसेनं हि कर्माणि स्वयं कुर्वाणमन्युतम् ।
सुखार्हं दुःखितं दृष्ट्वा कस्मान्मन्युर्न वर्धते ॥ २१ ॥(४)

सत्कृतं विविधैर्यानैर्वस्त्रैरुच्चावचैस्तथा ।
तं ते वनगतं दृष्ट्वा कस्मान्मन्युर्न वर्धते ॥ २२ ॥(५)

अयं कुरून्रणे सर्वान्हन्तुमुत्सहते प्रभुः ।
त्वत्प्रतिज्ञां प्रतीक्षंस्तु सहतेऽयं वृकोदरः ॥ २३ ॥(६)

योऽर्जुनेनार्जुनस्तुल्यो द्विबाहुर्बहुबाहुना ।
शरावमर्दे शीघ्रत्वात्कालान्तकयमोपमः ॥ २४ ॥(७)

---

(१) (१)यत्ते (for यांस्ते); (२)कुण्डलान्; (३)अभोजयंश्च; मिष्टान्नैः; निष्ठान्नैः (४)सत्कृताः,
(२) (१)पश्यन्त्या (for पश्यामि); (२)जीविनः; जीवितान् (for जीवतः),
(३) (१)श्रुत्वा; दृष्ट्वा(for चापि); (३)ध्यायतः(नु)(for न); (४)प्राप्तकाले न (for वि),
(४) (२)मच्युतं; असुखं (for दुःखितं); (४) कथं (for कस्मान्); कस्माद्राजन्नपेक्षखे,
(५) (१)क-सत्कृतंविविधैर्मान्यैर् ; ख-अर्धद्वयं नास्ति; , घ-संस्कृतं विविधैर्मान्यैर् वाक्यै, ज्ञानैर्; मान्यैर्; मानैर् यानैर्; (२)वाक्यैर् (for वस्त्रैर्); (४)कथं (for कस्मान्),
(६) (१)ह्ययं (for हि यः); अयं कुरुन्रणे सर्वान् ; (२) भृशं (for प्रभुः); (३) त्वव्यतिज्ञां; (३)क्षमं (for सह),
(७) (३)शरावसर्गे; शरावमर्दे; शरान्विसर्गे शीघ्रास्त्रो; स्त्रे; स्त्रः,

यस्य शस्त्रप्रतापेन प्रणताः सर्वपार्थिवाः ।। २५ ।।

यज्ञे तव महाराज ब्राह्मणानुपतस्थिरे।

तमिमं पुरुषव्याघ्रं पूजितं देवदानवैः ।

ध्यायन्तमर्जुनं दृष्ट्वा कस्माद्राजन्न कुप्यसि ।। २६ ।।[(१)]

दृष्ट्वा वनगतं पार्थमदुःखार्हं सुखोचितम् ।

न च ते वर्धते मन्युस्तेन मुह्यामि भारत ।। २७ ।।[(२)]

यो देवांश्च मनुष्यांश्च सर्पांश्चैकरथोऽजयत् ।

तं ते वनगतं दृष्ट्वा कस्मान्मन्युर्न वर्धते ।। २८ ।।[(३)]

यो यानैरद्भुताकारैर्हयैर्नागैश्च संवृतः ।

प्रसह्य वित्तान्यादत्त पार्थिवेभ्यः परन्तप ।। २९ ।।[(४)]

क्षिपत्येकेन वेगेन पञ्चबाणशतानि यः ।

तं ते वनगतं दृष्ट्वा कस्मान्मन्युर्न वर्धते।। ३० ।।

श्यामं बृहन्तं तरुणं चर्मिणामुत्तमं रणे ।

नकुलं ते वने दृष्ट्वा कस्मान्मन्युर्न वर्धते।। ३१ ।।[(५)]

दर्शनीयं च शूरं च माद्रीपुत्रं युधिष्ठिर ।

सहदेवं वने दृष्ट्वा कस्मात्क्षमसि पार्थिव ।। ३२ ।।

नकुलं सहदेवं च दृष्ट्वा ते दुःखितावुभौ।

---

(१) (४)कस्माद्राजन्न कुप्यसि (से),

(२) (२)दुःखानई (for अदुःखार्हं); (३)विद्यं (for वर्धं); न वर्धते च मन्मुखे,

(३) (२)सर्पान् ; यक्षान्; सर्वान् ; च

(४) (२)हय नागै; (३) क-ख-योऽगृह्णात् - पा, रत्नं योगृह्णात्; वित्तं गृह्वी यात्; (४)पार्थिवानां परन्तप

(५) (२)धन्विनाम्; धर्मिणाम् वर्मि (for चर्मि),

अदुःखार्हौ मनुष्येन्द्र दृटष्ट्वा दुखवक्षानुगौ ।
धृष्टद्युम्नस्य भगिनीं वीरपत्नीमनुव्रताम् ।।

दृष्ट्वा वनगतान्पार्थानदुःखार्हान्सुखोचितान्।
न च ते वर्धते मन्युस् तेन मुह्यामि भारत ।। ३३ ।।(१)

द्रुपदस्य कुले जातां स्नुषां पाण्डोर्महात्मनः ।
मां वै वनगतां दृष्ट्वा कस्मात्क्षमसि पार्थिव ।
नूनं च तव वै नास्ति मन्युर्भरतसत्तम।। ३४ ।।(२)

त्यक्तवांस्त्वं विनाशाय व्यक्तं भृगुपतिर्यथा
यत्ते भ्रातंश्च मां चैव दृष्ट्वा न व्यथते मनः ।। ३५ ।।
for This Stanga is Interchenged in TRK after 34.(3)

न निर्मन्युः क्षत्रियोऽस्ति लोके निर्वचनं स्मृतम् ।
तदद्य त्वयि पश्यामि क्षत्रिये विपरीतवत् ।। ३६ ।।(४)

यो न दर्शयते तेजः क्षत्रियः काल आगते ।
सर्वभूतानि तं प्रार्थ सदा परिभवन्त्युत।। ३७ ।।

तत्त्वया न क्षमा कार्या शत्रून्प्रति कथञ्चन ।
तेजसैव हि ते शक्या निहन्तुं नात्र संशयः ।। ३८ ।।(५)

---

(१) वै (for ते); (४)कस्मात्क्षमसि पार्थिव
(२) (३)वै नास्ति (for नैवास्ति )
(३) (१) अ-क-घ-० मात्मविनाशाय व्यक्तं भृगुपतिर्यथा ।,त्यक्त्वा (for व्यक्तं) (४)व्यथितं (for व्यथते),
(४) (१)नामन्युः क्षत्रियोस्तीति (२)महत् (for स्मृतम्),
(५) (१)न (for तत्); तु (for न); न च क्षमा त्वया कार्या; (३)शक्यास्ते; (४)नियन्तुं (for निहन्तुं),

तथैव यः क्षमाकाले क्षत्रियो नोपशाम्यति ।
अप्रियः सर्वभूतानां सोऽमुत्रेह च नश्यति।। ३९ ।।

**अस्मिन् कैरातपर्वणि २३अध्याये ३९श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अर्जुनाभिगमनपर्वणि द्रौपदीपरितापवाक्ये त्रयेविंशोऽध्यायः ।। २३ ।।

## महाभारततात्पर्यनिर्णये २२ अध्याये

एवं सदा विष्णुपरायणानां तत्प्रार्पणान्नैकभुजां प्रयातः ।
संवत्सरस्तत्र जगाद कृष्णा भीमाज्ञया धर्मराजं सुवत्त्री ।। ६० ।।
अतिमार्दवयुक्तत्वाद् धर्मराजश्चतुर्दशे ।
अपि वर्षे गुरुभयाद् राज्यं नेच्छेदिति प्रभुः ।
मारुतिः प्रेषयामास कृष्णां प्रस्तावहेतवे ।। ६१ ।।
क्षमा सर्वत्र धर्मो न पापहेतुश्च दुर्जने ।
राज्ञां सामर्थ्ययुक्तानामिति संस्थाप्य शास्त्रतः ।। ६२ ।।
हत्वा चतुर्दशे वर्षे धार्तराष्ट्रानराज्यदान् ।
कर्तुं राज्यं पुरो गन्ता भवानीत्यग्रजेन ह ।। ६३ ।।
कारयन् सत्यशपथं विवादस्य क्रमेच्छया ।
आदिशत् प्रथमं कृष्णां भीमः सा नृपमब्रवीत् ।। ६४ ।।

## २४. चतुर्विंशोऽध्यायः

द्रौपद्या युधिष्ठिरं प्रति कालभेदेन क्षमाकोपयोरवश्याश्रयणीयत्वे प्रमाणतया बलिप्रह्लादसं०
ादानुवादपूर्वकं प्रकुते कोपस्यावश्यादरणीयत्वेक्तिः ।। १ ।।

– ÷६

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
प्रह्लादस्य च संवादं बलेर्वैरोचनस्य च ॥ १ ॥

असुरेन्द्रं महाप्राज्ञं धर्माणामागतागमम् ।
बलिः पप्रच्छ दैत्येन्द्रं प्रह्लादं पितरं पितुः ॥ २ ॥[१]

बलिः
क्षमा स्विच्छ्रेयसी तात उताहो तेज इत्युत ।
एतन्मे संशयं तात यथावद्ब्रूहि पृच्छत ॥ ३ ॥[२]

श्रेयो यदत्र धर्मज्ञ ब्रूहि मे तदसंशयम् ।
करिष्यामि हि तत्सर्वं यथावदनुशासनम् ॥ ४ ॥

–   ÷ः

तस्मै प्रोवाच तत्सर्वमेवं पृष्टः पितामहः ।
सर्वनिश्चयवित्प्राज्ञः संशयं परिपृच्छते ॥ ५ ॥

प्रह्लादः
न श्रेयः सततं तेजो न नित्यं श्रेयसी क्षमा ।
इति तात विजानीहि द्वयमेतदसंशयम् ॥ ६ ॥[३]

यो नित्यं क्षमते तात बहून्दोषान्स विन्दति ।
भृत्याः परिभवन्त्येनमुदासीनास्तथारयः ॥ ७ ॥[४]

---

(१) (१)त्मानं (for प्राज्ञं); (२)अद्भुता (for आगतां); (३) दैत्येन्द्रः (४) प्रहादं,
(२) बलिरूवाच (१) (अ)स्ति वा (for स्वित्) तेजः (for तात); (२)चात्र मे संशयो महान्; तेजो वासुर सत्तम); (३)यथा (for एतन्); संशयम् (for यं); तन्मेपरिमितप्रज्ञ; (४)तथात्वं (for यथावद्) संशयं परिपृच्छतः; सम्यक्प्रब्रूहि पृच्छते,
(३) प्रह्लाद उं (२) श्रेयसे मया (for सी क्षमा); यो नित्यं यः स्वयं क्षमी ) (४)यद् द्वयं तदसंशय ,
(४) (३)भूताः( भृत्याः) (४)तथारयः (for तथैव च),

सर्वभूतानि चाप्यस्य न नमस्ति कदाचन ।
तस्मान्नित्यं क्षमा तात पण्डितैरपि वर्जिता ।। ८ ।।[१]

अवज्ञाय हि तं भृत्या भजन्ते बहुदोषताम् ।
आदातुं चास्य वित्तानि प्रार्थयन्तेऽल्पचेतसः ।। ९ ।।[२]

यानं वस्त्राण्यलङ्काराञ्छयनान्यासनानि च ।
भोजनान्यथ पानानि सर्वोपकरणानि च ।। १० ।।[३]

**आददीरन्नधिकृता यथाकाममचेतसः ।**

प्रदिष्टानि च देयानि न दद्युर्भर्तृशासनात् ।। ११ ।।[४]

न चैनं भर्तृपूजाभिः पूजयन्ति कथश्चन ।
अवज्ञानं हि लोकेऽस्मिन्मरणादपि गर्हितम् ।। १२ ।।[५]

क्षमिणं तादृशं तात ब्रुवन्ति कटुकान्यपि ।
प्रेष्याः पुत्राश्च भृत्याश्च तथोदासीनवृत्तयः ।। १३ ।।[६]

अथास्य दारानिच्छन्ति परिभूय क्षमावतः ।
दाराश्चास्य प्रवर्तन्ते यथाकाममचेतसः ।। १४ ।।[७]

तथा च नित्यमुदिता यदि नाल्पमपीश्वरात् ।

---

(१) (२) ख-घ-नमन्ति ; (४)परिवर्जिता; अपि वर्जिता (for अपवा दिता),
(२) (१)च (for हि); (२)दोषवान्; दोषतः; (४)तेजसः (for चेतसः),
(३) (१)वस्त्रम् अलङ्कारं; (२)आसनं शयनानि च; (३) माल्या (for पानां),
(४) (२)तेजसः (for चेतसः),
(५) (१)तत्र (for भर्तृ); (२)पूजयेयुः कथश्चन; (३)अवज्ञातं,
(६) (१)क्षमिणां तादृशां ; (२) च (for (अ)( पि); (३)पुत्रां भृत्यां दासां (for भृत्यां),
(७) (१)अथास्य; अवाप्य (for अप्यस्य); (२)भोक्तुं(for भूय); (३) न निवं; ) (अ)प्यतिवं (अ)स्यप्रवं); (४) तेजसः (for चेतसः),

दण्डमर्हन्ति दुष्यन्ति दुष्टाश्चाप्यपकुर्वते।[१]
एते चान्ये च बहवो नित्यं दोषाः क्षमावताम् ।। १५ ।।

अथ वैरोचने दोषानिमान्विद्ध्यक्षमावताम्।

अस्थाने यदि वा स्थाने सततं रजसाऽऽवृतः ।
क्रुद्धो दण्डान्प्रणयति विविधान्स्वेन तेजसा ।। १६ ।।[२]

मित्रैः सह विरोधं च प्राप्नुते तेजसाऽऽवृतः ।
आप्नोति द्वेष्यतां चैव लोकात्स्वजनतस्तथा ।। १७ ।।[३]

सोऽवमानादर्थहानिमुपालम्भमनादरम् ।
सन्तापद्वेषमोहांश्च शत्रूंश्च लभते नरः ।। १८ ।।[४]

क्रोधाद्दण्डान्मनुष्येषु विविधान्पुरुषोऽनयात् ।
भ्रश्यते शीघ्रमैश्वर्यात्प्राणेभ्यः स्वजनादपि ।। १९ ।।[५]

योपकर्तंश्च हर्तंश्च तेजसैवोपगच्छति ।
तस्मादुद्विजते लोकः सर्पाद्वेश्मगतादिव ।। २० ।।[६]

---

(१) (२)नाल्पाम्; नाल्पम्; स्वल्पाम्; (३)हानिम् (for दण्डम्); अर्छन्ति; ऋच्छन्ति; इच्छन्ति (for अर्हन्ति) दूष्यन्ति; द्विष्यन्ति ; (४)स्वामिनश्चापि (प) कुर्वते,

(२) (१)ह्य(()प्य) पि च(for यदि वा); (२)चानुगामिनि (नी; नीं);(for रजं); (४) विविधांस्तेजसावृत्तः,

(३) यो नित्यं (for प्राप्नुते); तमसां; (३)आप्नति; लोके (for चैव); (४) भृत्यात् (for लोकात्); लोकस्यात्मन एव च,

(४) (१)मानार्थलोपौ (भौ) च; सावमानाच्च हानिं च; मानार्थहानिं च; मानाव लेपौ च; मानार्थलोपो वा (२) उपलम्भं (अ)प्युपालम्भं; सोपालम्भं (for उपां) वाच्यता(for च्युत); मेष्यती ति च; (३) द्वेषमोहाश्च; लोभमोहांश्च (मोहलोभांश्च),

(५) (१)उग्रान् (for दण्डान्;) (२)अनयानयं; पुरुषोदयात्; षोनयात्; (४)प्रजां (for प्राणे),

(६) (१)सोपकर्तृंश्च (सोपि क्रराण्डश्च); स्व (च); हर्तृं (हंर्तृं); शत्रूं (कर्तृं),

यस्मादुद्विजते लोकः कथं तस्य भवो भवेत् ॥ २१ ॥[१]

अन्तरं तस्य दृष्ट्वैव लोको विकुरुते ध्रुवम् ।
तस्मान्नात्युत्सृजेत्तेजो न च नित्यं मृदुर्भवेत् ॥ २२ ॥[२]

काले काले तु सम्प्रप्ते मृदुस्तीक्ष्णोऽपिवा भवेत्।[3]

काले मृदुर्यो भवति काले भवति दारुणः ।
स वै सुखमवाप्नोति लोकेऽमुष्मिन्निहैव च ॥ २३ ॥[४]

क्षमाकालांस्तु वक्ष्यामि शृणु मे विस्तरेण तान् ।
ये ते नित्यमसन्त्याज्या यथा प्राहुर्मनीषिणः ॥ २४ ॥[५]

पूर्वोपकारी यस्ते स्यादपराधे गरीयसि ।
उपकारेण तत्तस्य क्षन्तव्यमपराधिनः ॥ २५ ॥[६]

अबुद्धिमाश्रितानां तु क्षन्तव्यमपराधिनाम् ।
न हि सर्वत्र पाण्डित्यं सुलभं पुरुषेण वै ॥ २६ ॥[७]

अथ चेद्बुद्धिजं कृत्वा ब्रूयुस्ते तदबुद्धिजम् ।
पापान्स्वल्पेऽपि तान्हन्यादपराधे तथानृजून् ॥ २७ ॥[८]

---

(१) (१)च उद्विजते; (२)सुखं (for कथं) कथं; रतिर् (for भवो); (३) तस्य; स्वं (for ह्यं),

(२) (१)क्रमं (for कुरुं); (अ)भि (for (अ)ति );(अ)पि( च),

(३) ()पि (for तु); ()थ (for पि)

(४) (३)स तु वै सुखमाप्नोति) (४)लोकेस्मिंश्च परत्र च,

(५) (१)च (for तु); (२)वै(for तान्); (३)ते तु; एते (for ये ते); एते न नित्यं सन्त्याज्याः,

(६) (१)ते स्यात्; स्वस्य(for तु स्यात्); (२)स्वापराधे); (३)पूर्वोपकारी(रे)(for उपकारेण); (४) अपराधितं; नं

(७) (१)तु; हि (for च); (२)राधितं (३) तु (for हि); (४)पुरुषैरिह,

(८) (३)पापे त्वल्पे; पापेत्यल्पे; पापेष्वल्पे; पापे स्वल्पे (for पापानस्वल्पे); तु (for पि ) (४) अपरास्ते; अपारो ये (for अपराधे); ततों (for तथां); अपराधकृते यदिं,

सर्वस्यैकोऽपराधस्ते क्षन्तव्यः प्राणिनो भवेत् ।
द्वितीये सति वध्यस्तु स्वल्पेऽप्यपकृते भवेत् ।। २८ ।।(१)

अजानता भवेत्कश्चिदपराधः कृतो यदि ।
क्षन्तव्यमेव तस्याहुः सुपरीक्ष्य परीक्षया ।। २९ ।।(२)

मृदुना दारुणं हन्ति मृदुना हन्त्यदारुणम् ।
नासाध्यं मृदुना किञ्चित्तस्मात्तीव्रतरं मृदु ।। ३० ।।(३)

देशकालौ तु सम्प्रेक्ष्य बलाबलमथात्मनः ।
अन्वीक्ष्य कारणं चैव कार्यं तेजः क्षमापि वा ।। ३१ ।।

नादेशकाले किञ्चित्स्याद्देशकालौ प्रतीक्षताम् ।
तथा लोकभयाच्चैव क्षन्तव्यमपराधिनः ।। ३२ ।।

This Stange is Interchanged in TRK after 31.(4)

एत एवंविधाः कालाः क्षमायाः परिकीर्तिताः ।
अतोऽन्यथानुवर्तत्सु तेजसः काल उच्यते ।। ३३ ।।(५)

– ÷ ९

तदहं तेजसः कालं तव मन्ये नराधिप ।
धार्तराष्ट्रेषु लुब्धेषु सततं चापकारिषु ।। ३४ ।।(६)

---

(१) (१)तु (for ते); द्वितीयस्त्वथ वध्योसौ,
(२) (४)परीक्ष्यवाः क्षकाः; क्षकैः; क्षितान् तेषां वै; सुपरीक्षयाः,
(३) दारुणं (for मार्दवं); (अ)दारुणं(for दारूणम्); (४)तीव्र (क्ष्ण)तरं मृदु; तीक्ष्णतरं मृदुः
(४) क्षमावता (for क्षमापि वा);)(४)देशकालः (लौ) प्रतीक्ष्यते; देशकालः (लं)समीक्षते; देशकालौ प्रतीक्षतां); देशं ( श) कालं समीक्ष्य वै चापि (for चैव); अपराधितं (नं),
(५) (१)एवमेवविधाः; एवं बहुविधा; अत एवंविधाः (३)तु(for (अ)नु )(अ)नुवर्वस्व; वर्तव्ये; प्रवर्तस्तु; (अ)न्ववर्तत्सु; विवृत्तस्तु; सुवर्तते; तु वर्तस्तु (४) आगते इष्यं (for उच्यं),
(६) (२)जना (for नरां),

न हि कश्चित्क्षमाकालो विद्यतेऽद्य कुरून्प्रति ।
तेजसश्चागते काले तेज उत्स्रष्टुमर्हसि ।। ३५ ।।(१)

मृदुर्भवत्यवज्ञातस्तीक्ष्णादुद्विजते जनः ।
काले प्राप्ते द्वयं चैतद्यो वेद स महीपतिः ।। ३६ ।।(२)

**अस्मिन् कैरातपर्वणि २४अध्याये ३६श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अर्जुनाभिगमनपर्वणि चतुर्विंशोऽआयायः ।। २४ ।।

**महाभारततात्पर्यनिर्णये २२ अध्याये**

नैव क्षमा कुजनतासु नृपस्य धर्मस्तां त्वं वृथैव धृतवानसि सर्वकालम् ।
इत्युक्त आह नृपतिः परमा क्षमैव सर्वत्र तद्धिधृतमेव जगत् समस्तम् ।। ६५ ।।
कर्ता च सर्वजगतः सुखदुःखयोर्हि
तस्मान्न कोपविषयोऽस्ति कुतश्च कश्चित्
तस्मात् क्षमैव सकलेषु परोऽस्य धर्मः ।। ६६ ।।
इत्युक्तवन्तं नृपमाह पार्षती यदि क्षमा सर्वनरेषु धर्मः ।
राज्ञा न कृत्यं न च लोकयात्रा भवेज्जगत् कापुरुषैर्विनश्येत् ।। ६७ ।।

## २५.पञ्चविंशोऽध्यायः

**युधिष्ठिरेण द्रौपदीं प्रति क्रोधे बहुदोषोद्भावनपूर्वकं क्रोधगर्हणम् ।।**

युधिष्ठिरः
क्रोधो हन्ता मनुष्याणां क्रोधो भावयिता पुनः ।

(१) (१)किञ्चित् (for कश्चित्) ; (२)तान्; ()त्र; च(for द्य; (३) तेजसामागते; (४)तचुत्स्त्रष्टुमिहार्ईसि,
(२) (१)अनुं; अविं (for अवं); (२)नरः (for जनः) (३)कालप्राप्तं काले प्राप्तं; दाने प्राप्ते; प्राप्ते काले क्षमा (for दूयं); चैतदू; चैव (for ह्येतदू); (४)वेति (for वेद),

इति विद्धि महाप्राज्ञे क्रोधमूलौ भवाभवौ ।। १ ।।(१)

यो हि संहरते क्रोधं भवस्तस्य सुशोभने।
अभावकारणं तस्मात्क्रोधो भवति शोभने ।। २ ।।

यः पुनः पुरुषः क्रोधं नित्यं न सहते शुभे ।
तस्याभावाय भवति क्रोधः परमदारुणः ।। ३ ।।(२)

यो न संहरते क्रोधं तस्याभावो भवत्युत (3)

क्रोधमूलो विनाशो हि प्रजानामिह दृश्यते ।
तत्कथं मादृशः क्रोधमुत्सृजेल्लोकनाशनम् ।। ४ ।।(४)

क्रुद्धः पापं नरः कुर्यात्क्रुद्धो हन्याद्गुरूनपि ।
क्रुद्धः परुषया वाचा श्रेयसोऽप्यवमन्यते ।। ५ ।।(५)

\ाच्यावाच्ये हि कुपितो न प्रजानाति कर्हिचित् ।
नाकार्यमस्ति क्रुद्धस्य नावाच्यं विद्यते तथा ।। ६ ।।(६)

हिंस्यात्क्रोधादवध्यांस्तु वध्यान्सम्पूजयीत च ।
आत्मानमपि च क्रुद्धः प्रेषयेद्यमसादनम् ।। ७ ।।(७)

---

(१) वैशम्पायन उवाच द्रौपद्या वचनं श्रुत्वा श्लक्ष्णाक्षरपदं शुभम् उवाच द्रौपदीं राजा स्मयमानो युधिष्ठिरः कारणे भवती क्रुद्धा धार्तराष्ट्रस्य दुर्मतेः येन क्रोधं महाप्राज्ञे बहुधा बहु मन्यसे क्रोधं मूलहरं शत्रुं कारणैः श्रृणु तं मम महाप्रज्ञे,

(२) (१)संसहते (२)भवं; भवां (for भावं) भावः तस्य शुभानने,

(३) अभावकरणं तस्मात्कोधो भवति शोभने कोपं (for क्रोधं); (४)विसृजते (संहरं) (for न सहं); तस्याभवाय,

(४) (४)विसृं (for उत्सृं),

(५) (१) न कुर्यात्कः; न कः कुर्यात्

(६) (१)वाच्चो; वाच्यौ; वाच्यं (for वाच्ये); (४)नावध्यं (for वाच्यं),

(७) (१)तु(for च); (२)सम्पूज चेत च; यति च; येत्ततः) (३)वा (for च),

एतान्दोषान्प्रपश्यद्भिर्जितः क्रोधो मनीषिभिः ।
इच्छद्भिः परमं श्रेय इह चामुत्र चोत्तमम् ।। ८ ।।

तं क्रोधं वर्जितं धीरैः कथमस्मद्विधश्चरेत् ।
एतद्द्रौपदि सन्धाय न मे मन्युः प्रवर्धते ।। ९ ।।[१]

आत्मानं च परांश्चैव त्रायते महतो भयात् ।
क्रुध्यन्तमप्रतिक्रुध्यन्द्वयोरेष चिकित्सकः ।। १० ।।[२]

मूढो यदि क्लिश्यमानः क्रुध्यतेऽशक्तिमान्नरः ।
बलीयसां मनुष्याणां त्यजत्यात्मानमात्मना ।। ११ ।।[३]

तस्यात्मानं सन्त्यजतो लोका नश्यन्त्यनात्मनः ।
तस्माद्द्रौपद्यशक्तस्य मन्योर्नियमनं स्मृतम् ।। १२ ।।[४]

विद्वांस्तथैव यः शक्तः क्लिश्यमानो न कुप्यति ।
अनाशयित्वा क्लेष्टारं परलोके च नन्दति ।। १३ ।।[५]

तस्माद्बलवता चैव दुर्बलेन च नित्यदा ।
क्षन्तव्यं पुरुषेणाहुरापत्स्वपि विजानता ।। १४ ।।[६]

मन्योर्हि विजयं कृष्णे प्रशंसन्तीह साधवः ।

---

(१) (१)निर्जितं; विजिं; निश्च (for वर्जि); वीरैः (for धीरैः); तं क्रोधं विक्रमं धीरैः (३) संस्मृ (हृ) त्य (for सन्धाय); (४)प्रवर्तते,

(२) (१) च परान्; अपरान् (for च परं); (४) जयेल्लोकांश्च शाश्चतान्,

(३) (२)कुरुते; कुप्यं; क्लिश्यं (for क्रुध्यं); (४) आत्मना (for अन्ततः); आत्मनैव विपद्यते,

(४) (१)परित्यज्य (for सत्यं ); (२) अचेतसः (for अनात्मनः),

(५) (१)तु चैव (for तथैव); (२)क्लेश्यमानो प्र(for न) (३) अ(वि) (स) नाशयति द्वेष्टारं; क्षेप्तारं; (४)परलोकं स; परलोकेषु स; न; तु (for च); विन्दति; विन्दते; निन्द्यते (for नन्दति),

(६) (२)नित्यशः; तः (४)विपश्चिता (for विजानता),

क्षमावतो जयो नित्यं साधोरिह सतां मतम्।[१]
सत्यं चानृततः श्रेयो नृशंस्याच्चानृशंसता ।। १५ ।।[२]

तमेवं बहुदोषं तु क्रोधं साधुविवर्जितम् ।
मादृशः प्रसृजेत्कस्मात्सुयोधनवधादपि ।। १६ ।।[३]

तेजस्वीति यमाहुर्वै पण्डिता दीर्घदर्शिनः ।
न क्रोधोऽभ्यन्तरस्तस्य भवतीति विनिश्चितम्।। १७ ।।[४]

यस्तु क्रोधं समुत्पन्नं प्रज्ञया प्रतिबाधते ।
तेजस्विनं तं विद्वांसो मन्यन्ते तत्त्वदर्शिनः ।। १८ ।।[५]

क्रुद्धो हि कार्यं सुश्रोणि न यथावत्प्रपश्यति ।
नाकार्यं न च मर्यादां नरः क्रुद्धोऽनुपश्यति ।। १९ ।।[६]

हन्त्यवध्यानपि क्रुद्धो गुरून्क्रुद्धस्तुदत्यपि ।
तस्मात्तेजसि कर्तव्यः क्रोधो दूरे प्रतिष्ठितः ।। २० ।।[७]

दाक्ष्यं ह्यमर्षः शौर्यं च शीघ्रत्वमिति तेजसः ।

---

(१) (२) वःहि (for (ह)व) (४)इति ( इह) मतः मतम्

(२) (१)चैवानृ तात् (for चानृततः) सत्याच्चानृतमश्रेयो); (२) नृशंस्याच्चा; नृशंसायनृशंसता; योनृशन्त्यो नृशंसतः

(३) (१) तदेवं (४) सद्भिर् (for साधु); विं ( प्रं) को वै (for कस्मातु) भयाद् (for वधाद्); सर्वलोकविनाशनं,

(४) (१)तेजस्विनं (for स्वीति); यदाहुर्; तदाहुर् ) हि (for वै); (३)ह्यन्तरं; ()भ्यन्तरं तत्र(for तस्य),

(५) (२)परि (for प्रति); (३)विदुषो (for विद्वांसो),

(६) (१)क्रोधो; क्रोधी (for क्रुद्धो); (३)नाकार्यं,

(७) (२)क्रुद्धम् (वृद्धं) (for रूक्षैस्) ; (३)श्रेयसि(for तेजं); कर्तव्यः (for व्ये) तस्मात्तेजस्विभिर्नित्यं; (४) दूरे दूर (for दूरात्); विवर्जितः (for प्रतिं),

गुणाः क्रोधाभिभूतेन न शक्याः प्राप्तुमञ्जसा ॥ २१ ॥[१]

क्रोधं त्यक्त्वा तु पुरुषः सम्यक्तेजोऽभिपद्यते ॥ २२ ॥

कालयुक्तं महाप्राज्ञे क्रुद्धैस्तेजः सुदुःसहम्।[२]
क्रोधस्त्वपण्डितैः शश्वत्तेज इत्यभिनिश्चितम् ॥ २३ ॥

रजस्तु लोकनाशाय विहितं मानुषं प्रति।[३]
तस्माच्छश्वत्त्यजेत्क्रोधं पुरुषः सम्यगाचरन् ॥ २४ ॥

श्रेयान्स्वधर्मानपगो न क्रुद्ध इति निश्चितम्।[४]
यदि सर्वमबुद्धीनामतिक्रान्तमचेतसाम् ॥ २५ ॥[५]

अतिक्रमो मद्विधस्य कथंस्वित्स्यादनिन्दिते।
यदि न स्युर्मानुषेषु क्षमिणः पृथिवीसमाः ।
न स्यात्सन्धिर्मनुष्याणां क्रोधमूलो हि विग्रहः ॥ २६ ॥[६]

अभिषक्तो ह्यभिषजेदाहन्याद्गुरुणा हतः ।
एवं विनाशो भूतानामधर्मः प्रथितो भवेत् ॥ २७ ॥[७]

---

(१) (१)दाक्षिण्यमर्ष; दाक्ष्यं मर्ष च; दाक्ष्यमक्षश्च (for दाक्ष्यं ह्यमर्षः) ह्यमर्षं शौंडीर्यं (र्ष शौर्यं च) (२) शीघ्रत्वाद् अति; असि; अपि (for इति);चेतसि (for तेजसः),

(२) (३)प्रज्ञे; प्राज्ञैः; प्राज्ञः (for प्राज्ञे); (४)सम्यक् (for क्रुद्धैस्); तु (for सु) दुर्लभं (for दुःसहम्),

(३) (१)पडितैः; पुरुषैः;(अ)पण्डितैः पुमांसः पण्डिताः क्रोधः; पुमांसो (सं)पण्डिताः क्रोधं (२)निश्चितं; जानते (for धीयते); क्रोध इत्यवजायते; (३)राज्ञि; राज्ञः; तेज; राजन् (for रजः) तु (ते); (for तल्); (४) मानुषं प्रति,

(४) (१)नित्यं त्यजेत्; शक्तस्त्वजेत्; समुत्सृ जेत् (for शश्वत्त्वजेत्); (३)स्वधर्मादपगो; र्मादपि यो; र्मणि रतो; र्मानुवशो; र्मनुचरो,

(५) (१)यतः; इति (for यदि); अबुद्धानाम्; (२) अचेतसां (for अमेधसाम्); (४)हि स्याद्; स्यात्स्विद् स्याम्लिद्; चिस्स्याद्,

(६) (१)मानुषेषु; (३)सिद्धिर् ; (for सन्धिर्),

(७) (४)अधर्मः (र्मः) प्रतिमो; अधर्मप्रभवो,

आक्रुष्टः पुरुषः सर्वं प्रत्याक्रोशेदनन्तरम् ।
प्रतिहन्याद्धतश्चैव तथा हिंस्याच्च हिंसितः ।। २८ ।।(१)

हंन्युर्हि पितरः पुत्रान्पुत्राश्चापि तथा पितन् ।
हन्युश्च पतयो भार्याः पतीन्भार्यास्तथैव च ।। २९ ।।(२)

एवं सङ्कुपिते लोके शमः कृष्णे न विद्यते ।
प्रजानां सन्धिमूलं हि शमं विद्धि शुभानने ।। ३० ।।(३)

ताः क्षिपेरन्प्रजाः सर्वाः क्षिप्रं द्रौपदि तादृशे ।
तस्मान्मन्युर्विनाशाय प्रजानामभवाय च ।। ३१ ।।(४)

यस्मात्तु लोके दृश्यन्ते क्षमिणः पृथिवीसमाः ।
तस्माज्जन्म च भूतानां भवश्च प्रतिपद्यत ।। ३२ ।।(५)

क्षन्तव्यं पुरुषेणेह सर्वापत्सु सुशोभने ।
क्षमावतो हि भूतानां जन्म चैव प्रकीर्तितम् ।। ३३ ।।(६)

आक्रुष्टस्ताडितः क्रुद्धः क्षमते यो बलीयसा ।
यश्च नित्यं जितक्रोधो विद्वानुत्तमपूरुषः ।। ३४ ।।(७)

---

(१) (१)क्रधितः (for पुरुषः); सर्वं,
(२) (१)च (for हि); (२)चैव(for चापि),
(३) (१)सङ्क्षीयते; सङ्क्षुभिते; सङ्कुचिते; प्रकुपिते; (२)समः; धर्मः; शर्म (for जन्म); (३)बुद्धि; वृद्धि विद्धि (for सन्धि); (४)समं; शर्म (for जन्म); शुचिस्मिते (for शुभां);शम इति पाठे क्षमा*अधिकपाठः - कपाठे
(४) (१)तां (for ताः); क्षियेरन्; (क्षिपें) तादृशाः; शः,
(५) (१)तस्मात् लोकेषु; नु लोके; लोके ह (for तु लोके); (४)भवाय; भूयश्च; भावश्च; धर्मश्च प्रथितो भवेत्,
(६) (२)सर्वपत्सु सुशोभने; (३)वतो; रो भावो; भावे (for भवो),
(७) (१)क्षिप्तः; चैव (for क्रुद्धः); (२)सहते यो बलीयसां; सः (३)यस्तु; (यः स्म) यस्मिन्; सत्यं; स तु (for यश्च) ,

प्रभाववानपि नरस्तस्य लोकाः सनातनाः ।
क्रोधनस्त्वल्पविज्ञानः प्रेत्य चेह च नश्यति ।। ३५ ।।[१]

अत्राप्युदाहरन्तीमा गाथा नित्यं क्षमावताम् ।
गीताः क्षमावता कृष्णे काश्यपेन महात्मना ।। ३६ ।।[२]

क्षमा धर्मः क्षमा यज्ञः क्षमा वेदाः क्षमा श्रुतम् ।
य एतदेवं जानाति स सर्वं क्षन्तुमर्हति ।। ३७ ।।[३]

क्षमा ब्रह्म क्षमा सत्यं क्षमा भूतं च भावि च ।
क्षमा तपः क्षमा शौचं क्षमयेदं धृतं जगत् ।। ३८ ।।[४]

अति यज्ञविदां लोकान्क्षमिणः प्राप्नुवन्ति च ।
अति ब्रह्मविदां लोकानति चापि तपस्विनाम् ।। ३९ ।।[५]

अन्ये वै यजुषां लोकाः कर्मिणामपरे तथा ।
क्षमावतां ब्रह्मलोके लोकाः परमपूजिताः ।

क्षमा तेजस्विनां तेजः क्षमा ब्रह्म तपस्विनाम् ।
क्षमा सत्यं सत्यवतां क्षमा यज्ञः क्षमा शमः ।। ४० ।।[६]

तां क्षमां तादृशीं कृष्णे कथमस्मद्विधस्त्यजेत्।
यस्यां ब्रह्म च सत्यं च यज्ञा लोकाश्च धिष्ठिताः ।। ४१ ।।

---

(१) (२)लोकः तनः; (३)स्वल्पं (for त्वल्पं ),
(२) इमां गाथां क्षमावतः; (३)गीता क्षमावतां; (४)कश्यपेन,
(३) (१)धर्मः यज्ञः क्षमा यज्ञाः क्षमा धर्माः (२)दानं (for वेदाः); (३)एव(for एवं); विजानीते य एतदेवं जानाति,
(४) (१)विद्या (for सत्यं); (४) (इ) व धृतं; (इ)दं धृतं; वै धृतं (for चोद्धृतं),
(५) (१)धर्मं (for ब्रह्मं); (३)क्रियावतां; यज्ञवतां; यन्त्रवतां (for यज्ञविदां); चापि; लोकान् (for चैव) (४) वै हि; च (for तान्),
(६) ब्रह्म कथं; (३)सत्यवतां सत्यं; (४)यज्ञः (for दानं); वतां; शमः (श्रमः);(for यशः)

इज्यन्ते यज्वनां लोकाः क्षमिणामपरे तथा ।। ४२ ।।[१]

क्षमावतां ब्रह्मलोके लोकाः परमपूजिताः [2]

क्षन्तव्यमेव सततं पुरुषेण विजानता ।
यदा हि क्षमते सर्वं ब्रह्म सम्पद्यते तदा ।। ४३ ।।[३]

क्षमावतामयं लोकः परश्चैव क्षमावताम् ।
इह सम्मानमृच्छन्ति परत्र च शुभां गतिम् ।। ४४ ।।[४]

येषां मन्युर्मनुष्याणां क्षमयाभिहतः सदा ।
तेषां परतरे लोकास्तस्मात्क्षान्तिः परा मता ।। ४५ ।।[५]

इति गीताः काश्यपेन गाथा नित्यं क्षमावताम् ।
श्रुत्वा गाथाः क्षमायास्त्वं तुष्य द्रौपदि मा क्रुधः ।। ४६ ।।[६]

पितामहः शान्तनवः शमं सम्पूजयिष्यति।
कृष्णश्च देवकीपुत्रः शमं सम्पूजयिष्यति ।। ४७ ।।[७]

आचार्यो विदुरः क्षत्ता शममेव वदिष्यतः ।
कृपश्च सञ्जयश्चैव शममेव वदिष्यतः ।। ४८ ।।

---

(१) कथं (१)तादृशीं (for ईदृशीं); (३) यत्र (for यस्यां); वेदाशू (for सत्यं); (४)यत्र (for यज्ञा); च धिष्ठिताः; प्रतिष्ठिताः (for च विष्ठिताः); सर्वमेव (सर्वं सम्यक्); प्रतिष्ठितं; अन्ये वै; इत्येतैः इज्यन्ते; अन्ये च (for भुज्यन्ते); यजुषां; यज्विनां (for यज्वनां); कर्मिं; धमि (for क्षमिं),
(२)ब्रह्मविदां; लोकः लोकः परमपूजितः,
(३) (३)च (for हि),
(४) यज्ञः दानं वतां (for यशः); (२)लोकः; चापि (for चैव); (३)सन्मानम् अर्छति; अर्हः (र्च)ति; इच्छन्ति (for ऋच्छन्ति ); (४)परां (for शुभां),
(५) (२) (अ)भिहितः; (अ)भिहृतः (for निहतः); (३)तरा ; तरो; मतो(for तरे); लोकः
(६) (१)गीता कश्यपेन; (२)नित्यमेव (for गाथा नित्यं); (३)तु (for त्वं); (४)मा द्रौपदि,
(७) ( समयं पूजयिष्यति; शममेव वदिं );चैव (for क्षत्ता); (४)सममेव; परमेव वदिष्यति; शमं सम्पूजयिष्यति;पौरवृद्धास्तथैव च, वदिष्यति,

for This  Stanga is Interchanged in TRK after 46.

सोमदत्तो युयुत्सुश्च द्रोणपुत्रस्तथैव च ।
पितामहश्च नो व्यासः शमं वदति नित्यशः ।। ४९ ।।

एतैर्हि राजा नियतं चोद्यमानः शमं प्रति ।
राज्यं दातेति मे बुद्धिर्न चेल्लोभान्नशिष्यति ।। ५० ।।(१)

यत्र पार्थो धनुष्पाणिर्भीमः कृष्णश्च वीर्यवान्

कालोऽयं दारुणः प्राप्तो भरतानामभूतये ।
निश्चितं मे सदैवैतत्पुरस्तादपि भाविनि ।। ५१ ।।(२)

क्षयः सर्वस्य लोकस्य पृथिव्यामिति मे मतिः
भीष्मो द्रोणश्च कर्णश्च किं शेषं तत्र पश्यसि (3)

सुयोधनो नार्हतीति क्षमामेवं न विन्दति ।
अर्हस्तत्राहमित्येवं तस्मान्मां विन्दते क्षमा ।। ५२ ।।(४)

एतदात्मवतां वृत्तमेष धर्मः सनातनः ।
क्षमा चैवानृशंस्यं च तत्कर्तास्म्यहमञ्जसा ।। ५३ ।।(५)

अस्मिन् कैरातपर्वणि २५अध्याये ५३श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्त्र्यां वैयासिक्यां संहितायां वनपर्वणि अर्जुनाभिगमनपर्वणि

---

(१) (२)नोद्यभानः; (३) अ-आसाद्यतेति; घ-आदास्यते हि, आदास्यतेति (for राज्यं दातेति);,
(२) (२)विपत्तये (for अभूतये) ,
(३) (३)सदा चैतत्; (४)एव (for अपि); भाविनि,
(४) (२)विनिन्दति; न निन्दति क्षमा मामेव विन्दति; (३)तत्र (for तस्य) एवेह; इत्येवं अर्हस्तस्या अहमिति; (४)मा (for मां) विन्दति,
(५) (१)धर्मवतां; ह्यात्मवतां; आत्म विदां; धर्मम् (for वृत्तम्); (३)क्षमां नृशंसस्य; नृशंसा च,

द्रौपदीयुधिष्ठिरसंवादे पञ्चविंशोऽध्यायः ।। २५ ।।

# महाभारततात्पर्यनिर्णये

सत्यं च विष्णुः सकलप्रवर्तको रमाविरिञ्चेशपुरस्सराश्च ।
काष्ठादिवत् तद्वशगाः समस्तास्तथाऽपि न व्यर्थता पौरुषस्य ।। ६८ ।।
तदाज्ञया पुरुषश्चेष्टमानः चेष्टानुसारेण शुभाशुभस्य ।
भोक्ता न तच्चेष्टितमन्यथा भवेत् कर्ता तस्मात् पुरुषोऽप्यस्य वश्यः ।। ६९ ।।
वृथा यदि स्यात् पौरुषं कस्य हेतोः विधिर्निषेधश्च समस्तवेदगः ।
विधेर्निषेधस्य च नैव गोचरः पुमान् यदि स्याद् भवतो हि तौ हरेः ।। ७० ।।
तेनैव लेपश्च भवेदमुष्य पुण्येन पापेन च नैव चासौ ।
लिप्येत ताभ्यां परमः स्वतन्त्रः कर्ता ततः पुरुषोऽप्यस्य वश्यः ।। ७१ ।।
इतीरितो धर्मजः कृष्णयैव निरुत्तरत्वं गमितस्त्वभर्त्सयत् ।
कुतर्कमाश्रित्य हरेरपि त्वमस्वातन्त्र्यं साधयसीति चोक्त्वा ।। ७२ ।।
छलेन तेन प्रतिभर्त्सिता सा क्षमापयामास नृपं यतः स्त्री ।
वाचालता नातितरां हि शोभते स्त्रीणां ततः प्राह वृकोदरस्तम् ।। ७३ ।।
राजन् विष्णुः सर्वकर्ता न चान्यस्तत्तन्त्रमेवान्यदसौ स्वतन्त्रः ।
तथाऽपि पुंसा विहितं स्वकर्म कार्यं त्याज्यं चान्यदत्यन्तयत्नात् ।। ७४ ।।

प्रत्यक्षमेतत् पुरुषस्य कर्म तेनानुमेया प्रेरणा केशवस्य ।
स्वकर्म कृत्वा विहितं हि विष्णुना तत्प्रेरणेत्येव बुधोऽनु मन्यते ।। ७५ ।।
तेनैति सम्यग्गतिमस्य विष्णोर्जनोऽशुभो दैवमित्येव मत्वा ।
हित्वा स्वकं कर्म गतिं च तामसीं प्रयाति तस्मात् कार्यमेव स्वकर्म ।। ७६ ।।
ज्ञातव्यं चैवास्य विष्णोर्वशत्वं कर्तव्यं चैवाऽत्मनः कार्यकर्म ।

प्रत्यक्षैषा कर्तृता जीवसंस्था तथाऽगमादनुमानाच्च सर्वम् ।। ७७ ।।
विष्णोर्वशे तन्न हेयं द्वयं च जानन् विद्वान् कुरुते कार्यकर्म ।
तत्प्रेरकं विष्णुमेवाभिजानन् भवेत् प्रमाणत्रितयानुगामी ।। ७८ ।।
पूर्णं प्रमाणं तत्त्रयं चाविरोधेनैकत्रस्थं तत्त्रयं चाविरोधि ।
पृथङ् मध्यं चाप्रमाणं विरोधि स्यात् तत् तस्मात् त्रयमेकत्र कार्यम् ।। ७९ ।।

अज्ञः प्रत्यक्षं त्वपहायैव दैवं मत्वा कर्तृ स्वात्मकर्म प्रजह्यात् ।
विद्वान् जीवं विष्णुवशे विदित्वा करोति कर्तव्यमजस्रमेव ।। ८० ।।
स्वभावाख्या योग्यता या हठाख्या याऽनादिसिद्धा सर्वजीवेषु नित्या ।
सा कारणं प्रथमं तु द्वितीयमनादिकर्मैव तथा तृतीयः ।
जीवप्रयत्नः पौरुषाख्यस्तदेतत् त्रयं विष्णोर्वशगं सर्वदैव ।। ८१ ।।
स कस्यचिन्न वशे वासुदेवः परात् परः परमोऽसौ स्वतन्त्रः ।
हठश्चासौ तारतम्यस्थितो हि ब्रह्माणमारभ्य कलिश्च यावत् ।
हठाच्च कर्माणि भवन्ति कर्मजो यत्नो यतो हठकर्मप्रयोक्ता ।। ८२ ।।
विना यत्नं न हठो नापि कर्म फलप्रदो वासुदेवोऽखिलस्य ।
स्वातन्त्र्यशक्तेर्विनियामको हि तथाऽप्येतान् सोऽप्यपेक्ष्यैव युञ्जेत् ।। ८३ ।।
एतानपेक्ष्यैव फलं ददानीत्यस्यैव सङ्कल्प इति स्वतन्त्रता ।
नास्यापगच्छेत् स हि सर्वशक्तिर्नाशक्तता क्वचिदस्य प्रभुत्वात् ।। ८४ ।।
तस्मात् कार्यं तेन क्लृप्तं स्वकर्म तत्पूजार्थं तेन तत्प्राप्तिरेव ।
अतोऽन्यथा निरयः सर्वथा स्यात् स्वकर्म विप्रस्य जपोपदेशौ ।
विष्णोर्मुखाद् विप्रजातिः प्रवृत्ता मुखोत्थितं कर्म तेनास्य सोऽदात् ।। ८५ ।।

बाह्वोर्जातः क्षत्रियस्तेन बाह्वोः कर्मास्य पापप्रतिवारणं हि ।

प्रवर्तनं साधुधर्मस्य चैव मुखस्य बाह्वोश्चातिसामीप्यतोऽस्य ।
जपोपदेशौ क्षत्रियस्यापि विष्णुश्चक्रे धर्मौ यज्ञकर्मापि विप्रे ।। ८६ ।।
वैश्यो यस्मादूरुजस्तेन तस्य प्रजावृद्धिस्तज्जकर्मैव धर्मः ।
तत्सादृश्यात् स्थावराणां च वृद्धिः करयोरूर्वोः सन्निकृष्टत्वहेतोः ।
वार्तात्मकं कर्म धर्मं चकार विष्णुस्तस्यैवाङ्घ्रिजः शूद्र उक्तः ।। ८७ ।।
गतिप्रधानं कर्म शुश्रूषणाख्यं सादृश्यतो हस्तपदोस्तथैव ।
हस्तोद्भवं कर्म तस्यापि धर्मः सन्तानवृद्धिश्च समीपगत्वात् ।। ८८ ।।
भुजावुरो हृदयं यद् बलस्य ज्ञानस्य च स्थानमतो नृपाणाम् ।
बलं ज्ञानं चोभयं धर्म उक्तः पाणौ कृतीनां कौशलं केवलं हि ।
तस्मात् पाण्योरूरुपदोरुपस्थितेर्विट्छूद्रकौ कर्मणां कौशलेतौ ।। ८९ ।।
प्राधान्यतो धर्मविशेष एष सामान्यतः सर्व एवाखिलानाम् ।
वयं हि देवास्तेन सर्वं हि कर्म प्रायेण नो धर्मतामेति शश्वत् ।। ९० ।।
एतैर्धर्मैर्विष्णुना पूर्वक्लृप्तैः सर्वैर्वर्णैर्विष्णुरेवाभिपूज्यः ।
तद्भक्तिरेवाखिलानां च धर्मो यथायोग्यं ज्ञानमस्यापि पूजा ।। ९१ ।।
पिता गुरुः परमं दैवतं च विष्णुः सर्वेषां तेन पूज्यः स एव ।
तद्भक्तत्वाद् देवताश्चाभिपूज्या विशेषतस्तेषु येऽत्यन्तभक्ताः ।। ९२ ।।
सम्पूजितो वासुदेवः स मुक्तिं दद्यादेवापूजितो दुःखमेव ।
स्वतन्त्रत्वात् सुखदुःखप्रदोऽसौ नान्यः स्वतन्त्रस्तद्वशा यत् समस्ताः ।। ९३ ।।

स्वतन्त्रत्वात् सुखसज्ज्ञानशक्तिपूर्वैर्गुणैः पूर्ण एषोऽखिलैश्च ।
स्वतन्त्रत्वात् सर्वदोषोज्झितश्च निस्सीमशक्तिर्हि यतः स्वतन्त्रः ।। ९४ ।।
दोषास्पृष्टौ गुणपूर्तौ च शक्तिर्निस्सीमत्वाद् विद्यते तस्य यस्मात् ।
एवं गुणैरखिलैश्चापि पूर्णो नारायणः पूज्यतमः स्वधर्मैः ।

अस्माकं यत् तेन नातिक्षमैव धर्मो दुष्टानां वारणं ह्येव कार्यम् ।। ९५ ।।
हन्याद् दुष्टान् यः क्षत्रियः क्षत्रियांश्च विशेषतो युद्धगतान् स्मरन् हरिम् ।
स्वबाहुवीर्येण च तस्य बाहू चैतन्यमात्रौ भवतः सदेहौ ।। ९६ ।।
पापाधिकांश्चैव बलाधिकांश्च हत्वा मुक्तावधिकानन्दवृद्धिः ।
प्रीतिश्च विष्णोः परमैव तत्र तस्माद्धन्तव्याः पापिनः सर्वथैव ।। ९७ ।।
ये त्वक्षधूर्ता ग्रहणं गता वा पापास्तेऽन्यैर्घातनीयाः स्वदोर्भ्याम् ।
राजानं वा राजपुत्रं तथैव राजानुजं वाऽभियातं निहन्यात् ।। ९८ ।।
राज्ञः पुत्रोऽप्यकृतोद्वाहको यः स घातनीयो न स्वयं वध्य एव ।
क्रूरं चान्यद् धर्मयुक्तं परैस्तत् प्रसाधनीयं क्षत्रियैर्न स्वकार्यम् ।
एवं धर्मो विहितो वेद एव वाक्यं विष्णोः पञ्चरात्रेषु तादृक् ।। ९९ ।।

अक्षद्यूतं निकृतिः पापमेव कृतं त्वया गर्हितं सौबलेन ।
न कुत्रचिद् विधिरस्यास्ति तेन न तद् दत्तं द्यूतहृतं वदन्ति ।। १०० ।।
भीतेन दत्तं द्यूतदत्तं तथैव दत्तं कामिन्यै पुनराहार्यमेव ।
एवं धर्मः शाश्वतो वैदिको हि द्यूते स्त्रियां नाल्पमाहार्यमाहुः ।। १०१ ।।
यद्येषां वै भोग्यमल्पं तदीयं भोगेन तद्बन्धुभिस्तच्च हार्यम् ।
निवारणे पुरुषस्य त्वशक्तैस्तद् राज्यं नः पुनराहार्यमेव ।। १०२ ।।
त्वं धर्मनिष्ठश्चाग्रजश्चेति राजन् ऋतेऽनुज्ञां न मया तत् कृतं च ।
दातास्यनुज्ञां यदि तान् निहत्य त्वय्येव राज्यं स्थापयाम्यद्य सम्यक् ।। १०३ ।।
सत्यं पापेष्वपि कर्तुं यदीच्छा तथाऽपि मासा द्वादश नः प्रयाताः ।
वेदप्रामाण्याद् वत्सरास्ते हि मासैः सहस्राब्दं सत्रमुक्तं नराणाम् ।
अज्ञातमेकं मासमुष्याऽथ शत्रून् निहत्य राज्यं प्रतिपादयामः ।। १०४ ।।
मा मित्राणां तापकस्त्वं भवेथास्तथाऽमित्राणां नन्दकश्चैव राजन् ।

ज्वलस्वारीणां मूर्ध्नि मित्राणि नित्यमाह्लादयन् वासुदेवं भजस्व ।। १०५ ।।
स्वतन्त्रत्वं वासुदेवस्य सम्यक् प्रत्यक्षतो दृश्यते ह्यद्य राजन् ।
यस्मात् कृष्णो व्यजयच्छङ्करादीन् जरासुतादीन् कादिवरैरजेयान् ।। १०६ ।।
ब्रह्मादीनां प्रकृतेस्तद्वशत्वं दृष्टं हि नो बहुशो व्यासदेहे ।
पाराशर्यो दिव्यदृष्टिं प्रदाय स्वातन्त्र्यं नोऽदर्शयत् सर्वलोके ।। १०७ ।।
तस्माद् राजन्नभिनिर्याहि शत्रून् हन्तुं सर्वान् भोक्तुमेवाधिराज्यम् ।
एवञ्च ते कीर्तिधर्मौ महान्तौ प्राप्यौ राजन् वासुदेवप्रसादात् ।। १०८ ।।

**महाभारते- वनपर्वणि २४ अध्यायतः ३० पर्यन्तम् .**

# २६. षड्विंशोऽध्यायः

**भर्तृव्यसनदर्शनदूनया द्रौपद्या युधिष्ठिरं प्रति धर्मादितोपि विधेरेव प्राबल्योपपादनम्**

नमो धात्रे विधात्रे च यौ मोहं चक्रतुस्तव ।
पितृपैतामहे वृत्ते वोढव्ये तेऽन्यथा मतिः ।। १ ।।(१)

कर्मभिश्चिन्तितो लोको गत्यागत्या पृथग्विधः ।
तस्मात्कर्माणि नित्यानि लोभान्मोक्षं यियासति ।। २ ।।(२)

नेह धर्मानृशंस्याभ्यां न क्षान्त्या नार्जवेन च ।
पुरुषः श्रियमाप्नोति न घृणित्वेन कर्हिचित् ।। ३ ।।(३)

त्वां च व्यसनमभ्यागादिदं भारत दुःसहम् ।

---

(१) (३)राज्ये (for वृत्ते),
(२) गत्यां गत्यां (पृथक्पृथक्),
(३) (१)ते न (for नेह); साभ्यां (for स्याभ्यां); (४)न यज्ञैर्भूरिदक्षिणैः,

यत्त्वं नार्हसि नापीमे भ्रातरस्ते महौजसः ॥ ४ ॥[१]

न हि तेऽध्यगमज्ञातु तदानीं नाद्य भारत ।

धर्मात्प्रियतरं किञ्चिदपि चेज्जीवितादिह ।[2]

धर्मार्थमेव ते राज्यं धर्मार्थं जीवितं च ते ।

ब्राह्मणा गुरवश्चैव जानन्त्यपि च देवताः ॥ ५ ॥

भीमसेनार्जुनौ चोभौ माद्रेयौ च मया सह ।

त्यजेस्त्वमिति मे बुद्धिर्न तु धर्मं परित्यजेः ॥ ६ ॥[३]

राजानं धर्मगोप्तारं धर्मो रक्षति रक्षितः ।

इति मे श्रुतमार्याणां त्वां तु मन्ये न रक्षति ॥ ७ ॥

अनन्या हि नरव्याघ्र नित्यदा धर्ममेव ते ।

बुद्धिः सततमन्वेतिच्छायेव पुरुषं निजा ॥ ८ ॥[४]

छायेवान्वेति पुरुषं धर्मः साधु मयार्जितः

नावमंस्था हि सदृशान्नावराञ्छ्रेयसः कुतः ।

अवाप्य पृथिवीं कृत्स्नां न ते शृङ्गमवर्धत ॥ ९ ॥[५]

---

(१) (२)दुष्षहं; दुष्पभं इदं च भरतर्षभ; (३)त्वं; यस्त्वं; त्वं; राजन् (for यत्त्वं); (४) ()मितौजसः; महायशाः; बलीयसः (for महौं ),

(२) (१)तु (for हि); व्यगमज्; तेध्यगमज्; तेध्यगमं; ते ह्यभवज्; तेभ्यगमञ्; (२) चाद्य (for नाद्य); (३)परः (for प्रियं); (४)ते (for चेत्); जीवितं; अपि; च ते (for इह),

(३) (१)चेभौ; चेमौ (for चैव); (२)चमौ चैव (for माद्रेयौ च); (३)त्यजेयमिति ते बुद्धिर्; (४) कदाचन (for परिं),

(४) (१)अत्यन्तं हि ; त्यक्त्यान्या (न्यौ); हि; त्यक्त्वान्यान्हि त्यक्त्वान्यत्तु; अन्येभ्यो हि (for अनन्या हि) व्याध्रा; श्रेष्ठ (अ) तिशक्तिर्यथाशक्तिः (२)नित्यता धर्म सेवते (ने); सा ममैव ते; धर्म एव ते; (३)सन्ततम्,

(५) (३) (अ) पि महीं; हि महीं (for पृथिवीं); सर्वां (for कृत्स्नां); (४)प्रवर्धते (for अवर्धत),

स्वाहाकारैः स्वधाभिश्च पूजाभिरपि च द्विजान् ।
दैवतानि पितंश्चैव सततं पार्थ सेवसे ।। १० ।।[१]

ब्राह्मणाः सर्वकामैस्ते सततं पार्थ तर्पिताः ।
यतयो मोक्षिणश्चैव गृहस्थाश्चैव भारत ।। ११ ।।[२]

भुञ्जते रुक्मपात्रीभिर्यत्राहं परिचारिका।

आरण्यकेभ्यो लौहानि भाजनानि प्रयच्छसि ।
नादेयं ब्राह्मणेभ्यस्ते गृहे किञ्चन विद्यते ।। १२ ।।[३]

यदिदं वैश्वदेवं ते शान्तये क्रियते गृहे ।
तद्दत्त्वातिथिभूतेभ्यो राजञ्छिष्टेन जीवसि ।। १३ ।।[४]

श्वभ्यश्च श्वपचेभ्यश्च दत्त्वा शिष्टेन जीवसि

इष्टयः पशुबन्धाश्च काम्यनैमित्तिकाश्च ये ।
\ार्तन्ते पाकयज्ञाश्च यज्ञकर्म च नित्यदा ।। १४ ।।[५]

अस्मिन्नपि महारण्ये विजने दस्युसेविते ।
राष्ट्रदपेत्य वसतो धर्म स्तेनावसीदति ।। १५ ।।[६]

अश्वमेधो राजसूयः पुण्डरीकोऽथ गोसवः ।

---

(१) (३)देवांश्चव; देवताः (तां); श्च (for दैवतानि),

(२) कामभोगांस्ते; सर्वकामार्थैः च; तु (for ते); (२)पूजिताः (for तर्पिताः); सततं भुञ्जते गृहे; (३)व्रतिनो (for यतयो),

(३) (१)आरण्यकेथः आरण्येभ्योथ लोहानि; वन्यानि; (२)भोजनानि,

(४) (१)वै श्वदैवं (२) विधीं (for प्रदीं); शान्तये ( सायं च; सायं वै); क्रियते गृहे

(३)भूतें (for भृत्यें); श्चभ्यश्च श्चपचेभ्यश्च; (४) दत्वा (for राजञ्); शिष्टेन (for शेषेण); यज्ञकर्म च सर्वदा,

(५) (२)काम्या (for काम्य); (४)भारत (for नित्यदा); सदा (द); यज्ञाः (ज्ञ)श्च तेनघ,

(६) (२)निर्जने (for विं),

एतैरपि महायज्ञैरिष्टं ते भूरिदक्षिणैः ।
दृष्टास्त्वया महायज्ञा बहवोन्ये सदक्षिणाः ॥ १६ ॥

राजन्परीतया बुद्ध्या विषमेऽक्षपराजये ।
राज्यं वसून्यायुधानि भ्रातन्मां चासि निर्जितः ॥ १७ ॥[१]

ऋजोर्मृदोर्वदान्यस्य ह्रीमतः सत्यवादिनः ।
कथमक्षव्यसनजा बुद्धिरापतिता तव ॥ १८ ॥[२]

अतीव मोहमायाति मनश्च परिभूयते ।
निशाम्य ते दुःखमिदमिमां चापदमीदृशीम् ॥ १९ ॥[३]

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
ईश्वरस्य वशे लोकास्तिष्ठन्ते नात्मनो यथा ॥ २० ॥[४]

धातैव खलु भूतानां सुखदुःखे प्रियाप्रिये ।
दधाति सर्वमीशानः पुरस्ताच्छुक्रमुच्चरन् ॥ २१ ॥[५]

यथा दारुमयी योषा नरवीर समाहिता ।
ईरयत्यङ्गमङ्गानि तथा राजन्निमाः प्रजाः ॥ २२ ॥[६]

आकाश इव भूतानि व्याप्य सर्वाणि भारत ।

---

(१) (३)वसूंश्च; पशून (for वसून्यां); राज्यं च वसून्यादाय; पार्थ (राज्यं); मित्राणि चास्मांश्च (४) अपि (for असि); भ्रातृन् चापि विनिर्जितः; वसूनि च पराजितः,

(२) (१)अनसूयोर्व; (२) धीमतः कथं बुद्धिः; आपादिता (for आपतिता),

(३) (१)मा मोहयति; मोह आयाति; (२)भूयते; हीयते; (३)न शाम्यति (ते); निशम्य ते निशाम्य व्यसनं पार्थ; (४)दृष्ट्वानापदमीदृशीं; तवेदमतिदुःसहं (दुष्षहं),

(४) लोकास्तिष्ठन्ते,

(५) (१)धात्रैव; तथैव किल (for खलु); (३)ददाति; (४)

(६) यथा दारूमयीं योषां नरो धरिः समाहितः; (३)चेष्टय (यं)ति; इङ्गं; ईहं; नेगं (for ईर); मर्माणि; कर्माणि (for मड्गनि); चेष्टयन्त्यड्गकर्माणि ()४भूता (for राजन्); तथा धातुः प्रजा इमाः

ईश्वरो विदधातीह कल्याणं यच्च पापकम् ।। २३ ।।[१]

शकुनिस्तन्तुबद्धो वा नियतोऽयमनीश्वरः ।
ईश्वरस्य वशे तिष्ठेन्नान्येषां नात्मनः प्रभुः ।। २४ ।।[२]

मणिः सूत्र इव प्रोतो नस्योत इव गोवृषः ।
स्रोतसो मध्यमापन्नः कूलाद्वृक्ष इव च्युतः ।। २५ ।।[३]

धातुरादेशमन्वेति तन्मयो हि तदर्पणः ।
नात्माधीनो मनुष्योऽयं कालं भजति कश्चन ।। २६ ।।[४]

अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत्स्वर्गं नरकमेव च ।। २७ ।।[५]

यथा वायोस्तृणाग्राणि वशं यान्ति बलीयसः ।
धातुरेवं वशं यान्ति सर्वभूतानि भारत ।। २८ ।।

आर्ये कर्मणि युञ्जानः पापे वा पुनरीश्वरः ।
व्याप्य भूतानि चरते न चायमिति लक्ष्यते ।। २९ ।।[६]

हेतुमात्रमिदं धातुः शरीरं क्षेत्रसञ्ज्ञितम् ।
येन कारयते कर्म शुभाशुभफलं विभुः ।। ३० ।।[७]

पश्य मायाप्रभावोऽयमीश्वरेण यथा कृतः ।

---

(१) (१)आकाशमिव; (४)पातकं (for पापकम्),
(२) (१) क-ख-बद्धेव; बद्धो हि; (२)नीयते (for नियतो); (३) तिष्ठेन् (for तिष्ठन्); (४)न
(३) (१)स्तम्भ (for सूत्र),
(४) (१)नार्थाधीनो; (२)भजति (for भवति); किं (for कं); कूल (for कूलाद्),
(५) वा श्चभ्रमेव वा नरकमेव च); (४)वा (for च),
(६) (१)आर्ये (for आर्य); (२)पापो (for पापे); (३)चरति
(७) (१)प्राप्तः (for धातुः); (२)क्षेत्रसञ्ज्ञकं

यो हन्ति भूतैर्भूतानि मोहयित्वाऽऽत्ममायया ।। ३१ ।।(१)

अन्यथा परिदृष्टानि मुनिभिस्तत्त्वदर्शिभिः ।
अन्यथा परिवर्तन्ते वेगा इव नभस्वतः ।। ३२ ।।(२)

अन्यथैव हि मन्यन्ते पुरुषास्तानि तानि च ।
अन्यथैव प्रभुस्तानि करोति विकरोति च ।। ३३ ।।(३)

यथा काष्ठेन वा काष्ठमश्मानं चाश्मना पुनः ।
अयसा चाप्ययश्छिन्द्यान्निर्विचेष्टमचेतनम् ।। ३४ ।।(४)

एवं स भगवान्देवः स्वयम्भूः प्रपितामहः ।
हिनस्ति भूतैर्भूतानिच्छद्म कृत्वा युधिष्ठिर ।। ३५ ।।(५)

सम्प्रयोज्य वियोज्यायं कामकारकरः प्रभुः ।
क्रीडते भगवान्भूतैर्बालः क्रीडनकैरिव ।। ३६ ।।

न मातृपितृवद्राजन्धाता भूतेषु वर्तते ।
रोषादिव प्रवृत्तोऽयं यथायमितरो जनः ।। ३७ ।।(६)

आर्याञ्छीलवतो दृष्ट्वा ह्रीमतो वृत्तिकर्शितान् ।
अनार्यान्सुखिनश्चैव विह्वलामीव चिन्तया ।। ३८ ।।(७)

---

(१) (३)युद्धन्ति; युद्धन्ति; (for यो हन्ति); (४) (अ)य ; स्व;(अ)र्य स; तु (आ)त्म),
(२) (१)अथ वा (for अन्यथा); परिद्रष्टास्मि); (२)कविभिर्; तत्वदर्शि भिः; वेदवादिभिः; वेदपारगैः
(३) (१) एवं च(for एव हि); वर्तते (for मन्यन्ते); अन्यथा वा व्यवर्तन्ते; था परिवर्तते; (२) ह; हि (for च); भविष्यन्तीति मानवाः,
(४) (१)काष्ठस्य (for वा काष्ठं); (२)वा (for चां) चाश्मानमस्मना; अस्मनीवात्मना; ह्यस्मानं चास्मना; अ(हा) श्मना ह्यश्म वा; (३)वां ( चां); (४)अचेतन्; अचेतसं,
(५) (१)अन्ते (for देवः); (३)निहन्ति (for हिनस्ति); (४)जन्म (for छद्म),
(६) (३)एव (for इव); प्रकृत्या; प्रयुक्तो (for प्रवृत्तो);() सौ (for यं),
(७) (२)कर्षितान्; (४) विह्वलयामीव चिन्तया लानि विचिश्चये (यां); लानीव चिन्तया; लानीव

तवेमामापदं दृष्ट्वा समृद्धिं च सुयोधने ।
धातारं गर्हये पार्थ विषमं योऽनुपश्यति ।। ३९ ।।(१)

आर्यशास्त्रातिगे क्रूरे लुब्धे धर्मापचायिनि ।
धार्तराष्ट्रे श्रियं दत्त्वा धाता किं फलमश्नुते ।। ४० ।।(२)

कर्म चेत्कृतमन्वेति कर्तारं नान्यमृच्छति ।
कर्मणा तेन पापेन लिप्यते नूनमीश्वरः ।। ४१ ।।(३)

अथ कर्म कृतं पापं न चेत्कर्तारमृच्छति ।
कारणं बलमेवेह जनाञ्छोचामि दुर्बलान् ।। ४२ ।।(४)

**अस्मिन् कैरातपर्वणि २६ अध्याये ४२श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अर्जुनाभिगमनपर्वणि द्रौपदीवाक्ये षड्विंशोऽध्यायः ।। २६ ।।

# २७. सप्तविंशोऽध्यायः

**युधिष्ठिरेण द्रौपदीं प्रति धर्मस्य साफल्योपपादनम् ।।**

÷९ ÷

वल्गु चित्रपदं श्लक्ष्णं याज्ञसेनि त्वया वचः ।
उक्तं तच्छ्रुतमस्माभिर्नास्तिक्यं तु प्रभाषसे ।। १ ।।(५)

---

चिन्तया; लामि वि (न)चिन्तये; लेव विचिन्तये; चितयाभ्यतिविह्वला; लास्मि विचेतना विह्वलामीव वि+ह्वल्,

(१) (४)समं यो नानुपश्यति,

(२) (२)धर्माभि(ति)शङ्किनि; चौर्यातिशंसिनि; धर्मविशङ्किते,

(३) (२)नानुगच्छति; नान्यमर्छति; मर्चति; (३)कर्मणा बहुः (तेन) दोषेण,

(४) (२)अर्छति; अर्हति,

(५) (१)बहु (for वल्गु); (३)यत्; तु (for तत्); (४)च; सं (for तु),

नाहं कर्मफलान्वेषी राजपुत्रि चराम्युत ।
ददामि देयमित्येव यजे यष्टव्यमित्युत ॥ २ ॥[१]

लक्षालङ्कारः- राजपुत्रि चरामि इत्यत्र न चरामि धर्मं नाचरामीत्यर्थः।

अस्तु वात्र फलं मा वा कर्तव्यं पुरुषेण यत् ।
गृहे वा वसता कृष्णे यथाशक्ति करोमि तत् ॥ ३ ॥[२]

धर्मं चरामि सुश्रोणि न धर्मफलकारणात्।
आगमाननतिक्रम्य सतां वृत्तमवेक्ष्य च ।
धर्म एव मनः कृष्णे स्वभावाच्चैव मे धृतम् ॥ ४ ॥[३]

धर्मवाणिज्यको हीनो जघन्यो धर्मवादिनाम्।[4]

न धर्मफलमाप्नोति यो धर्मं दोग्धुमिच्छति ।
यश्चैनं शङ्कते कृत्वा नास्तिक्यात्पापचेतनः ॥ ५ ॥

अतिवादाद्वदाम्येष मा धर्ममभिशङ्किथाः ।
धर्माभिशङ्की पुरुषस्तिर्यग्गतिपरायणः ॥ ६ ॥[५]

धर्मो यस्याभिशङ्क्यः स्यादार्षं वा दुर्बलात्मनः ।
वेदाच्छूद्र इवापायत् स लोकादजरामरात् ॥ ७ ॥[६]

लक्षालङ्कारः- अपायात् निवृत्तो भवेत् ।

---

(१) (१)कर्म; फलाकाङ्क्षी (३)दन्दानि; ददाति एवं (for एव); (४)अपि (for उत),
(२) (१)नात्र; चात्र; मेत्र (for वात्र); (३)गृहवासता नित्यं च; गृहे वा वसता कृं; गृहे निवसता कृं,
(३) (४)वृन्तिम्; धर्मम् (for वृत्तम्),
(४) वाणिजको दीनो (for हीनो),
(५) (१)अतिवादान् वदाम्येतत्; वदाम्येष (वदत्येष); वदस्वेतान् (तत्);(for मदाच्चैव)) (३)नाधर्मम् धर्मम् अभि अवि; (अपि); इति (for अति);शङ्कथाः (३)धर्माभिशङ्की; (४)तिर्यग्योनि;
(६) (१)अभि (for अति); (२)अर्थे; दोषं; आर्ष्यो (for आर्षं); अदोषो; दृश्यते (for आर्षं वा);

वेदाध्यायी धर्मपरः कुले जातो मनस्विनि ।
स्थविरेषु स योक्तव्यो राजर्षिर्धर्मचारिभिः ॥ ८ ॥[१]

पापीयान्स हि शूद्रेभ्यस्तस्करेभ्यो विशिष्यते ।
शास्त्रातिगो मन्दबुद्धिर्यो धर्ममभिशङ्कते ॥ ९ ॥[२]

प्रत्यक्षं हि त्वया दृष्ट ऋषिर्गच्छन्महातपाः ।
मार्कण्डेयोऽप्रमेयात्मा धर्मेण चिरजीविता ॥ १० ॥[३]

व्यासो वसिष्ठो मैत्रेयो नारदो लोमशः शुकः ।
अन्ये च ऋषयः सर्वे धर्मेणैव सुचेतसः ॥ ११ ॥[४]

प्रत्यक्षं पश्यसि ह्येतान्दिव्ययोगसमन्वितान् ।
शापानुग्रहणे शक्तान्देवेभ्योऽपि गरीयसः ॥ १२ ॥[५]

एते हि धर्ममेवादौ वर्णयन्ति सदानघे ।
कर्तव्यममरप्रख्याः प्रत्यक्षागमबुद्धयः ॥ १३ ॥[६]

अतो नार्हसि कल्याणि धातारं धर्ममेव च ।
राज्ञि मूढेन मनसा क्षेप्तुं शङ्कितुमेव च ॥ १४ ॥[७]

---

दोषो दुर्बलम् (०बोंध) आत्मनः;(for आषं वा); (४)स्वर्मोकाद्

(१) (१)धर्मरतिः; कर्मपरः (२)मनं (for यशं)) (३) (अ)भि; नि प्र(for स); (४)राजर्षिर् धर्मवादिभि; धर्मयोक्तृभिः न धर्ममति शङ्कते,

(२) (१)हि स (२) पि वा पुनः; विशिष्यते;(३) () धर्मं (for मन्दं); अभिं (for अतिं),

(३) (३)ख-वशे तिष्टन् हि धर्मस्य गतस्स चिरजीविताम् ; (४)जीविनः; तः; तं; ता; कां,

(४) (१)वशिष्ठो; (२)रोमशः शुकः; रोमहर्षणः; (३)चाप्यृषयः; वा ऋषयः; सर्वे (for सिद्धाः); (४) सुतेजसः; सुवेधसः,

(५) (१)ह्येनान्; (२)दिव्यान् शोभासमं ; (४)देवेभ्योपि,

(६) (२) (अ) नघे (for मम); (३)कर्तारो ह्यमं

(७) (१)ततो (for अतो) (२)कर्म (for धर्मम्); (३)राज्ञि (for रजो); (४) वा (for च),

उन्मत्तान्मन्यते बालः सर्वानागतनिश्चयान्।[१]

धर्माभिशङ्को नान्यस्मात्प्रमाणमधिगच्छति ।
आत्मप्रमाण उन्नद्धः श्रेयसो ह्यवमन्यकः ।। १५ ।।[२]

इन्द्रियप्रतिसम्बद्धं यदिदं लोकसाक्षिकम् ।
एतावन्मन्यते बालो मोहमन्यत्र गच्छति ।। १६।।[३]

**लक्षालङ्कारः** इन्द्रियप्रतिसम्बद्धम् इत्यत्र यदिदं लोकसाक्षिकं लोकस्य साक्षिभूतं धर्मप्रदर्शकमित्यर्थः । एताद्दशम् इदम् ऋष्यादिजगत् इन्द्रियप्रतिसम्बद्धं इन्द्रियलम्पटमिति एतावदेव बालः मन्यते, न तेषु बहुमानं मन्यते । तेन दोषेण स्वयमपि अन्यत्र स्रक्चन्दनवनितादिविषयेषु मोहं गच्छति ।

प्रायश्चित्तं न तस्यास्ति यो धर्ममभिशङ्कते ।
ध्यायन्स कृपणः पापो न लोकान्प्रतिपद्यते ।। १७ ।।[४]

प्रमाणाद्धि निवृत्तो हि वेदशास्त्रार्थनिन्दकः ।
कामलोभातिगो मूढो नरकं प्रतिपद्यते ।। १८ ।।[५]

यस्तु नित्यं कृतमतिर्धर्ममेवाभिपद्यते ।
अशङ्कमानः कल्याणि सोऽमुत्रानन्त्यमश्नुते ।। १९ ।।[६]

आर्षं प्रमाणमुत्क्रम्य धर्मं न प्रतिपालयन् ।

---

(१) उन्मत्तो मूढः (for बालः) आगमं (for आगतं),
(२) (१)सर्वाभिशङ्की; साध्वातिं; धर्माभि ; सर्वातिं; नान्यस्य; नान्यस्मात्; (३)प्रभाव (for प्रमाण); सन्नद्धः; तत्वज्ञः; चोन्नद्धः; (४) ()पि ()भि (for हि); अवमानकः; अवमन्यते,
(३) (१)प्रतिं; (सम्बन्धं) लोकविश्रुतं; कालसाक्षिकं ; (३)एतावन् लोको (for बालो),
(४) (२)अभि (for अति); (३)पुण्यान् (for पापो); धर्मं प्रमाणमध्यायन्,
(५) (१)प्रमाणान्यनिवृत्तो; प्रमाणेत्यतिं; प्रमा णाद्धि निं; प्रमाणाद्धिनिं; प्रमाणादतिं) (३)तिगो; न्वितो (for नुगो); (४) न लोकान् (for नरकं),
(६) (१)धर्मं (for कृतं) (२)अनुं (for अभिं) (३)पुण्यानि (for कल्याणि);(४)क-ख-ऽमुत्रानन्त्य,

सर्वशास्त्रातिगो मूढः शमाजन्मसु न विन्दति ।। २० ।।[१]

**लक्षालङ्कारः** -आजन्म सु न विन्दति इत्यत्र आजन्म जन्मारभ्य सु शोभनं न विन्दति न प्राप्नोति ।

यस्य नार्षं प्रमाणं स्याच्छिष्टाचारश्च भाविनि ।
नैव तस्य परो लोको नायमस्तीति निश्चयः ।[2]

शिष्टैराचरितं धर्मं कृष्णे मा स्माभिशङ्किथाः ।
पुराणमृषिभिः प्रोक्तं सर्वज्ञैः सर्वदर्शिभिः ।। २१ ।।[३]

धर्म एव प्लवो नान्यः स्वर्गं द्रौपदि गच्छताम् ।
सैव नौः सागरस्येव वणिजः पारमिच्छतः ।। २२ ।।[४]

**लक्षालङ्कारः**- प्लवः नौः

अफलो यदि धर्मः स्याच्चरितो धर्मचारिभिः ।
अप्रतिष्ठे तमस्येतज्जगन्मज्जेदनिन्दिते ।। २३ ।।[५]

**लक्षालङ्कारः**- अचलो यदि धर्मः स्यात् इत्यत्र अधर्मचारिभिः चरितः 'चर गतिभक्षणयोः' इति धातोः भक्षितः, अतिवादेन नाशित इत्यर्थः । एतज्जगत् धर्मनिन्दकजगत् ।

निर्वाणं नाधिगच्छेयुर्जीवेयुः पशुजीविकाम् ।

---

(१) (१)कर्म; आर्ष; यो हि(for आर्ष); उत्सज्य (for उत्क्रम्य); (२) धर्म न प्रति(for परि)पां; धर्म प्रति न पां (३) धर्म (for सर्वं); (४)अशुभं जन्म विन्दति; आजन्मं तु न वि; भृशं जन्मसु वि; सुजन्म न स (स न) विं; आजन्म स निकृन्तति; आजन्म स (सु) न नन्दति; आत्मानं सन्त्रिनश्यति; आ जन्मसु न वि,

(२) यस्यानार्षे; यस्य नायं शिष्टाचारस्त; चाराश्च चारस्य भाविनि न वै (for नैव),

(३) (२)मा मा; मास्तु; नास्मान् (for मा स्म); अभिशङ्कि(क)थाः; (अ)ति वि)शङ्कथाः) (३)दृष्टं (for प्रोक्तं),

(४) (१)नान्यत् (for नान्यः); (३)से वै (सेव; स च) नौः पारगस्येव; (४)पारमिच्छतः

(५) (२)धर्मदर्शिभिः (३) (आ)रात्; स्यात् (for (ए)तत्); (४)चेदम् (for मज्जेद्),

विद्यां ते नैव युज्येयुर्न चार्थं केचिदाप्नुयुः ।। २४ ।।[१]

तपश्च ब्रह्मचर्यं च यज्ञः स्वाध्याय एव च ।
दानमार्जवमेतानि यदि स्युरफलानि वै ।। २५ ।।[२]

नाचरिष्यन्परे धर्मं परे परतरे च ये ।
विप्रलम्भोऽयमत्यन्तं यदिस्युरफलाःक्रियाः ।। २६ ।।[३]

**लक्षालङ्कारः** नाचरिष्यन् परे धर्मम् इत्यत्र परे अन्यस्मिन् पुरुषे अन्नदानादिधर्मं, परे स्वर्गादिपरलोकविषये यज्ञादिधर्मं, परतरे परमात्मनि विषये पूजादिधर्मं नाचरिष्यन् यः भवति, अत्यन्तम् अयं विप्रलम्भः परान् प्रति धर्मवचनं च यदि भवति, तर्हि तस्य सर्वाः क्रियाः अफलाः स्युः ।

ऋषयश्चैव देवाश्च गन्धर्वासुरराक्षसाः ।
ईश्वराः कस्य हेतोस्ते चरेयुर्धर्ममादृताः ।। २७ ।।[४]

फलदं त्विह विज्ञाय धातारं श्रेयसि ध्रुवम् ।
धर्मं ते व्यचरन्कृष्णे तद्धि श्रेयः सनातनम् ।। २८ ।।[५]

स नायमफलो धर्मो नाधर्मोऽफलवानपि ।
दृश्यन्तेऽपि हि विद्यानां फलानि तपसां तथा ।। २९ ।।[६]

---

(१) (३)युज्येरन्; युञ्जीयुम्; युञ्जेथुद्; युञ्जीरन् (for युज्येयुद्); विद्यां (द्या); ते नैव युज्येयुर् ज्येरन्); विद्यया नैव युञ्जेयुर् (पूज्येयुर्); (४)केचिद्;(for किश्चिद्); आयुषः (for आप्नुयुः),

(२) (२)स्वाध्यायशीलता ,

(३) (१)परे धर्म; पतेद्धर्मं (२) परैः ()पि च ये); वरैः परचरे च यैः (४)विफलाः (for अ),

(४) (१)हि (for (ए)व); (२) र्वोरग (for र्वासुरं); (४)ईदृशं (for आदृताः,

(५) ध्रुवं; स्थितं(for ध्रुवे); (३)व्य(व्या) चरन्; प्राचं; ()प्याचं; ह्यचं (४) श्रेयः; धर्म्यं; धर्म धर्मं; शर्म; वर्त्म (for धर्म) स हि धर्मः सनातनः

(६) (१)ख-घ-इदमर्धं नास्ति, न(for स); अफलो(for सं) न चायमपरो धर्मो; सदायमफलो धर्म्यो; स नायमफलो धर्मो; (२)नाधर्मो (for न धर्मो); फलवानापि (for फल उच्यते); नाधर्मो (र्मः) फलवानपि नाधर्मः फलमृच्छति; (३)हापिं; ()पि च (for पि हि); यज्ञानां (for विद्यानां),

त्वमात्मनो विजानीहि जन्म कृष्णे यथा श्रुतम् ।
वेत्थ चापि यथा जातो धृष्टद्युम्नः प्रतापवान् ।। ३० ।।(१)

एतावदेव पर्याप्तमुपमानं शुचिस्मिते ।
कर्मणां फलमाप्नोति धीरोऽल्पेनापि तुष्यति ।। ३१ ।।(२)

बहुनापि ह्यविद्वांसो नैव तुष्यन्त्यबुद्धयः ।
तेषां न धर्मजं किञ्चित्प्रेत्य शर्मास्ति वा पुनः ।। ३२ ।।(३)

कर्मणां श्रुतपुण्यानां पापानां च फलोदयः ।
प्रभवश्चात्ययश्चैव देवगुह्यानि भाविनि ।। ३३ ।।(४)

**एतानि वेद यः कश्चिन्मुह्यन्तेऽत्र प्रजा इमाः ।**

अपि कल्पसहस्रेण न स श्रेयोऽधिगच्छति ।
रक्ष्यान्येतानि देवानां गूढमाया हि देवताः ।। ३४ ।।(५)

**अपि कल्पसहस्रेण नरः श्रेयोधिगच्छति ।**(६)

कृताशाश्च व्रताशाश्च तपसा दग्धकिल्बिषाः ।
प्रसादैर्मानसैर्युक्ताः पश्यन्त्येतानि वै द्विजाः ।। ३५ ।।(७)

---

(१) (१)स्वा (त्व)मेव तद्; (त्वमात्मनो; त्वय्येवैतद् विजा नासि; निषे) (२)श्रुता;(अ) श्रुवं (अ)ग्नितः (for श्रुतम्); (३)वेद्मां (for वेत्थ); वापि (for चापि),

(२) (२)अनुमानं; उपायानां (for उपमानं); (३)आप्नोति (for अस्तीति),

(३) (१)ह्यपि (य्य) विद्वांसो (for (अ)पि ह्यविं); (३)येषां (for तेषां); धर्मतः (४) अ-मुह्यन्त्यप्रजा इमाः;,ख-येषां नधर्मस्तेणां वै प्रेत्य शखर्मास्त्यशर्म वा ।,घ- प्रेत्य कर्मास्ति शार्म वा, शर्म कर्म नर्म वा वा पुनः; (अ)शर्म वा; वर्म च(for कर्म वा),

(४) (१)शत;(१)शत; बत; गुप्त; श्रुत; युक्त; अपि (for उत); (४) (अ)त्ययं; (अ)व्ययं; द्विजा (for (अ)प्ययं); (४)वेदं (for देवं); भाविनि,

(५) (१)एतानि वेद (न); तानि वेद न; (२) मुह्यन्तेत्र मानवः शुभदर्शने,

(६) न स (for नरः),

(७) (१)कृशाशाः (for कृशाङ्गाः); सुकृशाशाः सुवृत्ताशाः; सुव्रताः सुकृशाशाश्च; कृशाशाः सुव्रताशाश्च; कृ(हृ)

न फलादर्शनाद्धर्मः शङ्कितव्यो न देवताः ।
यष्टव्यं च प्रयत्नेन दातव्यं चानसूयता ।। ३६ ।।(१)

कर्मणां फलमस्तीह तथैतद्धर्मशासनम् ।
ब्रह्मा प्रोवाच पुत्राणां यदृषिर्वेद कश्यपः ।। ३७ ।।(२)

तस्मात्ते संशयः कृष्णे नीहार इव नश्यतु ।
व्यवस्य सर्वमस्तीति नास्तिक्यं भावमुत्सृज ।। ३८ ।।(३)

ईश्वरं चापि भूतानां धातारं मा च वै क्षिप ।
शिक्षस्वैनं नमस्वैनं मा तेऽभूद्बुद्धिरीदृशी ।। ३९ ।।(४)

यस्य प्रसादात्तद्भक्तो मर्त्यो गच्छत्यमर्त्यताम् ।
उत्तमां देवतां कृष्णे मावमंस्थाः कथञ्चन ।। ४० ।।(५)

**अस्मिन् कैरातपर्वणि २७अध्याये ४०श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अर्जुनाभिगमनपर्वणि युधिष्ठिरवाक्ये सप्तविंशोऽध्यायः ।। २७ ।।

# २८.अष्टविंशोध्यायः

---

ताशाश्च व्रताशाश्च (२)तथैव दग्धकल्मषाः) (३)प्रसादैर(for प्रसन्नैद्); (४)पश्यन्ते तानि (त्योतानि); (for पश्यन्तीह फलोदयं,

(१) (२)शङ्कितव्या चाप्रमत्तेन ईश्चरं; (३)च प्रयत्नेन (४)चान सूयया,

(२) (१) (इ)ह (इ)ति) (२)यथैद् तथैव कर्मे (for धर्म); शसनं (for शाश्चतम्); (३)देवानां; पुत्रेभ्यः (for पुत्राणां); (४) काश्यपः

(३) (३)विमृश्य (for व्यवस्य); (४)नास्तिकं उत्सृजेः नास्तिभावं समुत्सृज,

(४) ईश्चरं (१)सर्व (for चापि); (२)माधिचिक्षिपः; मा च वै (वि) क्षिप; मा विचि क्षिप (३) योक्षस्वैनं; बुध्य; रक्षं ( स्तुदं); ईडं(for शिक्षं),

(५) (१)सम्भूतो; तत्वज्ञाः तद्भ तत्या (for तद्भ क्तो); (२) मर्त्या गच्छत्यं; (३)उत्तमां (रां) देवतां (४) मावमंस्थाः; मा च निन्दीः; मा राधेथाः,

युधिष्ठिरं प्रति द्रौपद्या ब्रह्मणोक्तबृहस्पतिनीतिकथनम् ।।

**द्रौपदी**

नावमन्ये न गर्हे च धर्मं पार्थ कथञ्चन ।
ईश्वरं कुत एवाहमवमन्ये प्रजापतिम् ।। १ ।।[१]

**लक्षालङ्कारः-** ईश्वरं कुत एवाहम् इत्यत्र कुतः कुत्सितवचनात् नैवावमन्य इति सम्बन्धः।

आर्ताहं प्रलपामीदमिति मां विद्धि भारत ।
भूयश्च विलपिष्यामि सुमनास्त्वं निबोध मे ।। २ ।।[२]

**लक्षालङ्कारः.-** भूयश्च विलपिष्यामि सुमनास्तन्निबोध म इत्यत्र सुमनाः सती प्रलपिष्यामीति द्रौपद्यैवोक्तत्वात् 'लिप्यते नूनमीश्वरे' इत्यत्र 'कुत एवाहम्' इत्यत्र च अस्मादुक्तोऽर्थः द्रौपद्याः मानस एवेति ज्ञातव्यम् ।

कर्म खल्विह कर्तयं जानतामित्रकर्शन ।
अकर्माणो हि जीवन्ति स्थावरा नेतरे जनाः ।। ३ ।।[३]

यावद्गोस्तनपानाच्च यावच्चैत्योपसर्पणात् ।
जन्तवः कर्मणा वृत्तिमाप्नुवन्ति युधिष्ठिर ।। ४ ।।[४]

**लक्षालङ्कारः-** यावच्चैत्योपसर्पणात् इत्यत्र चिता शवदाहकाष्ठानिलः तत्सम्बन्धी अग्निः चैत्यः, तत्प्राप्तिपर्यन्तम् । शवदाहजनितपुण्यस्यापि स एव देही पात्रमिति सूचनायेत्थमुक्तम् । अन्यथा आमरणमित्यवक्ष्यत् ।

---

(१) (१) मंस्ये (for मन्ये); च (न); (२)कदाचन; (४)मन्ये (for मंस्ये),

(२) (४)त्वं सन्(for तन्),

(३) (१)कर्तव्यं किल; कर्म वै (कर्मैव) किल; धर्म खल्विह (२)जानता; न ज्ञाता (for जातेन); कर्षण (३)अकर्मणेह (णे हि); स्वकर्मणा हि; सुकर्मणो हि; अकर्मणो हि; अकर्मिणो हि ( (पि) (४)स्थावराणि न चेतनी; स्थावरा णीतरे जनाः

(४) (१)यावद्गोस्तनं(०दुत्थानं;०द्गोः स्तनं); (२)छायोपमं (मे) नृणां; छायोपसेवनात् (सर्पणात्; सर्पणां); इच्छोपसर्पणात्; (३) जन्तुश्च; जन्तवः (for जङ्गमाः); (४)प्राप्नुवन्ति प्रयान्ति प्रेत्य चेह च,

जङ्गमेषु विशेषेण मनुष्या भरतर्षभ ।
इच्छन्ति कर्मणा वृत्तिमवाप्तुं प्रेत्य चेह च ॥ ५ ॥[१]

उत्थानमभिजानन्ति सर्वभूतानि भारत ।
प्रत्यक्षं फलमश्नन्ति कर्मणां लोकसाक्षिकम् ॥ ६ ॥[२]

**लक्षालङ्कारः** उत्थानमभिजानन्ति इत्यत्र उत्थानं कर्मोत्थितेरादिकारणं लोकसाक्षिकं नारायणमिति सम्बन्धः ।

सर्वे हि स्वं समुत्थानमुपजीवन्ति जन्तवः ।
अपि धाता विधाता यो यथायमुदके बकः ॥ ७ ॥[३]

**लक्षालङ्कारः** यो धाता कर्मरक्षको नारायणः यो विधाता कर्मविद्योपदेष्टा गुरुर्ब्रह्मा तं च तं च अस्य कर्मणः उत्थानं पश्यन्ति । उत्थितं च तत्कर्म जन्तवः उपजीवन्ति । अयं मीनग्राही बकः उदके उत्थितं मीनं यथा तथेति सम्बन्धः । मीनवत् कर्म, मीनोत्थापकजलवत् धातृविधाताराविति विवेकः । काम्यकर्मणि निन्दां सूचयितुं बकदृष्टान्तः । 'ग्लै म्लै हर्षक्षये' इति धातोः ग्लासीः अग्लासीः आलस्यं कुर्वित्यर्थः । दंशितः सन्नद्धः ।

अकर्मणां वै भूतानां वृत्तिः स्यान्न हि काचन ।
तदेवाभिप्रपद्येत न विहन्यात्कथञ्चन।[4]

स्वकर्म कुरु मा ग्लासीः कर्मणा भव दंशितः ।
कृतं हि योऽभिजानाति सहस्रे सोऽस्ति नास्ति च ॥ ८ ॥[५]

---

(१) (१)जङ्गमानां (४)चेह वा; चैव हि (for चेह च),
(२) (२)नन्दन्ति (for जानन्ति); (४) कर्मिणां
(३) (१)सर्वे हि; पश्यन्तः (for पश्यामि) स्वयमुं (for स्वं समु); (४) (अं)डजः(for बकः),
(४) (१)अकर्मणा तृप्तिः (for वृत्तिः) नैव (for न हि); द्येरन् द्येयुः) (for द्येत) विहन्युः; हि हन्यात् कदां (for कथं),
(५) (१)स (for स्व); धर्मं (for कर्म); श्लघी; हासीः (for ग्लासीः); (२)कर्मणो; कर्मणे वन्दितः; ( दंसितः) (३)कृतं(for कृत्यं); यो विं; व्यति (for योभिं) (४)वास्ति वा न; सोस्ति नास्ति सोस्ति वा न च (for वा) सहस्रेष्वस्ति वा न वा,

तस्य चापि भवेत्कार्यं विवृद्धौ रक्षणे तथा ।
भक्ष्यमाणो ह्यनादानात्क्षीयेत हिमवानपि।[१]
उत्सीदेरन्प्रजाः सर्वा न कुर्युः कर्म चेद्भुवि ।। ९ ।।

**लक्षालङ्कारः-** तस्य चापि भवेत्कार्यम् इत्यत्र कार्यं कर्मफलनाशनाख्यं कार्यम् ।

अपि चाप्यफलं कर्म पश्यामः कुर्वतो जनान् ।
नान्यथा ह्यपि गच्छन्ति वृत्तिं लोकाः कथञ्चन ।। १० ।।[२]

तथा ह्येता न वर्धेरन्कर्म चेदफलं भवेत्।[3]

यश्च दिष्टफलो लोके यश्चापि हठवादिकः ।
उभावपि शठावेतौ कर्मबुद्धिः प्रशस्यते ।। ११ ।।[४]

**लक्षालङ्कारः-** यश्च दिष्टफलो लोक इत्यत्र दिष्टफलः दिष्टाद्दैवादेव फलं यस्य स तथोक्तः, हठवादकः हठो योग्यता, तत एव फलं भवतीति वादी हठवादकः, दैवाद्वा फलं भविष्यति, मम फलयोग्यताबलाद्वा भविष्यति, किं प्रयत्नेनेति वदन्नित्यर्थः । 'निहीनोऽपशदो जाल्मः' इत्यभिधानात् अपशदौ नीचौ । कर्मबुद्धिः कर्मणि राज्यमोक्षादिफलसाधकयुद्धे शास्त्रश्रवणादिकर्मणि बुद्धिर्यस्य स तथोक्तः ।

यो हि दिष्टमुपासीनो निर्विचेष्टः सुखं शयेत् ।

---

(१) (१) ख-सप्तार्धानि न सन्ति,(२) ()पि वा (for तथा); (३)निरादा(दी)नः; ह्यनादानात्; निराहारः (for ह्यनावापः); (४)क्षीयेत,

(२) (१)उत्सीदेयुः (२)इह; भुवि; अपि (for यदि),

(३) न हृष्येरन्; न वर्तेरन्;(३)अपि चास्य फलं; दृष्ट्वापि च फलं) न ह्यधि; ह्यपि;ह्यति; त्वभि (for ह्यभि) गच्छन्ति (for जानन्ति); वृत्तिं लोकाः; सन्तो (शान्ता; सन्ति); लोके हि दाम्भिकाः (कान्),

(४) (२)चैव; चाहं; चापि; चार्थ (for चायं); वादिकः; वेदिनः; वाचकः; (३)क-हतावेदौ ; घ-उभाववशमापन्नौ, अपि शठौ; अपसदौ,

अवसीदेत्स दुर्बुद्धिरामो घट इवोदके ।। १२ ।।[(१)]

**लक्षालङ्कारः**. निर्विचेष्टः निष्प्रयत्नः । आमो घटः आर्द्रमृत्तिकामयो घटः ।

तथैव हठदुर्बुद्धिः शक्तः कर्मण्यकर्मकृत् ।
आसीत न चिरं जीवेदनाथ इव दुर्बलः ।। १३ ।।[(२)]

अकस्मादिह यः कश्चिदर्थं प्राप्नोति पूरुषः ।
तं हठेनेति मन्यन्ते स हि यत्नो न कस्यचित् ।। १४ ।।[(३)]

**लक्षालङ्कारः**. अकस्मादपि यः कश्चित् इत्यत्र अकस्मात् धनार्जकवाणिज्याद्युपायं विना, स्वपूजादिना प्रसन्नदैवं च विनेत्यर्थः । तं हठेनेति मन्यन्ते तात्कालिकदर्शिनो जनाः । 'प्रत्यक्षं चक्षुषा दृष्ट'मिति वक्ष्यमाणत्वात् तात्कालिकदर्शिन इत्युक्तम् । एवमन्यत्राप्यूह्यम् । सर्वोत्पत्तिमन्निमित्तकारणस्य दैवस्य कर्मरूपादृष्टस्य च क्वापि त्यागायोगात् सः हठः कस्यचिद्यत्नो न । उपलक्षणं चैतत् । दैवं च नेति ग्राह्यम् ।

यच्चापि किञ्चित्पुरुषो दिष्टं नाम भजत्युत ।
दैवेन विधिना पार्थ तद्दैवमिति निश्चितम् ।। १५ ।।[(४)]

**लक्षालङ्कारः** यच्चापि कश्चित्पुरुष इत्यत्र दैवेन देवसम्बन्धिना विधिना आज्ञया, अस्मिन्नेव जन्मनि कृतात्युत्कटदेवपूजनेन वा वाणिज्यादिधनार्ज(न)कयत्नशून्यानां राजपदायोग्यकीटादीनां व्यासादिभिर्यद्राज्यादिकं दत्तं, तद्दैवमिति निश्चितं तात्कालिकदर्शिभिर्जनैर्निश्चितमिति योजना ।

---

(१) (१)उदासीनो; उपासीत; (२)निर्विशङ्कः सुखं स्वपन् ( शयेत्; सचेत्); स्वपन्सुरवं) (३)स(for सु); (४)वोदके (for इवाम्भसि),

(२) (१)तथेति (for तथैव); दुर्बुद्धिः (for बुद्धिर्यः) (२)अपुण्यं (for अकर्म); (३)आसीनो; आसीदेन् कृपणं (for न चिरं),

(३) (१)इह (for अपि); अकस्मात्कस्यचिधोर्य अकस्माद्धेवधः कश्चित् (२)मानवः (for पूरुषः) प्राप्नो त्यनयपूरुषः; फलमाप्नोति पूं) (३)हठादिति (for हठें) मन्येत (for मल्यन्ते); (४)तु (for हि),

(४) (१)यश्चापि कश्चि त्पुरुषो; (२)भजं; वदं (for लभं); दिष्टं नालभते क्षित दि(हृ) ष्टादुपलभत्युत; दिष्टं नाम लभेत वै,

यत्स्वयं कर्मणा किञ्चित्फलमाप्नोति पूरुषः ।
प्रत्यक्षमेतल्लोकेषु तत्पौरुषमिति श्रुतम् ।। १६ ।।[१]

**लक्षालङ्कारः**- यत्त्वयं कर्मणा किञ्चित् इत्यत्र कर्मणा कृषिवाणिग्यादिरूपधनार्जककर्मणा प्रत्यक्षं चक्षुषा दृष्टं अर्थं साधनसहितमर्थम् । अस्मिन् जन्मनि अकृतदेवता(दि) भक्तीनां विप्राणां वैश्यवृत्तिवत् स्वायोग्यवाणिज्यादिना यद्धनं प्राप्यते, तत्पौरुषम् । केवलपुरुषप्रयत्नसिद्धत्वात् पौरुषमिति तात्कालिकदर्शिभिर्जनैः स्मृतमिति योजना ।

स्वभावतः प्रवृत्तो यः प्राप्नोत्यर्थं न कारणात् ।
तत्स्वभावात्मकं विद्धि फलं पुरुषसत्तम ।। १७ ।।[२]

**लक्षालङ्कारः**- स्वभावतः प्रवृत्तोऽन्य इत्यत्र हठस्यैव स्वभाव इति नामान्तरं दातुं उक्तस्यैव प्रमेयस्य पुनरारम्भः ।

एवं हठाच्च दैवाच्च स्वभावात्कर्मणस्तथा ।
यानि प्राप्नोति पुरुषस्तत्फलं पूर्वकर्मणाम् ।। १८ ।।[३]

**लक्षालङ्कारः** एवं हठाच्च दैवाच्च इत्यत्र स्वभावात् स्वभावाख्यात् हठात् । अन्यथा 'त्रैधमेतत्प्रशस्यते', 'चतुर्थं नात्र कारण'मिति च वक्ष्यमाणविरोधः । ननु हठादेव क्वचिदर्थप्राप्तौ दैवप्रयत्नयोः अर्थरूपकार्ये व्यभिचारादकारणता वा, व्रीहियववद्वैकल्पिककारण त्वे प्रयत्नस्यानावश्यकत्वापत्त्या प्रकृतानुपयोगो वा इति चेत्तत्राह - तत्फलं पूर्वकर्मण इति । केवलहठात् केवलप्रयत्नात् केवलं दैवाच्च यत्फलं जायत इति तात्कालिकदर्शिनो मन्यन्ते, तदपि फलं पूर्वकर्मणः जन्मान्तरे धनाकाङ्क्षया कृतवायव्ययागादिप्रयत्नरूपपुण्यकर्मणः । इदं चोपलक्षणम् । कर्मप्रसन्नदैवात् कर्मकर्तृयोग्यतायाश्चेत्यपि ग्राह्यम् । एवञ्चास्मिन् जन्मनि दैवप्रयत्नयोग्यतानां उक्तविधया क्वचित्क्वचिद्दर्शनेऽपि अदृष्टद्वारकजन्मा-न्तरीयप्रयत्नात् तत्प्रसन्नदैवात् आधुनिकदेहमादाय योग्यताभावेऽपि देहस्थजीवस्य अनादिकालीनयोग्यताभावे

---

(१) (१)यत्त्वयं; यत्नवान् (for यत्स्वयं); कर्मणां; कर्मणः; (३)प्रत्यक्षमतेल्लोकेषु); (४) श्रुतं; स्फुटं (for स्मृतम्) ,

(२) (१)यः(for न्य); (२)अर्थं (for अर्थान्); न कारणत्; अकारणं,

(३) (३)यद्यत् (for यदि); यच्च (for यानि); (४) पुर्व (सर्व) कर्मणां,

**तत्तत्फलसम्पत्तेरेवासम्भवेन अनादिकालीनयोग्यतायाश्च सर्वत्र फलस्य जायमानत्वान्न क्वापि व्यभिचारः । नापि वैकल्पिककारणतेति भावः ।**

धातापि हि स्वकर्मैव तैस्तैर्हेतुभिरीश्वरः ।
विदधाति विभज्येह फलं पूर्वकृतं नृणाम् ।। १९ ।।

**लक्षालङ्कारः** एतदेव विशदयति - धाताऽपीति । अपिपदेन हठो गृह्यते ।

यद्ध्ययं पुरुषः किञ्चित्कुरुते वै शुभाशुभम् ।
तद्धातृविहितं विद्धि पूर्वकर्मफलोदयम् ।। २० ।।(१)

कारणं तस्य देहोऽयं धातुः कर्मणि वर्तते ।
स यथा प्रेरयत्येनं तथायं कुरुतेऽवशः ।। २१ ।।(२)

**लक्षालङ्कारः. अयम् एतज्जीवसम्बन्धी देहः । धातुः कर्मणि कर्मणि इत्यत्र धातुः प्रेरणात् क्रियमाणे कर्मणि कर्मणि ।**

तेषु तेषु हि कृत्येषु विनियोक्ता महेश्वरः ।
सर्वभूतानि कौन्तेय कारयत्यवशान्यपि ।। २२ ।।(३)

मनसार्थान्विनिश्चित्य पश्चात्प्राप्नोति कर्मणा ।
बुद्धिपूर्वं स्वयं वीर पुरुषस्तत्र कारणम् ।। २३ ।।(४)

**लक्षालङ्कारः- मनसा तद्विनिश्चित्य इत्यत्र तत् भाविफलम् ।**

सङ्ख्यातुं नैव शक्यानि कर्माणि पुरुषर्षभ ।

(१) (१)यद्ययं; यदयं; यत्स्वयं; यद्धि यत्; यद्धि यः (for यद्धययं);कश्चित्; (३)धात्रा (for धातृ),
(२) (२)कर्मणि वर्तते कर्म प्रवर्तते (for कर्मणि कर्मणि); (४)स (for (अ) यं),
(३) (२)योज्य; युक्तो; युज्य (for योक्ता),
(४) (१)स न पार्थ; मनसात्मा) (३)वीर; (for वीरः) (for धीरः),

अगारनगराणां हि सिद्धिः पुरुषहैतुकी ।। २४ ।।[१]

**लक्षालङ्कारः-** तर्हि प्राचीनपुण्यकर्माख्यप्रयत्नादेव राज्यं भविष्यति, किमधुना युद्धादिप्रयत्नेन इत्यत आह - अगारनगराणामिति । पुरुषहैतुकी आधुनिकपुरुषप्रयत्नाख्यहेतुमती । अदृष्टस्यापि दृष्टकारणमेलकतया कारणत्वात् दृष्टप्रयत्नोऽप्यपेक्षितः । अत एव हठात् दैवाच्च प्राप्तराज्यादिसम्पद्यपि निधेर्निक्षेपाद्वा प्रकृतधनलाभः । पश्चाद्धननिमित्तगजतुरगादिसेनाप्राप्तिः । सेनया च परितः शत्रुषु निर्जितेषु सत्सु निष्कण्टकराज्यप्राप्तिरिति आधुनिकपुरुषप्रयत्नमन्तर्भाव्यैव सर्वत्र राज्यलाभ इति भावः । अगारनगरादिषु काष्ठकार्वादिविषयकपुरुषप्रयत्नः ।

तिले तैलं गवि क्षीरं काष्ठे पावकमन्ततः ।
धिया धीरो विजानीयादुपायं चास्य सिद्धये ।। २५ ।।[२]

**लक्षालङ्कारः-** तिले तैलयन्त्रादिपुरुषप्रयत्नः । गवि गोदोहनाख्यापुरुषप्रयत्नः । काष्ठे अरणीमथनाख्यपुरुषप्रयत्नः ।

ततः प्रवर्तते पश्चात्कारणैस्तस्य सिद्धये ।
तां सिद्धिमुपजीवन्ति कर्मजामिह जन्तवः ।। २६ ।।[३]

कुशलेन कृतं कर्म कर्त्रा साधु स्वनुष्ठितम् ।
इदं त्वकुशलेनेति विशेषादुपलभ्यते ।। २७ ।।[४]

इष्टापूर्तफलं न स्यान्न शिष्यो न गुरुर्भवेत् ।
पुरुषः कर्मसाध्येषु स्याच्चेदयमकारणम् ।। २८ ।।

**लक्षालङ्कारः-** पुरुषः कर्मसाध्येषु इत्यत्र अयम् इदानीन्तनप्रयत्नकर्ता पुरुष इति

---

(१) (३)आगारं न; आगारनं दीनां (for णां हि); (४)हेतुका; दैविकी; हेतुकी,
(२) (१)सन्ततिः; मेव च (for मन्ततः);(२) अ-क-घ-काष्ठेयं पावकं ततः, काष्ठे वा पावकं ततः; (३) एवं (for धिया); (४) उपायाशू; उपायांशू चार्थ; चापि; तस्य (for चास्य),
(३) (२)सिद्धिस्तस्येहकारणैः; कारणैस्तस्य सिद्धये; कारणेष्वर्थसि (४) कर्मजाम्; कर्मणाम्,
(४) (२)कर्ता (for कर्त्रा); स्वनिष्ठितं; त्वनिष्ठितं; स्वनुष्ठितं सुनिष्ठितं (for विनिं) कर्त्रा साधुष्वनुष्ठितं; कर्ता साधुष्वनु(धि)ष्ठितं; (३) त्वाकुशलेनेति; तु कुं चाकुं इदं चाकुलतां नेति,

सम्बन्धः । कर्मसाध्येषु कर्मफलेषु ।

कर्तृत्वादेव पुरुषः कर्मसिद्धौ प्रशस्यते ।
असिद्धौ निन्द्यते चापि कर्मनाशात्कथन्त्विह ।। २९ ।।[(१)]

**लक्षालङ्कारः** इह कर्मनाशः कथं त्विति विचारे कर्तुरकौशलादिति निन्द्यते इति योजना । एवञ्च उक्तविधया सर्वत्र पुरुषाभ्यां जीवपराभ्यां प्रयत्नाच्च जातं पुरुषप्रयत्नजं किञ्चित् किञ्चिन, सर्वं कार्यमित्यर्थः ।

सर्वमेव हठेनैके दैवेनैके वदन्त्युत ।
पुंसः प्रयत्नजं केचित्त्रैवधमेतन्निरुच्यतेस ।। ३० ।।[(२)]

**लक्षालङ्कारः** एके अकुशलबुद्धयः कर्मणा केवलपुरुषप्रयत्नेनेति वदन्ति । एके हठेन केवलहठेनेति वदन्ति । एके दिष्टेन केवलदिष्टेनेति वदन्ति । एतत्त्रैधं त्रिप्रकारककारणमेलनं प्रशस्यते प्रौढपुरुषैः कथ्यते ।

न चैवैतावता कार्यं मन्यन्त इति चापरे।
अस्ति सर्वमदृश्यं च दैवाद् दृष्यं तथा हठः ।। ३१ ।।[(३)]

**लक्षालङ्कारः**- न चैवैतावता कार्यं इत्यत्र अपरे निरीश्वरवादिनश्च एतावता त्रित्वनियतकारणसमुदायेन कार्यं नैवेति च मन्यन्ते । ईश्वराख्यतृतीयकारणस्यासम्मतत्वात् कारणद्वितयमेवालमिति वदन्तीति भावः । अस्ति सर्वसदृश्यं तत् इत्यत्र तत्सर्वं स्वभाव-कर्म-दैवाख्यकारणत्रितयमस्ति । तर्हि त्रयमपि कुतो न दृश्यत इत्यत उक्तं - अदृश्यं चेति । चशब्देन दृश्यं च गृह्यते । जीवो दृश्यः, अदृष्टेश्वरावदृश्यौ । अदर्शनादीश्वरानङ्गीकारे

---

(१) (१)ह्येव; चैव (for एव); (३)असिद्धायां) (४)कर्मसिद्धौ; कर्मनाशात्; कर्ता नासीत्; कर्तृनाशः
(२) (१)एतद् (for एव ); (२) दैवे (for दिष्टें); भवन्ति (for वदन्ति); पुनः (for उत); (३)पौरुषः; पुंसः (for पुरुष); प्रभूतं (for प्रयत्नजं); किञ्चित् (for कें) पौ(पु)रुषं यत्नजं विद्धि (किञ्चित्); (४)न चैवेतद्; दैवमेतद् (मेव); (for त्रैधमेतन्); निरुध्य (च्य)ते; विकृष्यते; हि दृश्यते; विशिष्यते प्रतीष्यते; त्रेधा ह्येतद्विभज्यते,
(३) (१)किञ्चित् (for कार्यं); न चैवं ( चैनं; च वै); तावता कार्यं; न चैवैतानि कार्याणि (कर्माणि); (२) मंस्यैत (for मन्यन्त); किञ्चिदेव स्वभावतः) (३)तद्(for तु); अस्ति पूर्वमदृष्टं) (ष्टे)तत्,

त्वदभिलषितमदृष्टमपि कारणं न स्यात् । श्रुत्या दर्शनं तु उभयोरपि सममिति च सूचयितुं चशब्दः । पूर्वानवगतत्वात् अपूर्वता चोभयोः समेति सूचनाया-दृश्यपदम् । किञ्च सर्वथा अदृष्टमेव शशश‍ृङ्गादिकं नास्ति, ईश्वरस्तु न तथेत्याशयेनोक्तं - दैवाद्दृश्यं इति । दैवात् दैवप्रसादात् योगिभिर्दृश्यं च, तथा हठः (वि)त्रिविधपुरुषस्वभावोऽपि दृश्यः ।

दृश्यते हि हठाच्चैव दिष्टाच्चार्थस्य सन्ततिः ।[१]
किञ्चिद्दैवाद्धठात्किञ्चित्किञ्चिदेव स्वभावतः ।। ३२ ।।

पुरुषः फलमाप्नोति चतुर्थं नात्र कारणम् ।
कुशलाः प्रतिजानन्ति ये वै तत्त्वविदो जनाः ।। ३३ ।।[२]

**लक्षालङ्कारः** कुशलाः प्रतिजानन्ति इत्यत्र कुशलाः प्रति कार्यं कार्यं प्रति जानन्ति कारणत्रितयमपि जानन्ति, ते तत्वविदुष इति सम्बन्धः ।

तथैव धाता भूतानामिष्टानिष्टफलप्रदः ।
यदि न स्यान्न भूतानां कृपणो नाम कश्चन ।। ३४ ।।

**लक्षालङ्कारः** अधुना प्रकारान्तरेण निरीश्वरवादं निराकरोति - तथैव धाता भूतानां इति । भूतानां प्राणिनां मध्ये कश्चन कृपणः दरिद्रः न स्यात् । जीवस्य, धनार्जनप्रयत्नस्य च सत्त्वेऽपि एकस्य दारिद्र्यं देवताप्रसादाभावनिमित्तमेव । अत ईशोऽप्यस्त्येवेति भावः ।

यं यमर्थमभिप्रेप्सुः कुरुते कर्म पूरुषः ।
तत्तत्सफलमेव स्याद्यदि न स्यात्पुराकृतम् ।। ३५ ।।[३]

त्रिद्वारामर्थसिद्धिं तु नानुपश्यन्ति ये नराः ।

---

(१) (१) (अ)दृष्टं; दृष्टं; दैवात्; दैवं (for दिष्टं); दैवं; चैतत्; दिष्टं (for चैव); हठे; हठं(for हठः); ()पि वै (for हि); दृष्टात् (for दिष्टात्) चै(दै) दैवाच्च; सर्वार्थ; अन्नस्य (for चार्थस्य); संनिधिः; संनतिः
(२) (२)चैव (for एव); स्वभावतः; कर्मभिः कर्मणा; (४)नैव नार्य(for नात्र); तत्वनिपुणा। चे वै(च) तत्वविदो जनाः; एनद्धि (द्रै) विदुषो जनाः,
(३) (४)इदं (for यदि); किलासुखं (for पुराकृतम्),

तथैवानर्थसिद्धि  यथा लोकास्तथैव ते ॥ ३६ ॥[१]

**लक्षालङ्कारः** यथा लोका इत्यत्र लोकाः पामरजनाः ।

कर्तव्यं त्वेव कर्मेति मनोरेष विनिश्चयः ।
एकान्तेन ह्यनीहोऽयं पराभवति पूरुषः ॥ ३७ ॥[२]

**लक्षालङ्कारः**- एकान्तेन नियमेन ॥

आ मृत्योः श्रियमन्विच्छेन्नैनां मन्येत दुर्लभाम् (3)

तत्तु निःसंशयं न स्यात्त्वब्य्यर्ध्यण्यवस्थिते ॥ ३८ ॥

कुर्वतो हि भवत्येव कर्म चास्य प्रशस्यते ।
कुर्वतो हि भवत्येव प्रायेणेह युधिष्ठिर ।
एकान्तफलसिद्धि तु न विन्दत्यलसः क्वचित् ॥ ३९ ॥[४]

**लक्षालङ्कारः** कर्म चास्य इत्यत्र अस्य जीवस्य ।

असम्भवे त्वस्य हेतुः प्रायश्चित्तं तु लक्षयेत् ।
कृते कर्मणि राजेन्द्र तथानृण्यमवाप्नुते ॥[५]

**लक्षालङ्कारः** असम्भवे तत्र हेतुः इत्यत्र तत्र तस्मिन् अलसस्य फलासम्भवे प्रायः हेतुः चित्तं तु चित्तमेव लक्ष्यते ।

---

(१) (१)त्रिविधाम्; त्रिधानाम्; त्रिधाराम्; अद्वाराम् (for त्रिद्वाराम्); (२)तां न (for नानु); (३)तु; वै (for च); (४)बालासू (लस्); लोकम् (अन्धम्); यथैवात्मा (ए)वात्म (for लोकास्) यथा लोकाः
(२) (१)चैव; एव (for त्वेव); कर्तव्यं कर्म चैवेति; (२) एवं(for एष) कर्मणा मेव निश्चयः
(३) (३) ह्यनीशो; ह्यनीहे; ह्यनर्थौ(४) वर्ततेस्मासु सम्प्रति
(४) (१) भि, पि (for हि (ए)ते (ए)वं) (for (ए)व)भ्रवन्तोपि भवन्त्येव; कुर्वन्तोपि भवन्तोपि; कुरुते लभते सिद्धीं। (२)हि; (ए)व ((इ)ह); (३) च (for तु) (४)विन्दन्त्यलसाः
(५) (१)असम्भवम् यस्य हेतुः; तत्र हेतुः; त्वत्र हेतुः; त्व( वा; तु) हेतुः स्यात्; तस्य हेतुः, (२)च(for तु); लक्षति; लक्षयेत् (३)कृतकर्माणि; कृत्वा कर्माणि कृते कर्माणि (४)अवाप्नुते,

अलक्ष्मीराविशत्येनं शयानमलसं नरम् ।। ४० ।।

निःसंशयं फलं लब्ध्वा दक्षो भूतिमुपाश्नुते ।। ४१ ।।(१)

अनर्थाः संशयावस्थाः सिद्ध्यन्ते मुक्तसंशयाः ।

धीरा नराः कर्मरता ननु निःसंशयाः क्वचित् ।। ४२ ।।(२)

**लक्षालङ्कारः** अनर्थं संशयावस्थम् इत्यत्र वृण्वते आवृण्वते स्ववशे कुर्वन्तीत्यर्थः । कर्मरताः प्रयत्नवन्तः ।

एकान्तेन ह्यनर्थोऽयं वर्ततेऽस्मासु साम्प्रतम् ।

स तु निःसंशयं न स्यात्त्वयि कर्मण्यवस्थिते।(३)

**लक्षालङ्कारः**- सतु निस्संशयं न स्यात् इत्यत्र त्वयि कर्मणि युद्धकर्मण्यवस्थिते सति सः अनर्थः निस्संशयं न स्यात् । अथवा राज्यलाभाख्यकार्यसिद्धिश्च स्यात् ।

अथवा सिद्धिरेव स्यादभिमानं तदेव ते ।। ४३ ।।

वृकोदरस्य बीभत्सोर्भ्रात्रोश्च यमयोरपि।(४)

अन्येषां कर्म सफलमस्माकमपि वा पुनः ।। ४४ ।।

**लक्षालङ्कारः** ते तव वृकोदरस्य बीभत्सोर्यमयोरपि महिमानं भवान् तदैव कर्मावस्थितिकाल एव बुद्ध्येत जानीयात् । अन्येषां कर्म वा सफलं, अस्माकं कर्म वा सफलमिति च कृतकर्मा

---

(१) (१)नाशयति; लन्धयति (for आविशति); एव; एवं (for एनं); (४) अ-घ-भूमि, एवं (for दक्षो) बुद्धिम्; पूतिम् भूमिम् (for भूतिम्) ,

(२) (१)अनर्थं संशयावस्था; अनर्थाः संशयावस्थाः (२)श्रृण्वं (ण्व)ते श्रृणुते; सिध्यन्ते; वृणुते; श्रृणु मे; श्रृण्वन्तो (for वृण्वते) मुक्तसंशयः गृणन्त्यामुक्तं; गृह्णन्त्यामुक्तं; (३)वीरा(for धीरा); कराः (for रताः); (४)ननु; न च (for न तु); निःसंशयाः,

(३) (१)एका र्थेन; एकत्वेन (२)सम्प्रतं; सम्प्रति; (३) स (न) निःसंशयो; यः(न) (४)महिमा ह्ययमेव ते,

(४) (१)सिद्ध्येव (२)महिमानं; साभिमानं; अभिमानं; अभिमानात् (for महिमा तु) तमेव; तदेव; मयेव (for तथैव) च (for ते),

कृतप्रयत्नः भवान् विप्रकर्षेण त्रयोदशवर्षानन्तरं बुद्ध्येत जानीयात् इति योजना ।

विप्रकर्षेण बुध्येत कृतकर्मा यथाफलम्।(१)
पृथिवीं लाङ्गलेनेह भित्त्वा बीजं वपत्युत ।। ४५ ।।(२)
आस्तेऽथ कर्षकस्तूष्णीं पर्जन्यस्तत्र कारणम् ।। ४६ ।।(३)
वृष्टिश्चेन्नानुगृह्णीयादनेनास्तत्र कर्षकः ।
यदन्यः पुरुषः कुर्यात्तत्कृतं सफलं मया ।। ४७ ।।(४)

लक्षालङ्कारः.- यदन्यः पुरुष इत्यत्र अन्यः कृषीवलपुरुषः ।

तच्चेदं फलमस्माकमपराधो न मे क्वचित् ।
इति दीरोऽन्ववेक्ष्यैव नात्मानं तत्र गर्हयेत् ।। ४८ ।।(५)

कुर्वतो नार्थसिद्धिर्मे भवतीति ह भारत।
निर्वेदो नात्र कर्तव्यो द्वावन्यौ ह्यत्र कारणम् ।। ४९ ।।

लक्षालङ्कारः- द्वावेतौ ह्यस्य कर्मण इत्यत्र अस्य जीवकृतस्य कर्मणः प्रयत्नस्य द्वौ स्वतन्त्रः परमात्मा, तदधीनो जीवश्चेति द्वौ कर्तारौ । तस्मात्कुर्वतो मे अर्थसिद्धिर्नेति निर्वेदो न कर्तव्य इति पूर्वेणान्वयः ।

सिद्धिर्वाप्यथवासिद्धिरप्रवृत्तिरतोऽन्यथा।(६)

---

(१) (१)क-ख-बुह्येन, युध्येत; युज्येत (दुर्बुद्धे) (for बुध्येत); (२) कथं कर्म; कृतं कर्म यथाबलं,
(२) (१) (इ)ह; (इ)व (for (ए)व); (२)कृष्ट्वा (for भित्त्वा); बीजानि (for बीजं); वपन्त्युत; च यत्पुनः; उपन्त्युत
(३) (१)स्म(for थ) कार्षिकं; कर्षिकं) (२)भावकः (कारणं) पावकः; साधकः; भावुकः; भावनः
(४) (१)गृह्णीत; (२)निरर्थो; निर्दोषस्; अनृणम् (for अनेनास्); ननु (for तत्र); कार्षकः; कार्षिकः)
(४) तत्कृतं; सफलं त्वया (for मया),
(५) (१)तच्चेदं फलम् (२) अपं (for नाप ) नरः; ()स्ति न; न मे (for ()स्ति नः); (३)वेक्ष्यैवं,
(६) (१)नात्म; नास्ति; नात्र (for नार्य); (२) (इ)ह; हि; च(for ह); (३)नानु; नाव(for नात्र);कर्तव्यो; मन्तव्यो (for गन्तव्यो); (४)अन्तौ अन्यौ; अर्थौ (for एतौ) ह्यत्र; तत्रः यस्य;

बहूनां समवाये हि भावानां कर्म सिद्ध्यति ।। ५० ।।

लक्षालङ्कारः- अतोऽन्यथा अप्रवृत्तिः । बहूनां चतुर्णां प्रकाराणाम् । यस्य भावना प्रयत्नः, तस्य कर्म सिध्यतीति योजना ।

गुणाभावे फलं न्यूनं भवत्यफलमेव च ।
अनारम्भे हि न फलं न गुणो दृश्यते क्वचित् ।। ५१ ।।[(१)]

लक्षालङ्कारः- गुणभावे प्रयत्नाख्यजैवगुणसद्भावे उत्तमानां हर्यनुग्रहात् फलत्येव । मध्यमानां न्यूनं फलम् । अधमानामफलमेव । गुणः प्रयत्नचमत्कारः ।

देशकालावुपायांश्च मङ्गलं स्वस्तिवृद्धये ।
युनक्ति मेधया धीरो यथाशक्ति यथाबलम् ।। ५२ ।।[(२)]

अप्रमत्तेन तत्कार्यमुपदेष्टा पराक्रमः ।
भूयिष्ठं कर्मयोगेषु दृश्य(ष्ट) एव पराक्रमः ।। ५३ ।।[(३)]

लक्षालङ्कारः- अप्युपायेन इत्यत्र तत् परपराभावनं उपायेन मकरव्यूहाद्यु-पायेन वा कार्यम् । उपदेष्टा अर्जुनस्य कृष्णवत् उपायोपदेष्टा । साम वा कार्यं, पराक्रमो वा कार्यः । योगेषु एतेषु त्रिविधेषूपायेषुकर्मपराक्रमाख्यंकर्मभूयिष्ठंश्रेष्ठम्।सर्वएवपराक्रमाःपरानाक्रमन्तीतिपराक्रमाःकर्म सामर्थ्यम् ।

यत्र धीमानवेक्षेत श्रेयांसं बहुभिर्गुणैः ।

---

अस्य(for ह्यस्य) ; कारणं (for कर्मणः); न प्रवृत्तिर् (for अप्र),

(१) (१)समवायो हि; हि समावाये; (२)कर्मसिद्धयः (ये); भिर्धृतिः (४) फल (for भव) च (for वा) हि न; न तु क्वचित्; ह्रुत; ()प्युत (for च्युत),

(२) (१)उपायं च; उपायाश्च (२)सिद्धये(for वृ०); (३)वीरो; वीतो (for धीरो); (४)यथोत्साहं; यथायोगं (for शक्ति),

(३) (१)कर्तुमानेन अभ्युपायेन; अप्युपायेन (for अप्रमत्तेन); (३)योगेन; योगे तु; (४)दृष्टम्; दृष्ट;दिष्टम्; सिद्धिर् दृश्यम् (for सर्व); पराक्रमं; क्रमे; क्रमाः सिध्यन्त्येव पराक्रमाः

सान्नैवार्थं ततो लिप्सेत्कर्म चास्मै प्रयोजयेत् ॥ ५४ ॥(१)

व्यसनं वास्य काङ्क्षेत विवासं वा युधिष्ठिर ।
अपि सिन्धोर्गिरेर्वापि किं पुनर्मर्त्यधर्मिणः ॥ ५५ ॥(२)

**लक्षालङ्कारः** व्यसनं नाभिकाङ्क्षेत इत्यत्र अपारतया दृढतया च व्यसनविनाशायोग्यस्य सिन्धोर्गिरेर्वाऽपि व्यसनं विनाशं च नाभिकाङ्क्षेत; मर्त्यधर्मिणः किं पुनरिति लोकधर्मः । इमं धर्ममुल्लङ्घ्य अस्मद्व्यसनविनाशकारिणो दुर्योधनस्य तावुभावप्यवश्यं कर्तव्याविति भावः ॥

उत्थानयुक्तः सततं परेषामन्तरैषणे ।
आनृण्यमाप्नोति नरः परस्यात्मन एव च ॥ ५६ ॥(३)

**लक्षालङ्कारः**-उत्थानयुक्तः सततम् इत्यत्र उत्थानं प्रयत्नः । अन्तरेक्षणी अवकाशदर्शी । परस्य परमात्मनः । आत्मनः स्वस्य ।

न त्वेवात्मावमन्तव्यः पुरुषेण कदाचन ।
न ह्यात्मपरिभूतस्य भूतिर्भवति शोभना ॥ ५७ ॥(४)

**लक्षालङ्कारः** - आत्मा परमात्मा ।

एवंसंस्थितिका सिद्धिरियं लोकस्य भारत ।

---

(१) (१)यस्तु; यत्र; यत्तु; येन (for यं तु); वीरो; धीमान् (for धीरो); ह्यवे अवें (for न्ववें ) (२) श्रेयान्त्य (for श्रेयांसं); (३)स्वल्पेप्यर्थे (for सान्नैवार्थं); तथा (for ततो); (४)कर्मणास्मै; कर्म चास्मिन्; कर्म नास्मै; कर्म वास्मै (वा सं),

(२) (१)नाप्यवेक्षेत; वाथ व्यक्तन्त; कस्य लिप्सेत; चास्य काङ्क्षेत; चास्य वेक्षेत; नास्य वीक्षेतः नाभिकाङ्क्षेत बाभिकां; (२)निधनं वा; न निघतं; निवासं वा; विवासं वा,

(३) (२)अन्तरेक्षणे; अन्तरेषणे; अन्तरैषण; मन्त्ररक्षणे; अन्तरक्षेणः; (३)ततः (for नरः); (४) परमात्मन वा (for च); परेषामात्मनस्तथा,

(४) (१)त्वै(for चैं); न (for (अ)व); (४)शोभना (for भारत),

तत्र सिद्धिर्गतिः प्रोक्ता कालावस्थाविभागतः ॥ ५८ ॥[१]

ब्राह्मणं मे पिता पूर्वं वासयामास पण्डितम् ।
सोऽपि सर्वामिमां प्राह पित्रे मे भरतर्षभ ॥ ५९ ॥[२]

नीतिं बृहस्पतिप्रोक्तां भ्रातन्मेऽग्राहयत् पुरा ।
तेषां सकाशादश्रौषमहमेतां तदा गृहे ॥ ६० ॥[३]

लक्षालङ्कारः- तेषां सङ्कथम् इत्यत्र सम्यक्कथा यस्मिन् तं सङ्कथं विद्याप्रसङ्गम् ।

स मां राजन्कर्मवतीमागतामाह सान्त्वयन् ।
शुश्रूषमाणामासीनां पितुरङ्के युधिष्ठिर ॥ ६१ ॥[४]

**अस्मिन् कैरातपर्वणि २८ अध्याये ६१श्लोकाः सन्ति**

इति श्रीमहाभारते वैयासिक्यां वनपर्वणि अर्जुनाभिगमनपर्वणि द्रौपदीवाक्ये अष्टाविंशोऽध्यायः ॥ २८ ॥

# २९. एकोनत्रिंशोऽध्यायः

भीमेन युधिष्ठिरं प्रति नीतिव्युत्पादनपूर्वकं राज्याहरणकर्तव्यत्वेक्तिः ॥

**वैशम्पायनः**

याज्ञसेन्या वचः श्रुत्वा भीमसेनो ह्यमर्षणः ।
निःश्वसन्नुपसङ्गम्य क्रुद्धो राजानमब्रवीत् ॥ १ ॥[५]

---

(१) (१)तत्र (for एवं) सिद्धिगतिः; सांसारिकाः संस्थितिजा; सांस्थितिका; हि संस्थिका; सुसंस्थिता; सांसिद्धिकी (for संस्थितिका ); (२)पाण्डव (for सत्तम) (for भारत); (३)तत्र (for चित्रा); चित्रावस्था; विचित्रा हि (for चित्रा सिद्धि) सिद्धिर्गतिः (४)भागशः

(२) (२)धारया मास; चालं; वर वै गृहे (for पण्डितम्); (३)सोस्मायाहमिदं; सोस्मायार्थमिमं; सोपि सर्वामिमां विस्मायर्य मिमं सोन्मयार्थमिति; सर्व चार्थमिदं (मं),स स्म चार्थमिमं; सोस्याचार्थमिदं,

(३) (३)सकाशाद्; सङ्कथाम्; साङ्कथ्यम्; सङ्कयम्(for साङ्कय्यम्); (४)एतां (for एतत्); पुरा (for पदा),

(४) (१)मा (for मां); (४) एव (for अल्के),

(५) (२)महामनाः; हामर्षणः (for त्यमर्षणः); (४)वचनम् (for राजानम्); राजानमिदमब्रवीत्,

**भीमसेनः**

राज्यस्य पदवीं धर्म्यां व्रज सत्पुरुषोचिताम् ।
धर्मकामार्थहीनानां किं नो वस्तु तपोवने ।। २ ।।[१]

नैव धर्मेण तद्राज्यं नार्जवेन न चौजसा ।
अक्षकूटमधिष्ठाय हृतं दुर्योधनेन वै ।। ३ ।।[२]

गोमायुनेव सिंहानां दुर्बलेन बलीयसाम् ।
आमिषं विघसाशेन तद्वद्राज्यं हि नो हृतम् ।। ४ ।।[३]

**लक्षालङ्कारः-आमिषं विघसाशेन इत्यत्र 'विघसं भुक्तशेषं स्यात्' इति वचनात् भाण्डस्थमुर्वरितमन्नं, पत्रस्थमुच्छिष्टं चेति द्विविधमपि विघसमित्युच्यते । तत्राद्यं यजमानयोग्यम् । द्वितीयं शुनो योग्यम् । अतोऽत्र विघसाशः श्वा । आमिषं यज्ञयोग्यं मांसरूपं हविः ।**

धर्मलेशप्रतिच्छन्नः प्रभवं धर्मकामयोः ।
अर्थमुत्सृज्य किं राजन्दुःखेषु परितप्यसे ।। ५ ।।[४]

**लक्षालङ्कारः-धर्मलेशप्रतिच्छन्न इत्यत्र धर्मलेशेन प्रतिच्छन्नाः तिरस्कृताः महाऽधर्माः येन त्वम् ।**

भवतोऽनवधानेन राज्यं नः पश्यतां हृतम् ।

---

(१) (१)राजन्स्व (for न्सत्) पदवीं ; (२) भज(for व्रज ) (३)धर्मार्थकामहीनानां
(२) (२)नार्जवेण न तेजसा; तथौ जसा (for न चौजसा); (३) मायाम् (for कूटम्); (४)कृतं (for हृतं); वै; मे; च; तत् (नः),
(३) (४)तत्र; महद् (for तद्वद्),
(४) (१)धर्मेण स प्रति (२) क-प्रभवान्;ख-घ-प्रभवं, प्रभावाद्; प्रभावं; (३)अर्थान् (for अर्थम्); (४) दुःखेषु; दुःखेन (for दुर्गेषु),

अहार्यमपि शक्रेण गुप्तं गाण्डीवधन्वना ।। ६ ।।[१]

**लक्षालङ्कारः**- भवतोऽनवधानेन इत्यत्र 'प्रमादोऽनवधानता' इत्यभिधानात् अनवधानेन प्रमादेन, अविचारेणेत्यर्थः ।

कुणीनामिव बिल्वानि पङ्गूनामिव धेनवः ।
हृतमैश्वर्यमस्माकं जीवतां भवतः कृते ।। ७ ।।

**लक्षालङ्कारः**- कुणीनामिव बिल्वानि इत्यत्र 'स्यादेडे बधिरः कुब्जे जडुलः कुकरे कुणिः' इत्यभिधानात् कुणिः कुत्सितकरः ।

भवतः प्रियमित्येव महद्व्यसनमीदृशम् ।
धर्मकामे प्रतीतस्य प्रतिपन्नाः स्म भारत ।। ८ ।।[२]

**लक्षालङ्कारः**-धर्मकामप्रतीतस्य इत्यत्र धर्मस्य कामः कामना तेन प्रतीतस्य प्रसिद्धस्य।

कर्शयामः स्वमित्राणि नन्दयामश्च शात्रवान् ।
आत्मानं भवतां शास्त्रैर्नियम्य भरतर्षभ ।। ९ ।।[३]

**लक्षालङ्कारः**-आत्मानं भवतः शास्त्र इत्यत्र भवतः शास्त्रे शासने ।

यद्वयं न तदैवैतान्धार्तराष्ट्रान्निहन्महि ।

---

(१) (१) ()नवधानेन; (४) धन्विना,

(२) (१)एव (for एवं); (२)प्राप्तं (for महद्); (३)धर्मकाम; कर्मकाम्य; धर्मकाम्ये; धर्मकार्ये तस्य यद्वयं न प्रदीपस्य; प्रपन्नस्य परीतस्य (for प्रतीतस्य) धर्मकाम्याप्रतीतस्य इति पाठे धर्मेच्छायां विश्चस्तस्य;,

(३) (१)कर्ष; हर्षयन्तः (for कर्शं ); स्म; स; ल च; सु(for स्व); कथयामास मिं (२)न जयामः (for नन्दयामः) ; स्म; स्व(for च); बान्ध(for शात्रं ); (३)भवतां; अभवः (for भवतः) शास्त्रैर्;,

भवतः शास्त्रमादाय तन्नस्तपति दुष्कृतम् ।। १० ।।[(१)]

लक्षालङ्कारः-तद्वयं हि तदैवैतान् धार्तराष्ट्रान्निहन्म हि इत्यत्र तदैव अक्षक्रीडाकाल एव एतान् धार्तराष्ट्रान् तत् द्यूतं च निहन्महि । भवतः शास्त्रं शासनं आज्ञामास्थाय यद्दुष्कृतं कर्तव्यस्याकरणं, तत् नः तपतीति योजना ।

अथैनामन्ववेक्षस्व मृगचर्यामिवात्मनः ।
दुर्बलाचरितां राजन्न बलस्थैर्निषेविताम् ।। ११ ।।[(२)]

लक्षालङ्कारः- अथैनाम् इत्यत्र मृगचर्यामिव विद्यमानां एनां वनसञ्चाररूपवृत्तिम् ।

यां न कृष्णो न बीभत्सुर्नाभिमन्युर्न सृञ्जयाः ।
न चाहमभिनन्दामि न च माद्रीसुतावुभौ ।। १२ ।।[(३)]

भवान्धर्मो धर्म इति सततं व्रतकर्शितः ।
कच्चिद्राजन्न निर्वेदादापन्नः क्लीबजीविकाम् ।। १३ ।।[(४)]

लक्षालङ्कारः- कच्चिद्राजन् इत्यत्र निर्वेदात् राज्ये वैराग्यात् तामिमां क्लीबजीविकां नापन्नः कच्चिदिति योजना ।

दुर्मनुष्या हि निर्वेदादापन्नाः क्लीबजीविकाम् ।

दुर्मनुष्या हि निर्वेदमफलं स्वार्थघातकम् ।

---

(१) (१)क-ख- आददीमहि गां सर्वां तथाऽपि श्रेय एव नः । यद्वयं न न यद्वयं तु; हि (for न); तदेव(for तदैव), एनान् (for एतान्) (२)न (for नि); हन्म्मि हि; (३)आस्थाय (for आदा),

(२) (१)अथेमाम्; अङ्गेमाम् (for अथैनाम्) (३)दुर्बल; अधीरा (for अवीरा),

(३) (२)सञ्जयः; सृञ्जयाः (३)अपि (for अभि),

(४) (१)भजन् (for भवान्); (२)वृत्ति (for व्रत); कर्षितः (कालतः) (for कर्शितः) (३)राजा (for राजन्) (४) क-पाप,पापजीविकां; क्लीबजीवितां,

अशक्ताः श्रियमाहर्तुमात्मनः कुर्वते प्रियम् ।। १४ ।।[१]

लक्षालङ्कारः.- अशक्ताः श्रियम् इत्यत्र आत्मनः श्रियमाहर्तुमशक्ताः परस्यैव प्रियं कुर्वते ।

प्रतिपन्ना विषीदन्ति पङ्के गौरिव दुर्बलाः ।

यदस्यान्मर्वकार्येपु समर्था धृतराष्ट्रजाः ।।[2]

स भवान्दृष्टिमाञ्छक्तः पश्यन्नस्मासु पौरुषम् ।

आनृशंस्यपरो राजन्नानर्थमवबुध्यसे ।। १५ ।।[३]

अस्मानमी धार्तराष्ट्राः क्षममाणानलं सतः ।

अशक्तानिव मन्यन्ते तद्दुःखं नाहवे वधः ।। १६ ।।[४]

लक्षालङ्कारः -तद्दुःखं नाहवे वध इत्यत्र नाहवे युद्धाभावेऽपि ।

तत्र चेद्युध्यमानानामजिह्ममनिवर्तिनाम् ।

सर्वशोहि वधः श्रेयान्प्रेत्य लोकान्लभेमहि ।। १७ ।।[५]

लक्षालङ्कारः- तत्र चेत् इत्यत्र तत्र युद्धे अजिह्मं अकुटिलं यथा भवति तथा युध्यमानानां वधश्चेदिति सम्बन्धः ।

अथवा वयमेवैतान्निहत्य भरतर्षभ ।

आददीमहि गां सर्वां तथापि श्रेय एव नः ।। १८ ।।[६]

---

(१) (१)दुर्मनुष्यो (२)सर्वघातकं; स्वार्थघातकं; सर्वघातिनां

(२) (३)अशक्तः स्वयम्; प्रियम् (for श्रियम्); (४)कुरुते,

(३) (१)तुष्टि(for दृष्टि); (२)अस्मासु (for आत्मनि); (४)आत्मार्थम् नावं (for अवं),

(४) ह्यमी (for अमी); अहिंसतः(for अलं सतः); (३)इह; इति; इव (for एव); (४)नो महन्नृप (for नाहवे वधः),

(५) (३)सर्वधा (था; तो); (for सर्वशो); ()पि (for हि),

(६) (१)एतान्हि (for एवैतान्),

सर्वथा कार्यमेतन्नः स्वधर्ममनुतिष्ठताम् ।
काङ्क्षतां विपुलां कीर्तिं वैरं प्रतिचिकीर्षताम् ।। १९ ।।[(१)]

लक्षालङ्कारः- सर्वथा कार्यम् इत्यत्र एवं प्रतिचिकीर्षतां प्रतिकर्तृं विपरीतं कर्तुमिच्छतां दुर्योधनादीनां विषये वैरं सर्वथा नः कार्यमिति सम्बन्धः ।

आत्मार्थं युध्यमानानां विदिते कृत्यलक्षणे ।
अन्यैरपि हृते राज्ये प्रशंसैव न गर्हणा ।। २० ।।[(२)]

लक्षालङ्कारः-आत्मार्थं युध्यमानानाम् इत्यत्र कृत्यलक्षणे कर्तुं योग्यस्य युद्धस्य लक्षणे विदिते सति, आत्मार्थं युध्यमानानां पुरुषाणां राज्ये अन्यैः हत्वा हृतेऽपि प्रशंसैव; गर्हणा नेति योजना ।

कर्शनार्थो हि यो धर्मो मित्राणामात्मनस्तथा ।
व्यसनं नाम तद्राजन्न धर्मः स कुधर्म तत् ।। २१ ।।[(३)]

लक्षालङ्कारः- कर्शितार्थो हि इत्यत्र कर्शितः नाशितः अर्थो येन स तथोक्तः ।

सर्वथा धर्मनित्यं तु पुरुषं धर्मदुर्बलम् ।
त्यजतस्तात धर्मार्थौ प्रेतं दुःखसुखे यथा ।। २२ ।।[(४)]

यस्य धर्मो हि धर्मार्थं क्लेशभाङ्न स पण्डितः ।
न स धर्मस्य वेदार्थं सूर्यस्यान्धः प्रभामिव ।। २३ ।।[(५)]

लक्षालङ्कारः -यस्य धर्मो हि इत्यत्र धर्मः अल्पो धर्मः धर्मार्थक्लेशभाक् बहुतरधर्मार्थ-

(१) (१)सर्वतः; सर्वधा एवं (for एतन्); (४)जिहीर्षतां जिगीषतां,
(२) (२)विचित्रे; जीविते (for विदिते); कृतं ; नृपं (कार्यं) (for कृत्यं); (३)अपि (for अप),
(३) (१)कर्मणोर्थो कर्षणार्थो; कर्शनार्थं; (२) विप्राणाम् (for मित्राणाम्); (३) न स धर्मः स्मृतो नूनं (४) धर्मः स; च धर्मः कुधर्मतः; कुवत्र्म तत् स धर्मः कुरुवत्र्म तत्; एतद्राजन्नधर्मवत्
(४) (१)सर्वदा (२) धन; कर्मं (for धर्मं); (३)जहीतस्; जहीमस्; त्यज्स्; जुह्वतस् (for जहतस्); तं हि; तत्र; तौ तु (for तात); कामार्थौ ) (४)सुख दुःखे,
(५) (१) (अ) नर्थज्ञः; धर्मार्थः; (३) दुःखं (for धर्म); धर्मस्य (४)अन्तः (for अन्धः),

क्लेशभाक् । धर्मस्य धर्मशास्त्रस्य ।

यस्य चार्थार्थमेवार्थः स च नार्थस्य कोविदः ।
रक्षेत भृतकोऽरण्ये यथा गास्तादृगेव सः ।। २४ ।।[१]

लक्षालङ्कारः- यस्य च इत्यत्र यस्य अर्थः अर्थार्थ एव वृद्ध्यादिना पुनः पुनरर्थसम्पत्त्यर्थ एव । भृतकः 'भृतको भृतिभुक्' इति वचनात् धर्मक्रयेण भोजनं कुर्वन् आर्जकः पुण्यं यथा रक्षते, सः अर्थेनार्थार्जिकोऽपि तादृगेव स्यात् ।

अतिवेलं हि योऽर्थार्थी नेतरावनुतिष्ठति ।
स वध्यः सर्वभूतानां ब्रह्महेव जुगुप्सितः ।। २५ ।।[२]

लक्षालङ्कारः- अतिवेलम् इत्यत्र अतिवेलम् अत्यन्तम् । इतरौ धर्मकामौ ।

सततं यश्च कामार्थी नेतरावनुतिष्ठति ।
मित्राणि तस्य नश्यन्ति धर्मार्थाभ्यां च हीयते ।। २६ ।।[३]

तस्य धर्मार्थहीनस्य कामान्ते निधनं ध्रुवम् ।
क्रीडतो रममाणस्य मीनस्येवाम्भसः क्षये।[४]
तस्माद्धर्मार्थयोर्नित्यं न प्रमाद्यन्ति पण्डिताः ।। २७ ।।

लक्षालङ्कारः - क्रीडतो रममाणस्य इत्यत्र क्रीडतः इतस्ततश्चेष्टां कुर्वतः ।

प्रकृतिः सा हि कामस्य पावकस्यारणिर्यथा ।। २८ ।।[५]

लक्षालङ्कारः प्रकृतिस्थो हि इत्यत्र प्रकृतितया स्थितः प्रकृतिस्थः पुरुषः ।

---

(१) (१)चात्मार्थम्; सर्वार्थ; चार्थस्य चार्थार्थ; चात्मार्थ (for चार्थार्थम्); (३)रक्षितो; रक्षेत ()रण्ये ; पुण्यं (for रण्यं); (४)गास् (for स्यात्),
(२) (१)तु (for हि); (२)नेतरान् उपं (for अनुं),
(३) (१)कामार्थं; कामार्थो यस्य धर्मश्च कामार्थं; यश्च धर्मश्च कामार्थी (४)मित्रत्र्थाभ्यां स हीयते,
(४) (२)कामार्थे (३ कामतो (for कामतो ),
(५) (१)न प्रमाद्यति पण्डितः; (२)तौ हि; स्थो हि; स्मार्थ; तर्हि (for सा हि); (३) यथारणिः

सर्वथा धर्ममूलोऽर्थो धर्मश्चार्थपरिग्रहः ।
इतरेतरयोर्नीतौ विद्धि मेघोदधी यथा ।। २९ ।।[१]

लक्षालङ्कारः- धर्मः मूलं यस्य धर्ममूलः । अर्थात् ग्रहः ग्रहणं यस्य स तथोक्तः । इतरेतरयोर्नीतौ इतरेतरयोः सकाशान्नीतौ प्राप्तौ ।

द्रव्यार्थस्पर्शसंयोगे या प्रीतिरुपजायते ।
स कामश्चित्तसङ्कल्पः शरीरं नास्य दृश्यते ।। ३० ।।[२]

लक्षालङ्कारः द्रव्यार्थस्पर्शसंयोग इत्यत्र द्रव्यं परिमलादिद्रव्यम् । अर्थः धनम् । स्पृश्यत इति स्पर्शो वस्त्रवनितादिकम् । सः मनःप्रसादः चित्तस्य सङ्कल्पो यस्मिन् असौ काम्यत इति कामः पुरुषार्थः । अस्य द्रव्याख्यपुरुषार्थकामस्य शरीरं न दृश्यत इति योजना ।

अर्थार्थी पुरुषो राजन्बृहन्तं धर्ममिच्छति ।
अर्थमिच्छति कामार्थी न कामादन्यमिच्छति ।। ३१ ।।[३]

कामार्थी चैव यः कामं न कामादन्यमृच्छति ।[4]

न हि कामेन कामोऽन्यः साध्यते फलमेव तत् ।
उपयोगात्फलस्यैव काष्ठाद्भस्मेव पण्डितैः ।। ३२ ।।[५]

लक्षालङ्कारः- उपयोगात्फलस्येव इत्यत्र फलस्य उपयोगात् भक्षणादिव । एकफलभक्षणानन्तरं

---

(१) (१)स यथा; सर्वधा (२)धर्मश्चार्थस्य दृश्यते; (३)योनी तौ अन्योन्यूयोनी तौ राजन्; योर्नीतौ) (४)इव (for यथा),

(२) (२)चोपं (for उपं); (४)नान्यदस्य वै (for नास्य विद्यते); दृश्यं (for विद्यं)

(३) (२)इच्छति धर्म हन्तुमिच्छति (३)इच्छति (for ऋं) धर्मार्थी; कामार्थं; (४)अन्यद्; अर्थम् क्य अन्यम्); इच्छति,

(४) इच्छति (for ऋच्छति),

(५) (१) न कामेन च (न) (for न हि कामेन); (२) सिध्यते सिध्य त्यफलं) (३)उपभोगात्; उपभोग भवति (for फलस्य); इह; अथ; एव; आहुः (for इव); (४)काष्ठ; कस्माद् (for काष्ठाद्) भस्मीति (for भस्मेव); इह; एव (for इव) पिण्डितं; पण्डितैः; पण्डितान्; विन्दति; पिण्डितैः; पिण्डितः; जायते; पण्डितं; पण्डिताः

तस्मात्फलात् फलान्तरं यथा नास्ति तथेत्यर्थः । काष्ठात् भस्मेव भस्मनि जाते पुनस्तस्मादेव काष्ठात् यथा काष्ठान्तरं न ।

इमाञ्छकुनकान्राजन्हन्ति वैतंसिको यथा ।
एतद्रूपमधर्मस्य भूतेषु हि विहिंसता ॥ ३३ ॥[१]

**लक्षालङ्कारः** 'वैतंसिकः कौटिकश्च मांसिकश्च समं त्रयम्' इत्यमरः । मांसोपजीवी वैतंसिकः शकुनकान् पक्षिणः यथा हन्ति, तथा तस्मिन्मांसे भुक्ते क्रीते वा पुनस्तस्मादेव मांसात् मांसान्तरं यथा न लभते, तथा पण्डितः कामात् कामान्तरं न लभते । अधर्मस्य अधर्मकरणस्यापि एतत् विहितकामकरणमेव रूपं रूपकमुपमा । स्वस्त्रीगमनादिव परस्त्रीगमनादपि तात्कलिकमेव सुखम्, नतु पुनः सुखान्तरसाधकमिति भावः ।

कामाल्लोभाच्च धर्मस्य प्रकृतिं यो न पश्यति ।
स वध्यः सर्वभूतानां प्रेत्य चेह च दुर्मतिः ॥ ३४ ॥[२]

यक्तं ते विदितो राजन्नर्थो द्रव्यपरिग्रहः ।
प्रकृतिं चापि वेत्थास्य विकृतिं चापि भूयसीम् ॥ ३५ ॥[३]

**लक्षालङ्कारः** - व्यक्तं ते विदितो राजन् इत्यत्र द्रव्यपरिग्रहः राजतुरगादिद्रव्यान्तरपरिग्रहवान् । अस्य अर्थस्य प्रकृतिं मूलकारणम्, स्वपित्रार्जितभूमिमित्यर्थः । भूयसी□ भूयोऽपि विद्यमानां प्रकृतिं प्र प्रकर्षस्य, अभिवर्धनस्येत्यर्थः । कृतिं करणम् ।

तस्य नाशे विनाशे वा जरया मरणेन वा ।

---

(१) (१)शकुनकान्; (३)एष(for एतद्); (४)हि; (ए)व (for च) वि नि हिंसतः ता नं; कः भूतेषु विहितं सतां

(२) (१)कामलोभाच्च (२)प्रकृतिं (for प्रवृत्ति); (३)स शत्रुः; स शङ्क्यः; न शङ्क्यः; न वध्यः (३) चैव हि(for चेह च),

(३) (१)विदितं; विहितं (for विदितो); (२)अर्थ; नार्थो; कामो; कामाद् (अर्थे)(for अर्थो); (३) प्रति पत्ति च (for प्रकृतिं चापि); त्वं (for (अ)स्थ); (४)विवृद्धि (for विकृतिं); चैव; चास्य (for चापि),

अनर्थ इति मन्यन्ते सोऽयमस्मासु वर्तते ।। ३६ ।।[१]

**लक्षालङ्कारः**. तस्य अर्थस्य नाशम् आशाया अप्यभावः, नसमासोऽयं, नैराश्य-मित्यर्थः । जरया मरणेन वा विनाशं च अनर्थमिति मन्यन्ते ।

द्रव्यपरिग्रहायार्थो गरीयान्दुर्बलात्मनः ।[2]

इन्द्रियाणां च पञ्चानां मनसो हृदयस्य च ।
विषये वर्तमानानां या प्रीतिरुपजायते।
स काम इति मे बुद्धिः कर्मणां फलमुत्तमम् ।। ३७ ।।

एवमेव पृथग्दृष्ट्वा धर्मार्थौ काममेव च
न धर्मपर एव स्यान्न चार्थपरमो नरः ।। ३८।।

न कामपरमो वा स्यात्सर्वान्सेवेत सर्वदा ।। ३९ ।।

धर्मं पूर्वे धनं मध्ये जघन्ये काममाचरेत् ।
अहन्यनुचरेदेवमेष शास्त्रकृतो विधिः ।। ४० ।।[३]

कामं पूर्वे धनं मध्ये जघन्ये धर्ममाचरेत् ।
वयस्यनुचरेदेवमेष शास्त्रकृतो विधिः ।। ४१ ।।[४]

**लक्षालङ्कारः**- धर्मं पूर्व इत्यत्र पूर्वे दिवसस्य पूर्वभागे, अरुणोदयमारभ्य मध्याह्न पर्यन्तं धर्मं अनु अनुसृत्य चरेत् । मध्ये मध्याह्नमारभ्य रात्रेः प्रथमायामपर्यन्तं धनं अनु अनुसृत्य चरेत् । जघन्ये तदुपरितनकाले काममिति विवेकः ।

धर्मं चार्थं च कामं च यथावद्वदतां वर ।

---

(१) (१)नाशे विनाशे च (for वा),
(२) (३)अनर्थ इति मंस्यन्ते
(३) (१)पूर्वे (२)एव च (for आचरेत्); (३)वयसि(for अहनि); अहन्यहन्यनुचरेत्,
(४) (१)पूर्वे (for वें),

विभज्य काले कालज्ञः सर्वान्सेवेत पण्डितः ।। ४२ ।।[१]

मोक्षो वा परमं श्रेय एष राजन्सुखार्थिनाम् ।
प्राप्तिर्वा बुद्धिमास्थाय सोपायां कुरुनन्दन ।। ४३ ।।[२]

लक्षालङ्कारः प्राप्तं स्वस्वकाले प्राप्तं सोपायं तत्तदुपायेन सहितं तत् धर्मादिकं आशु क्रियतामिति सम्बन्धः ।

तद्वाऽऽशु क्रियतां राजन्प्राप्तिर्वाप्यधिगम्यताम् ।
जीवितं ह्यातुरस्येव दुःखमन्तरवर्तिनः ।। ४४ ।।[३]

**लक्षालङ्कारः** जीवितं ह्यातुरस्यैव इत्यत्र अन्तरवर्तिनः धर्मादीन् विना वर्तिनः ।

विदितश्चैव मे धर्मः सततं चरितश्च ते ।
जानन्तस्त्वयि शंसन्ति सुहृदः कर्मचोदनाम् ।। ४५ ।।[४]

दानं यज्ञाः सतां पूजा वेदधारणमार्जवम् ।
एष धर्मः परो राजन्बलवान्प्रेत्य चेह च ।। ४६ ।।[५]

एष नार्थविहीनेन शक्यो राजन्निषेवितुम् ।
अखिलाः पुरुषव्याघ्र गुणाः स्युर्यद्यपीतरे ।। ४७ ।।[६]

---

(१) (१)च (२) जयतां (for वदं); (३)धर्मज्ञान्; कालज्ञ,

(२) (१)मोक्षं (क्षे) परमश्रेयः (२)एषां (for एष); नित्य(for राजन्); सुखार्थिनः; शुभार्थिनां ; (३) प्राप्ति; प्राप्तं) च (for वा); (४)सोपायां,

(३) (१)तत्राशु; तथाशु; तदाशु; तच्चाशु क्रियते (२)प्राप्ति वा उपदिश्यतां (for अधिं) (३)जीविका,

(४) (१)म्रे (for ते) (२) चरितं च मे (for ते) सततं चरिते शुभे; (३)जानतस्; जानतस् तु प्रशं (for त्वयि शं )

(५) (१)यज्ञाः (२)वेदपारङ्गमात्परं (३)राज्ञः (for राजन्); (४)बलं(for फलं) चेह वै; चेह वा; चैव वै; चैव च,

(६) (१)स च (for एष) स चार्थमर्थ हीनेन; (३) सुखिनः; आत्मनः (for अखिलाः (४)गुणाः शूरेषु संस्थिताः गुणाः सीदन्ति निर्धने,

धर्ममूलं जगद्राजन्नान्यद्धर्माद्विशिष्यते ।
धर्मश्चार्थेन महता शक्यो राजन्निषेवितुम् ॥ ४८ ॥[१]

न चार्थो भैक्ष्यचर्येण नापि क्लैब्येन कर्हिचित् ।
वेत्तुं शक्यः सदा राजन्केवलं धर्मबुद्धिना ॥ ४९॥[२]

**लक्षालङ्कारः- न चार्थो भैक्षचर्येण इत्यत्र क्लैब्येन क्लीबवत्तूष्णीमवस्थानेन 'विदॢ लाभे' इति धातोः वेत्तुं लब्धुम् ।**

प्रतिषिद्धा हि ते याञ्चा यया सिद्ध्यति वै द्विजः ।
तेजसैवार्थलिप्सायां यतस्व पुरुषर्षभ ॥ ५० ॥[३]

भैक्ष्यचर्या न विहिता न च विट्शूद्रजीविका ।
क्षत्रियस्य विशेषेण धर्मस्तु बलमौरसम् ॥ ५१ ॥[४]

स्वधर्मं प्रतिपद्यस्व जहि शत्रून्समागतान् ।
धार्तराष्ट्रवनं पार्थ मया पार्थेन नाशय ।[5]

उदारमेव विद्वांसो धर्मं प्राहुर्मनीषिणः ।
उदारं प्रतिपद्यस्व नावरे स्थातुमर्हसि ॥ ५२ ॥[६]

**लक्षालङ्कारः- उदारमेव इत्यत्र उदारम् उत्कृष्टं स्वस्वविहितवर्तनम् । अवरे अविहित-वर्तने**

---

(१) (२)नान्यः; नान्यं (for नान्यद्); तस्माद् (for धर्माद्),
(२) (१)भैक्ष्य; (२)केनचित्; (३)जेतुं (for वेत्तुं); तदा; ततो; तथा; त्वया (for सदा),
(३) (१)हितो राज्ञे (for हि ते याच्ञा); (२)यथा (for यया); सिध्यन्ति वै द्विजाः; (३)ओजसैवार्थं (४)भरतर्षभ,
(४) (१)भैक्ष्यचर्या; (३)क्षत्रियस्तु; (४) धर्मः स्थात्; धर्मस्य परम् (for बलम्); औजसं,
(५) सनातन् (for समागतान्); राष्ट्रे; राष्ट्रं (for राष्ट्र); बलं (for वनं); राजन् (for पार्थ) धार्तराष्ट्रात्रणं प्राप्य प्रार्थ सर्वान्वि नाशयः),
(६) मेव (१)एवं एतद् एतं(for एव) उदारा धर्मविद्वांसो (२)आहुर् (for प्राहुर्); द्विजातयः (for मनीषिणः) (३) स्वधर्मं (for उदारं);(४) क-वरे; ख-घ- परे,

।

अनुबुध्यस्व राजेन्द्र वेत्थ धर्मान्सनातनान् ।
क्रूरकर्माभिजातोऽसि यस्मादुद्विजते जनः ।। ५३ ।।(१)

**लक्षालङ्कारः-** क्रूरकर्माभिजातोऽसि इत्यत्र क्रूरं दुष्टनिग्रहाख्यं कर्म यस्मिन् तद्राजकुलं क्रूरकर्म इत्युच्यते, तस्मिन् जातः असि ।

प्रजापालनसम्भूतं फलं तव न गर्हितम् ।
एष ते विहितो राजन्धात्रा धर्मः सनातनः ।। ५४ ।।(२)

तस्मादपचितः पार्थ लोके हास्यं गमिष्यसि ।
स्वधर्माद्धि मनुष्याणां चलनं न प्रशस्यते ।। ५५ ।।(३)

स क्षात्रं हृदयं कृत्वा त्यक्त्वेदं शिथिलं मनः ।
वीर्यमास्थाय कौरव्य धुरमुद्वह धुर्यवत् ।। ५६ ।।(४)

न हि केवलधर्मात्मा पृथिवीं जातु कश्चन ।
पार्थिवो व्यजयद्राजन्न भूतिं न पुनः श्रियम् ।। ५७ ।।(५)

**लक्षालङ्कारः-** नहि केवलधर्मेण इत्यत्र यः पार्थिवः केवलधर्मेण अभूतिं अमङ्गलमजयत्। पुनः श्रियं नाजयत् शत्रुकरादपहृत्य स्ववशां नाकरोत्, सोऽपि पृथिवी□ न शास्ति ।

---

(१) (१)अनुगच्छस्व; प्रतिपद्यस्व; अवबुध्यस्व; (२)स्वार्थ (for वेत्थ) धर्मं सनातनं (३)कर्मा हि (for कर्माभि),

(२) (२)राज्ञां (for तव); (४) धात्रा धर्मः,

(३) (१)अस्माद् (for तस्माद्); अपचितः (for विचलितः); (२)हास्यो भविष्यसि; (३)मनुष्येन्द्र(for ष्याणां); (४)च्यवनं(for चलनं),

(४) (२)त्यजेदं; (३)धियम्; धैर्यम् (for वीर्यम्); कौरव्य (for कौन्तेय),

(५) (३) ()प्यं; ()भ्यं; ह्यं (for व्यं),

जिह्वां दत्त्वा बहूनां हि क्षुद्राणां लुब्धचेतसाम् ।
निकृत्या लभते राज्यमाहारमिव शल्यकः ।। ५८ ।।[१]

**लक्षालङ्कारः**- जिह्मं दत्वा इत्यत्र लुब्धचेतसां क्षुद्राणां नीचानां जिह्मं कपटवचनं दत्त्वा निकृत्याऽपि राज्यं यो राजा लभते, स एव पृथिवी□ शास्तीति पूर्वेण सम्बन्धः । शल्यकः शतसूचीभिराच्छादितसर्वाङ्गत्वात् शतसूचिसञ्ज्ञितः पक्षिविशेषः ।

भ्रातरः पूर्वजाताश्च सुसमृद्धाश्च सर्वशः ।
निकृत्या निर्जिता देवैरसुराः पार्थिवर्षभ ।। ५९ ।।[२]

एवं बलवतः सर्वमिति बुद्ध्वा महीपते ।
जहि शत्रून्महाबाहो परां निकृतिमास्थितः ।। ६० ।।[३]

**लक्षालङ्कारः**- एवं बलवताम् इत्यत्र अतिबुद्ध्या अतिशयितबुद्ध्या सर्वं कार्यं भवति ।

न ह्यर्जुनसमः कश्चिद्युधि योद्धा धनुर्धरः ।
भविता वा पुमान्कश्चिन्मत्समो वा गदाधरः ।। ६१ ।।[४]

सत्त्वेन कुरुते युद्धं राजन्सुबलवानपि ।

---

(१) (१)वाचं; जिह्मं (ह्मः) लूत्वा; ऋद्धां; कृत्वा; छित्वा (for दत्त्वा); (२)क्षुब्धानां पापचेतसां; लब्धं; क्षुब्धं; शल्यकः श्वावित् क्षुद्रान्मधुमक्षिकाविशेषान् जिह्वां दत्त्वा बहिर्निःसार्य भक्षयति तद्वज्जिह्वां वाचं दत्त्वा शत्रून् जहि इति प्राश्वः,

(२) (२)सर्वतः (४)पाण्डुनन्दन; पार्थिवर्षभ,

(३) (१)बलवतां; विलपतां (२)विशां (for मही); इति वृद्धानुशासनं (४)निर्वृतिम्; निवृत्तिर् (for निकृतिम्); आस्थितान्,

(४) (२)योधो (for योद्धा); धनञ्जयः (for धनुं); (३)न; (अ)न्यः (for वा) नरः (for पुमान्); (४)यो; (ऽ)न्यो(for वा),

न प्रमाणे न नोत्साहात् सत्त्वस्थो भव पाण्डव ।। ६२ ।।[(१)]

**लक्षालङ्कारः**- सत्वेन कुरुते युद्धम् इत्यत्र सुबलवान् प्रमाणे धर्मशास्त्रे उत्साहादपि दुष्टान् प्रति युद्धं न कुरुते । गजतुरगादिसेनासन्नाहादपि उत्साहात् युद्धं न कुरुते, किन्तु सत्वेनैव युद्धं कुरुते । अतस्त्वमपि सत्वस्थो भव ।

सत्त्वं हि मूलमर्थस्य वितथं यदतोऽन्यथा ।
न तु प्रसक्तं भवति वृक्षच्छायेव हैमनी ।। ६३ ।।[(२)]

अर्थत्यागोऽपि कार्यः स्यादर्थं श्रेयांसमिच्छता ।
बीजौपम्येन कौन्तेय मा ते भूदत्र संशयः ।। ६४ ।।[(३)]

**लक्षालङ्कारः** -अर्थत्याग इत्यत्र श्रेयांसं भूयांसम् । बहुतरव्रीहिलाभाय भूमावल्पबीजावापवत् बहुधनलाभाय अल्पार्थत्यागोऽपि कार्य इत्यर्थः ।

अर्थेन तु समो नार्थो यत्र लभ्येत नोदयः ।
न तत्र विपणः कार्यः खरकण्डूयनं हि तत् ।। ६५ ।।[(४)]

**लक्षालङ्कारः**- अर्थेन तु सम इत्यत्र यत्र द्यूतादौ सकृत् धनोदयो लब्धः । (अनर्थः) पुनरर्थेन समः, सम इत्युपलक्षणम् । अधिकोऽप्यस्ति । विपणं अक्षग्लहं करकण्डूयनं सकृत्सुखदायकं, पश्चात् महादुःखकारणम् इत्यर्थः ।

एवमेव मनुष्येन्द्र धर्मं त्यक्त्वाल्पकं नरः ।

---

(१) (२)न (for सु); (३)चोत्साहात् अप्रमादी महो (सदो; मदो) त्साही; (४)शत्रन्सन्प्रभव (for सत्त्वस्थो भव); पार्थिव (for पाण्डव),

(२) (१)धर्मस्य (for अर्थस्य); (२)धिरायं; वितत (for वितथं); यत्ततो; तु ततो; हि ततो (for यदतो) (४) तालं (for वृक्षं),

(३) (१) (ऽ)पि (for हि) (२)भूयांसम् (for श्रेयांसम्); (३)बीजोपपत्या कौं

(४) (१)सत्वेन (for अर्थेन); समो नार्थो; समानार्थो; (२)यत्र लभ्यो धनोदयः; यत्र लब्धो महोदयः; (३) (अ) न्वेषणा कार्या (for विपणः कार्यः); (४)कण्डूयनं,

बृहन्तं धर्ममाप्नोति स बुद्ध इति निश्चितम् ।। ६६ ।।[१]

**लक्षालङ्कारः-** एवमेव इत्यत्र एवं बीजावापवत् ।

अमित्रं मित्रसम्पन्नं मित्रैर्भिन्दन्ति पण्डिताः ।
भिन्नैर्मित्रैः परित्यक्तं युवानं कुर्वते वशम् ।। ६७ ।।[२]

**लक्षालङ्कारः-** मित्रैर्भिन्दन्ति तैर्मित्रैः सह भेदं कुर्वन्ति ।

सत्त्वे न कुरुते युद्धं राजन्सुबलवानपि ।
नोद्यमेन न होत्राभिः सर्वाः स्वीकुरुते प्रजाः ।। ६८ ।।[३]

**लक्षालङ्कारः-** सत्वे न कुरुते युद्धम् इत्यत्र यः सत्वे सत्यपि । सः मात्राभिः अंशैर्दत्तैरित्यर्थः । नञः प्रत्येकं सम्बन्धः ।

सर्वथा संहतैरेव दुर्बलैर्बलवानपि ।
अमित्रः शक्यते हन्तुं मधुहा भ्रमरैरिव ।। ६९ ।।[४]

यथा राजन्प्रजाः सर्वाः सूर्यः पाति गभस्तिभिः ।
अत्ति चैव तथैव त्वं सदृशः सवितुर्भव ।। ७० ।।[५]

**लक्षालङ्कारः-** यथा राजन् इत्यत्र सायंप्रातः पाति । मध्याह्ने औष्ण्याद्धन्ति ।

एतच्चापि तपो राजन्पुराणमिति नः श्रुतम् ।
विधिना पालनं भूमेर्यत्कृतं नः पितामहैः ।। ७१ ।।[६]

---

(१) (१)एतन् (for एव); (३)बृहद्धर्ममवाप्नोति; (४)सम्बुद्ध निश्चितं; निश्चयः
(२) (१)अमित्रेण च संयुक्तं; (२)विदन्ति; भेदन्ति; (३)त्यक्तान् (for त्यक्तं); (४)युवानं; दुर्बलान्; (दुर्बलं) कुर्वते वशं,
(३) (२)अबलं(for सुबलं) असि (for अपि); (३)मात्राभिः (for हों),
(४) (१)सहितैर् (for संहतैर्); सर्वा स हि मतैरेव; (३)जेतुं (for हन्तुं); (४)अपि (for इव),
(५) (३)हन्ति (for अत्ति); तथैकस्(for तथैव); (४)सदृशः सवितुर् सूर्यस्य सदृशो,
(६) (१)यथा (for एतद्); चापि; वापि (for ह्यपि); त्वां (तु) वितथं; ह्यवितथं (for ह्यपि तपो)

न तथा तपसा राजँल्लोकान्प्राप्नोति क्षत्रियः ।
यथा सृष्टेन युद्धेन विजयेनेतरेण वा।

अपेयात्किल भाः सूर्याल्लक्ष्मीश्चन्द्रमसस्तथा ।
इति लोको व्यवसितो दृष्ट्वेमां भवतो व्यथाम् ।। ७२ ।।(१)

लक्षालङ्कारः- अपेयात् गच्छेत् ।

भवतश्च प्रशंसाभिर्निन्दाभिरितरस्य च ।
कथायुक्ताः परिषदः पृथग्राजन्समागताः ।। ७३ ।।(२)

इदमभ्यधिकं राजन्ब्राह्मणाः कुरवश्च ते ।
समेताः कथयन्तीह मुदिताः सत्यसन्धताम् ।। ७४ ।।(३)

यन्न मोहान्न कार्पण्यान्न लोभान्न भयादपि ।
अनृतं किञ्चिदुक्तं ते न कामान्नार्थकारणात् ।। ७५ ।।(४)

यदेनः कुरुते किञ्चिद्राजा भूमिमवाप्नुवन् ।
सर्वं तन्नुदते पश्चाद्यज्ञैर्विपुलदक्षिणैः ।। ७६ ।।(५)

ब्राह्मणेभ्योऽददद्ग्रामान्गाश्च राजन्सहस्रशः ।
मुच्यते सर्वपापेभ्यस्तमोभ्य इव चन्द्रमाः ।। ७७ ।।(६)

---

एतच्चावितथं (२)निश्चितं (for नः श्रुतम्),
(१) (२)लक्ष्म (for लक्ष्मीश्),
(२) (२)ते (for च); (३)कथयन्त्यः (for कथां); (४)हिताः; सते (for गताः); राजन्प्रथममागताः
(३) इमाम् (for इदम्) अप्यधिकं; अभ्यधिकां; (२)कुरवश्च(for गुं); (४)मृदुतां सत्यसन्धतः; सन्धतान्,
(४) (१)लोभां (for मोहां); (२)क्रोधां (for लोभां),
(५) (२)किञ्चिद्; राज्यं; राजन् (for राजा); भूतिम् (for भूमिम्); अवाप्नुयात् (३)तत्सर्वं नुदति तत् (for तन्नुदते) पश्चान्नुदति तत्सर्वं,
(६) (१)वित्तं; राजन् (for ग्रामान्); (२)ग्रामान् गाश्च सहं (३) वीर (for सर्व); (४)मेधेभ्य; तमोभिर् ( (for तमोभ्य),

पौरजानपदाः सर्वे प्रायशः कुरुनन्दन ।
सवृद्धबालसहिताः शंसन्ति त्वां युधिष्ठिर ।। ७८ ।।(१)

धार्तराष्ट्री महाराज न शंसन्ति मतिं जनाः ।

श्वदृतौ क्षीरमासक्तं ब्रह्म वा वृषले यथा ।
सत्यं स्तेने बलं नार्यां राज्यं दुर्योधने तथा ।। ७९ ।।(२)

इति लोके निर्वचनं पुरश्चरति भारत ।
अपि चैताः स्त्रियो बालाः स्वाध्यायमधिकुर्वते ।। ८० ।।(३)

इमामवस्थां च गते सहास्माभिररिन्दम ।
हन्त नष्टाः स्म सर्वे वै भवतोपद्रवे सति

स भवान्रथमास्थाय सर्वोपकरणान्वितम् ।
त्वरमाणोऽभिनिर्यातु विप्रेभ्योऽर्थविभावकः ।। ८१ ।।(४)

वाचयित्वा द्विजश्रेष्ठानद्यैव गजसाह्वयम्।
अस्त्रविद्भिः परिवृतो भ्रातृभिर्दृढधन्विभिः ।। ८२ ।।

आशीविषसमैर्वीरैर्मरुद्भिरिव वृत्रहा।(५)
अमित्रांस्तेजसा मृद्नन्नसुरानिव वृत्रहा ।

---

(१) (१)राजन् (for सर्वे); (३)सर्वाश्च; समृद्धा; सवृद्धा (for सवृद्ध); बाल (for बालाः); सवालवृद्ध (द्धाः);सहिताः; सहिताः सबालवृद्धाः (४)त्वा,

(२) (१)क्षीरमावृत्तं; क्षीरमासिक्तं; वा पयः सि (स) क्तं; क्षीरमादत्तं

(३) (१)निर्वचनं लोके (२)पुरं; पुरश्् चिराच्् पुनश्् (for चिरं); भवति (for चरति); (३)चैतः; चेतः; चैताः; चैव; चेत्ताः (for चैतत्); (४)अपि; अधि (इव),

(४) (२)नि च (न्वि तम्) प्रति (अनु) ज्ञाय तथेति नः (३)वि; हि (for ऽभि) (४)घातकं; पादकः (for पादकम्); सर्वानर्थविधातकं; विप्रेभ्योर्थविभावकः( भाजकः; तारकः); किल स्वार्थोपपत्तये,

(५) (१)द्विजान्त्यस्ति (for द्विज श्रेष्ठान्); (२)अद्यैव च गजाह्वयं (४)सह (for दृढ); वीर (for वीरैर्),

श्रियमादत्स्व कौन्तेय धार्तराष्ट्रान्महाबल ।। ८३ ।।[१]

लक्षालङ्कारः- अरिहा अरिणा चक्रेण अरीन् शत्रून् हन्तीति अरिहा नारायणः, स इव ।

न हि गाण्डीवमुक्तानां शराणां गार्ध्रवाससाम् ।
स्पर्शमाशीविषाभानां मर्त्यः कश्चन संसहेत् ।। ८४ ।।[२]

१२९*अधिकपाठः

कः परैर्ह्रियमाणानामात्माभावेन संसहेत्

न स वीरो न मातङ्गो न च सोऽश्वोऽस्ति भारत ।
यः सहेत गदावेगं मम क्रुद्धस्य संयुगे ।। ८५ ।।[३]

सृञ्जयैः सह कैकेयैर्वृष्णीनां वृषभेण च ।
कथंस्विद्युधि कौन्तेय न राज्यं प्राप्नुयामहे ।। ८६ ।।[४]

लक्षालङ्कारः- सृञ्जयैः सह कौन्तेयैः इत्यत्र कौन्तेयैः कुन्त्याः सम्बन्धिभिः कुन्तिभोजविषयस्थैरित्यर्थः ।

शत्रुहस्तगतां राजन्कथं स्विन्नाहरेर्महीम् ।
इह यत्नमुपाहृत्य बलेन महतान्वितः ।

अस्मिन् कैरातपर्वणि २९अध्याये ८६श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अर्जुनाभिगमनपर्वणि

---

(१) (१)तरसा (for तेजसा); (२)असुरानिव (सुरेभ्य इव); वृत्रहा; श्रेय (for श्रियम्); राष्ट्रीं (for राष्ट्रान्) धार्तराष्ट्रं महाराजन्न शंसन्ति तथा जनाः,
(२) (१)गाञ्जीवं (२)गृध्रं (for गार्ध्रं ); (३)वेगम् (for स्पर्शम्); (४)न च(for मर्त्यः),
(३) (२)च सोश्वो (for सदश्वो); कश्चन (for भारत ),
(४) (१)चैव (for सह); (२) प्रवरेण; वृषभेण; भरतस्य (for ऋषभेण); (३)कथञ्चिद् विद्धि (for युधि); (४)न राज्यं

भीमवाक्ये त्रयस्त्रिंशोऽध्यायः ।। २९।।

# ३०. त्रिंशोऽध्यायः

युधिष्ठिरेण भीमं प्रति स्वेन प्रतिज्ञाया दुस्त्यजत्वोक्तिपूर्वकं प्रतिज्ञाकालावसान-प्रतिपालनविधानम् ।।

**वैशम्पायनः**

स एवमुक्तस्तु महानुभावः सत्यव्रतो भीमसेनेन राजा ।
अजातशत्रुस्तदनन्तरं वै धैर्यान्वितो वाक्यमिदं बभाषे। १

**युधिष्ठिरः**

असंशयं भारत सत्यमेतद्यन्मां तुदन्वाक्यशल्यैः क्षिणोषि ।
न त्वां विगर्हे प्रतिकूलमेव ममानयाद्धि व्यसनं व आगात् ।। १ ।।

**वैशम्पायनः**

स एवमुक्तस्तु महानुभावःसत्यव्रतो भ्रीमसेनेन राजा ।
अजातशत्रुस्तदनन्तरं वै धैर्यान्वितो वाक्यमिदं बभाषे ।।(1)

अहं ह्यक्षानन्वपद्यं जिहीर्षन्राज्यं सराष्ट्रं धृतराष्ट्रस्य पुत्रात् ।
तन्मां शठः कितवः प्रत्यदेवीत्सुयोधनार्थं सुबलस्य पुत्रः ।। २ ।।(२)
महामायः शकुनिः पर्वतीयः सभामध्ये प्रवपन्नक्षपूगान् ।
अमायिनं मायया प्रत्यजैषीत्ततोऽपश्यं वृजिनं भीमसेन ।। ३ ।।(३)

---

(१) (१)क-ममागाम् ; ख-समागाः;, घ-समागमत्, (२)मां(for मा) शरैः(for शल्यैः); (३)त्वां (for स्वा); एव(for एतन्); (४)हि वै; ते (for हि) ; समागात्; समागाः (for व आगात्); ममानयाद्व्यसनं यत्तदागात्,

(२) (१)अन्वपद्ये जिहीर्षुः; (२)राष्ट्र(for राष्ट्रस्य); पुत्रैः (३)तन्मां; तं मां,

(३) सदा सदः; सभासदः; सभामध्ये (सत्यं सदा); स वै सर्वान् (for सदा सभायां); प्रक्षिपन्) (३)जैषीत् (for दैवीत्),

क्षरंस्तु दृष्ट्वा शकुनेर्यथावत्कामानुकूलानयुजो युजश्च ।
शक्यो नियन्तुमभविष्यदात्मा मन्युस्तु हन्यात्पुरुषस्य धैर्यम्।। ४ ।।[१]

लक्षालङ्कारः क्षरंस्तु दृष्ट्वा इत्यत्र यथावत् शकुनेः कामानुलोमान् कामानुकूलान् युजः क्रीडास्थाने सम्बन्धं कुर्वाणान् अयुजः ममानुकूलतया सम्बन्धमकुर्वाणांश्च अक्षान् दृष्ट्वा क्षरन् हर्षक्षयं प्राप्नुवन् ।

यन्तुं नात्मा शक्यते पौरुषेण मानेन वीर्येण च तात नद्धः ।
न ते वाचो भीमसेनाभ्यसूये मन्ये तथा तद्भवितव्यमासीत् ।। ५ ।।[२]
स नो राजा धृतराष्ट्रस्य पुत्रो न्यपातयद्व्यसने राज्यमिच्छन्।
दास्यं च नोऽगमयद्भीमसेन यत्राभवच्छरणं द्रौपदी नः ।। ६ ।।[३]
त्वं चापि तद्वेत्थ धनञ्जयश्च पुनर्द्यूतायागतानां सभां नः ।
यन्माऽब्रवीद्धृतराष्ट्रस्य पुत्र एकग्लहार्थं भरतानां समक्षम् ।। ७ ।।[४]

लक्षालङ्कारः- तत् भविष्यत् द्यूतम् । नः सभामागतानां सताम् ।

वने समा द्वादश राजपुत्र यथाकामं विदितमजातशत्रो ।
अथापरं चाविदितं चरेथाः सर्वैःसह भ्रातृभिश्छद्मगूढः ।। ८ ।।[५]
त्वां चेच्छ्रुत्वा तात तथा चरन्तमवभोत्स्यन्ते भरतानां चराश्च ।

---

(१) (१)च; तु (for हि); (२)कामानु(न्न); लोभान्; कामानुकूलान्; जयानुलोमान् नयुजो (for अयुजो); जये च; च तत्र (for युजश्च); (३)शत्त्यो (for शक्यं); न भविष्यद् एनान् (for आत्मा); (४)हन्यात्; हन्ते (for हन्ति); मन्युस्तु (श्व)धैर्य पुरुषस्य हन्ति,

(२) (१)मानुषेण; पूरुषेण; (३)वाचो (for वाचं); (४)भवि तेति सत्यं (for भवितव्यमासीत्),

(३) (१)राष्ट्रः सपुत्रो,

(४) (२)धूतं च (for यूताय); आगतांस्तां (स्तान्); सभार्यां; सभायां (for सभां नः); (३)यन्मां ब्रवीद् राष्ट्रः सपुत्र (४)एकग्लहाद्; ग्लहार्थे; एतद्ग्लहार्थं भारतानां; भवतां(for भरतानां),

(५) (२)विजितम्; विहितम् (for विदितम्); (३)तथां (for अथां) विदितैः; अविदितः (च); चाविदितः च तैरथ; चरेसवं (for चरेथाः); (४)सहैतया (for सर्वैः सह); छद्मरूढः; छह्मरूपः; छन्नरूपः

अन्यांश्चरेथास्तावतोऽब्दांस्तथा त्वं निश्चित्य तत्प्रतिजानीहि पार्थ ।।९ ।।(१)

लक्षालङ्कारः- आबुध्यन्ते यदि आबुध्यन्ते ।

चरेश्चेन्नोऽविदितः कालमेतं युक्तो राजन्मोहयित्वा मदीयान् ।
ब्रवीमि सत्यं कुरुसंसदीह तवैव ता भारत पञ्च नद्यः ।। १० ।।(२)

लक्षालङ्कारः- नः सभामागतानां सताम् । चरैश्च नोऽनाविदित इत्यत्र मदीयान् चरान् मोहयित्वा वञ्चयित्वा नः चरैः अनाविदितः अज्ञातः युक्तः भ्रातृभिर्युक्तः एतम् अज्ञातवास-कालं यदि चरेथाः । पञ्चनद्यः परशुरामकृतस्यमन्तपञ्चकाख्यपञ्चनदसम्बन्धिन्यः ।

वयं चैतद्भारत सर्व एव त्वया जिताः कालमपास्य भोगान्।
वसेम इत्याह पुरा स राजा मध्ये कुरूणां स मयोक्तस्तथेति ।। ११ ।।(३)
तत्र द्यूतमभवन्नो जघन्यं तस्मिञ्जिताः प्रव्रजिताश्च सर्वे ।
इत्थं तु देशाननुसञ्चरामो वनानि कृच्छ्राणि च कृच्छ्ररूपाः ।। १२ ।।(४)
सुयोधनश्चापि न शान्तिमिच्छन्भूयः स मन्योर्वशमन्वगच्छत्।
उद्योजयामास कुरूंश्च सर्वान्ये चास्य केचिद्वशमन्वगच्छन् ।। १३ ।।(५)

---

(१) (१)तं चेन्मुक्त्वा; तं चेत्यकत्वा तं वै त्वां (for त्वा); तं चेत्तु त्वां (for त्वां चेच्छुत्वा); (२) एवं भोत्स्यन्ते; अवज्ञास्यन्ति; अवगच्छन्ते; विबोध्यन्ते; बुध्येरन्वै; अवबोध्यन्ते; अनुवेत्सन्ते (for अवभोत्सन्ते); भरतानां च; वै(for स्म ); (३)चरें (for चरे थां); समास्तथा; तथा त्वं; यथा त्वं; तदा मे (for ततस्त्वं); (४)तत् (ए)तत् त्वं(for तत्); प्रब्रवीहि (for प्रतिजानीहि),

(२) (१)चरेच्च नो; चरैश्च नो; चरेश्चैनो; चरेच्छन्नो; नरैस्त्वं नो; चा(च); रैश्छन्नो; चारैश्चेन्नो; शैचारैश्च नो (for चरैश्चेन्नो); अविदितं (२) मुक्तो; व्यक्तो (for युक्तो)) (३) ब्रवीहि; (४)तदैव; तथैव (for तवैव) (ए)ता(for ता),

(३) (१)चैव; चैतद्; वै ते (for चैवं); भारत; कौरवाः (for भ्रातरः); (३)चरेम(for वसेम); पुनश्च; पुरा स्म; पुनः स (for पुरा स),

(४) (२)यस्मिन् (for तस्मिन्) प्रव्रजिताः चापि न स्म (for च); (३)तु (for च); (४)दुर्गाणि (for कृच्छ्रां) घोरं (for कृच्छ्र),

(५) सुयोधनश्चापि न (१)ऐच्छद् (for इच्छन्); (२)च (for स); अभ्यगच्छत्; अद्य गं; (४) अभ्यं(for अन्व),

तं सन्धिमास्थाय सतां सकाशे को नाम जह्यादिह राज्यहेतोः ।

आर्यस्य मन्ये मरणाद्गरीयो यद्धर्ममुत्क्रम्य महीं प्रशासेत् ।। १४ ।।(१)

तदैव चेद्वीर कर्माकरिष्यो यदा द्यूते परिघं पर्यमृक्षः ।

बाहू दिधक्षन्वारितः फाल्गुनेन किं दुष्कृतं भीम तदाभविष्यत् ।। १५ ।।(२)

**लक्षालङ्कारः** तदैव चेद्वीर तथा करिष्य इत्यत्र यदा त्वं द्यूते परिघं पर्यमृक्षः परामर्शमकरोः, 'मृश परामर्शे' इति धातोः लुङीदं रूपम् । यदा बाहू दिधक्षन् फल्गुनेन वारितः । हे वीर तदैव चेत् यथा त्वमात्थ तथा करिष्ये । तदा इदानी□ क्रियमाणत्वे तदैव द्यूतकाले कृते सति दुष्कृतं अक्षक्रीडाख्यं दुष्कर्म करष्यिन् कः । अस्मासु दुष्कृतमपराधं च करिष्यन् कः, न कोऽपि ।

प्रागेव चैवं समयक्रियायाः किं नाब्रवीः पौरुषमाविदानः ।

प्राप्तं तु कालं त्वभिपद्य पश्चात्किं मामिदानीमतिवेलमात्थ।। १६ ।।(३)

भूयोऽपि दुःखं मम भीमसेन दूये विषस्येव रसं हि पीत्वा।

यद्याज्ञसेनीं परिक्लिश्यमानां सन्दृश्य तत्क्षान्तमिति स्म भीम।। १७ ।।(४)

**लक्षालङ्कारः** विषस्येव रसम् इत्यत्र विदित्वेव लब्ध्वेत्यर्थः । याज्ञसेनी□ प्रति यत् क्षान्तं, तद्दुःखं स्मृत्वा भूयोऽपि दूये ।

---

(१) (१)तांस्तान्; तं सत्यम्; तां (सं) सिद्धिम् (for तं सन्धिम्); अवस्थाय (for आस्थाय); (२)कस्य (for राज्य); (४)उत्सज्य (for उत्क्रम्य); प्रशासेः प्रशासेत् (for प्रशिष्यात्),

(२) (१) क-ख-गमिष्ये, कर्माकरिष्ये; तथा (दा); करिष्ये; तथाकरिष्यो; (३)फल्गुणेन; फाल्गुनेन बाहून् विधक्षन् वारितमर्जुनेन; (४)को(for किं); दुष्करं(for दुच्छतं); भीम तथा; भीम सेन)(for भीम तदा); (अ)करिष्यत् (अ)कविष्यः (for (अ)भविष्यत्),

(३) (१)क्रियायां (२)नाब्रवीत्; नोब्रवीत्; नोब्रवीः; माब्रवीः पुरुषम् (for पौरुषम्); आददानः आदधानः; मा विजानन् मा तदानीं) (for आविदानः); (३)प्रतिपद्य; अभिपध अभिपत्य; अतिपात्य (for त्वभिपद्य); (४)वा त्विदानीम् (for मामिदानीम्) मात्रं स्वम् (for वेलम्),

(४) (१)भूयो हि; दूये हि (for भूयोऽपि) वीर्यं (for भीमं) (२)भूयो; जातं; भुये(for दूये); हि पीत्वा (for विदित्वा); (३)परिक्लिश्यमानां; (४)अमृष्य; अवीक्ष्य (for सन्दृश्य); ते; तां; नः (for तत्); अपीह (for इति स्म),

न त्वद्य शक्यं भरतप्रवीर कृत्वा यदुक्तं कुरुवीरमध्ये ।
कालं प्रतीक्षस्व सुखोदयस्य पक्ति फलानामिव बीजवापः ।। १८ ।।(१)

**लक्षालङ्कारः** न त्वद्य शक्यम् इत्यत्र शक्यं त्यक्तुं शक्यम् । कृत्वा समयं कृत्वा ।

यदा हि पूर्वं निकृतो निकृन्तेद्वैरं सपुष्पं सफलं विदित्वा ।
महागुणं हरति हि पौरुषेण तदा वीरो जीवति जीवलोके ।। १९ ।।(२)

**लक्षालङ्कारः-** तथापि पूर्वं निकृतो हि क्षुद्रैः इत्यत्र सपुष्पं प्राग्वाग्विवादादिपुष्पसहितं सफलं अन्ते प्राणापहाराख्यफलसहितं वैरं पूर्वमेव विवेकेन विदित्वा यो वीरः पौरुषेण विद्यमानेनापि महागुणं क्षमाख्यमहागुणं हरति आहरति ।

श्रियं च लोके लभते समग्रां मन्ये चास्मै शत्रवः संनमन्ते।
मित्राणि चैनमचिराद्भजन्ते देवा इवेन्द्रमुपजीवन्ति चैनम् ।। २० ।।(३)
मम प्रतिज्ञां च निबोध सत्यां वृणे धर्मममृताज्जीविताच्च ।
राज्यं च पुत्राश्च यशो धनं च सर्वं न सत्यस्य कलामुपैति ।। २१ ।।(४)

**लक्षालङ्कारः** मम प्रतिज्ञाम् इत्यत्र मुनेर्धर्मात्, अमृतात् मोक्षात्, जीविताच्च कारणात्, मुनिधर्मत्वात् मोक्षदत्वात् जीवनसाफल्यहेतुत्वाच्चेति यावत् । मम प्रतिज्ञां सत्यां निबोध ।

**अस्मिन् कैरातपर्वणि ३० अध्याये २१श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अर्जुनाभिगमनपर्वणि युधिष्ठिरवाक्ये त्रिंशोऽध्यायः ।। ३० ।।

---

(१) (२)कर्तुं (for कृत्वा); यदथ(for यदुक्तं); मिथ्या (for मध्ये); (३) क-पक्तिं, सुखोदयाय,

(२) (१)निकृतो निकर्ते; निकुतो निकृन्तेद्; निकृतौ हि कर्णे; निकृ तानि कर्तुं; (२)वैरं च निर्यातयितुं समर्थः (३)हि,

(३) (२)संनमन्ति; (३)अचिराद् (for अतिरागाद्); (४)दिवीव चेन्द्रम्; देवा दिवीवेन्द्रम् उपं (for अनुं),

(४) (२)वृणोमि (for वृणे); सत्याद्; न धर्मम्; सत्यम् (for धर्मम्); हि (for च),

# महाभारततात्पर्यनिर्णयः २२ अध्यायः

एवमुक्तोऽब्रवीद् भीमं धर्मपुत्रो युधिष्ठिरः ।
त्रयोदशाब्दस्यान्तेऽहं कुर्यामेव त्वदीरितम् ।। १०९ ।।
सत्यमेतन्न सन्देहः सत्येनाऽत्मानमालभे ।
लोकापवादभीरुं मां नातोऽन्यद् वक्तुमर्हसि ।। ११० ।।
तुदसे चातिवाचा मां यद्येवं भीम मां वदेः ।
तदैव मेऽत्ययः कार्यो हन्तव्याश्चैव शत्रवः ।
नैतादृशैरिदानीं तु वाक्यैर्बाधितुमर्हसि ।। १११ ।।

महाभारते- वनपर्वणि ३१ अध्यायः

## ३१. एकत्रिंशोऽध्यायः

भीमेन युधिष्ठिरं प्रति सोपपत्तिकं वनवासापूरणेनैव दुर्योधननिग्रहचोदना ।।

भीमसेनः

सन्धिं कृत्वैव कालेन ह्यन्तकेन पता्र ।
अनन्तेनाप्रमेयेण स्रोतसा सर्वहारिणा ।। १ ।।[१]

लक्षालङ्कारः -सन्धिं कृत्वा इत्यत्र पतत्रिणा पक्षिवत् सर्वत्र भ्रमता, स्त्रोतसा नदीप्रवाहवत् शीघ्रगामिना, प्रत्यक्षं सर्वहारिणा नरतुरगादिसर्वप्राणिनां प्राणहारिणा कालेन कालनामकेन अन्तकेन मृत्युना सन्धिं कृत्वा तद्वशो भूत्वेत्यर्थः ।

प्रत्यक्षं मन्यसे कालं मर्त्यः सन्कालबन्धनः ।

---

(१) (१)मत्वा (for कृत्वा); (ए)क; (इ)व((ए)व); विशालेन (for (ए)व कालेन); वदसि (for कालेन); (२)ह्यन्तकेन (३)हरन्ति नां (for अनन्तेनां),

फेनधर्मा महाराज फलधर्मा तथैव च ॥ २ ॥

**लक्षालङ्कारः** कालं बहुकालं जीवामीति मन्यसे । फेनधर्मा फेनवच्छीघ्रं मरणशीलः, फलवत्कालान्तरे मरणशीलः फलधर्मा कालं मन्यसे इति पूर्वेणान्वयः ।

निमेषादपि कौन्तेय यस्यायुरपचीयते ।
सूच्येवाञ्जनचूर्णस्य किमिति प्रतिपालयेत् ॥ ३ ॥(१)

**लक्षालङ्कारः**- सूच्या अञ्जनचूर्णानि वेति क्षणलवादिषु ईषदीषदायुःक्षयस्योपमा । प्रतिपालयेत् कालं प्रतिपालयेत् ।

यो नूनममितायुः स्यादथवापि प्रमाणवित् ।
स कालं वै प्रतीक्षेत सर्वप्रत्यक्षदर्शिवान् ॥ ४ ॥(२)

प्रतीक्ष्यमाणः कालो नः समा राजंस्त्रयोदश ।
आयुषोऽपचयं कृत्वा मरणायोपनेष्यति ॥ ५ ॥(३)

**लक्षालङ्कारः** कालः मृत्युः ।

शरीरिणां हि मरणं शरीरे नित्यमाश्रितम् ।
प्रागेव मरणात्तस्माद्राज्यायैव घटामहे ॥ ६ ॥(४)

कालो नूनं मनुष्यस्य नित्यं संनिहितोमृतः ।

यो न याति प्रसङ्ख्यानमस्पष्टो भूमिवर्धनः ।

---

(१) (३)शून्येव (for सूच्येव) मूलस्य; पूर्णायाः; चूर्णाय; पूर्णस्य; चूर्णानि पूर्णस्येत्यपपाठः
(२) (२)वा स्यात्; वायुः (for वापि); (३)स च कालं (for स कालं वै),
(३) (१)प्रतीक्षमाणः कालेन (for कालो नः),
(४) (१)आस्थितं (for आश्रितम्); सोऽव (४)यतां (for घटां),

अयातयित्वा वैराणि सोऽवसीदति गौरिव ।। ७ ।।(१)

**लक्षालङ्कारः** यो न याति इत्यत्र प्रकृष्टेषु सङ्ख्यानं प्रसङ्ख्यानम् । अभूतिवर्धन इति पदच्छेदः ।

यो न यातयते वैरमल्पसत्त्वोद्यमः पुमान् ।
अफलं जन्म तस्याहं मन्ये दुर्जातजायिनः ।। ८ ।।(२)

**लक्षालङ्कारः** यो न यातयत इत्यत्र न यातयते स्ववैरिषु न प्रापयति ।

हैरण्यौ भवतो बाहू श्रुतिर्भवति पार्थिवी ।
हत्वा द्विषन्तं सङ्ग्रामे भुङ्क्ष्व बाहुजितं वसु ।। ९ ।।(३)

**लक्षालङ्कारः** हैरण्यो भवत इत्यत्र हैरण्यः हिरण्यसम्बन्धी बहुसुवर्णदातेत्यर्थः । श्रुतिः कीर्तिः भवतीति उभयत्रापि सम्बन्धः ।

हत्वा वै पुरुषो राजन्निकर्तारमरिन्दम ।
अह्नाय नरकं गच्छेत्स्वर्गेणास्य स सम्मितः ।। १० ।।(४)

**लक्षालङ्कारः** हत्वा चेत् इत्यत्र निकर्तारं वैरिणं हत्वा चेत् स्वर्गेण प्राप्तेन वसुसम्मितः वसूनां सम्मितो भवति । नो चेत् अह्नाय शीघ्रं नरकं गच्छेत् ।

अमर्षजो हि सन्तापः पावकाद्दीप्तिमत्तरः ।
येनाहमभिसन्तप्तो न नक्तं न दिवा शये ।। ११ ।।(५)

---

(१) सोऽव (१)यो नायाति; यो न यातो न (for प्र); (२)अस्फुटो; संस्पृष्टो; संस्पष्टो; संस्पृष्टे भूतिं; भूतं (for भूमिं),

(२) (२)अपं (for अल्पं) (३)तस्य जन्म (४) दुर्या-र्जा)त; दुर्जीव (for दूर्जात) यायिनः; जीविनः (for जीविनः),

(३) (२)भवतु ; पार्थिवी (४)भुङ्क्ष्व (for भुक्त्वा); बाहुजितं; बहुमतं; बाह्वार्जितं,

(४) (१)वै (for चेत्); (२)अरिं (for रीन्) नृप (for अरिन्दम); (४)स्वर्गेणापि (अ)समन्वितः समास्मितः; समन्ततः; सुसंमतिः; सुनिर्मितं; सुसंमित; समं स्मृतं,

(५) (१)अमर्षिणो हि; (३)अपि; अस्मि (for अभि); (४)रात्रौ (for नक्तं),

अयं च पार्थो बीभत्सुर्वरिष्ठो ज्याविकर्षणे ।
आस्ते परमसन्तप्तो नूनं सिंह इवाशये ।। १२ ।।(६)

लक्षालङ्कारः-आस्ते परमसन्तप्त इत्यत्र 'नुत्तनुन्नास्तनिष्ठ्यूतविद्धक्षिप्तेरिताः समा' इत्यभिधानात् नुन्नः शरेण विद्धः ।

योऽयमेकोऽभिमनुते सर्वान्लोके धनुर्भृतः ।
सोऽयमात्मजमूष्माणं महाहस्तीव यच्छति ।। १३ ।।(७)

लक्षालङ्कारः -योऽयमेक इत्यत्र सर्वान् धनुर्भृतः अनु प्रति एक एव मीयेत 'माङ्माने' इति धातोः प्रमाणीक्रियेत, प्रमणीकर्तुमलमित्यर्थः । ऊष्माणं उष्णश्वासम् ।

नकुलः सहदेवश्च वृद्धा माता च वीरसूः ।
तवैव प्रियमिच्छन्त आसते जडमूकवत् ।। १४ ।।(८)

सर्वे ते प्रियमिच्छन्ति बान्धवाः सह सृञ्जयैः ।
अहमेकश्च सन्तप्तो माता च प्रतिविन्ध्यतः ।। १५ ।।(९)

लक्षालङ्कारः- इयमेका च इत्यत्र प्रतिविन्ध्यतः प्रतिविन्ध्यस्य माता द्रौपदी ।

प्रियमेव तु सर्वेषां यद्ब्रवीम्युत किञ्चन ।
सर्वे हि व्यसनं प्राप्ताः सर्वे युद्धाभिनन्दिनः ।। १६ ।।

नातः पापीयसी काचिदापद्राजन्भविष्यति ।
यन्नो नीचैरल्पबलै राज्यमाच्छिद्य भुज्यते ।। १७ ।।(१०)

---

(६) (२)विशिष्टो; वर्षिष्टो (for वरिष्ठो); (४)नुन्नः; क्षिप्तः; सन्नः (for नूनं); इवावटे

(७) (१) (ऽ)नु; (for ऽभि) (ऽ)भिमन्येत नुदेत्सर्वान्; जयेद्राजन्(for ऽभिमनुते); (२)राजच्छोके; लोके राजन्; सर्वाच्छोक,

(८) (३)तवैते (for तवैव); बलम् (for प्रियम्); इच्छन्ति (for इच्छन्त),

(९) (२)सृञ्जयैः सह (३)च (ऽ)ति (ऽ)पि(for (ऽ)भि); इयमेका च सन्तप्ता,

(१०) (१)नातः; ततः(for नेतः) राजन् (for काचिद्); (२)काचिदापद्; आपत्काचित्; अवस्था सं

शीलदोषाद्घृणाविष्ट आनृशंस्यात्परन्तप ।
क्लेशांस्तितिक्षसे राजन्नान्यः कश्चित्प्रशंसति ॥ १८ ॥[१]

**लक्षालङ्कारः** शीलदोषान् मार्दवाख्यस्वभावदोषान् । यां तितिक्षाम् ।

श्रोत्रियस्येव ते राजन्मन्दकस्याविपश्चितः
अनुवाकहता बुद्धिर्नैषातत्त्वार्थदर्शिनी (2)
श्रोत्रियस्येव ते राजन्मन्दकस्याविपश्चितः ।
अनुवाकहता बुद्धिर्नैषा तत्त्वार्थदर्शिनी।

घृणी ब्राह्मणरूपोऽसि कथं क्षत्रेऽभ्यजायथाः ।
अस्यां हि योनौ जायन्ते प्रायशः क्रूरबुद्धयः ।[३]

**लक्षालङ्कारः** अस्यां क्षत्रसम्बन्धिन्याम् ।

अश्रौषीस्त्वं राजधर्मान्यथा वै मनुरब्रवीत् ॥ १९ ॥

क्रूरान्निकृतिसम्पन्नान् अभितोनाशमात्मकान्।[४]
धार्तराष्ट्रान् महाराज क्षमसे किं दुरात्मनः ॥ २०॥

**लक्षालङ्कारः** अभितो नाशमात्मकान् इत्यत्र आ समन्ताच्छमात्मका न भवन्तीति नाशमात्तकाः तान् राजधर्मानिति पूर्वेण सम्बन्धः ।

ज्ञाने तपसि शौर्ये वा यस्य न प्रथितं यशः ।

---

(for आपद्राजन्); (३)प्राणै (for बलै); (४)युद्धे नाच्छिद्य भुं,
(१) (१)दोष (for दोषाद्); (४)नाद्य(for नान्यः); प्रशस्यति; प्रशास्ति हि (for प्रशंसति),
(२) (अ) ल्पमेधसः (for (अ)विपश्चितः); सूक्ष्णर्थ दर्शिनी,
(३) (२)क्षत्रेन्वजायथाः; क्षत्रेषु जां (क्षत्रे त्वजां); क्षत्रे तु जां; क्षत्रे नु जां; क्षत्रे ह्यजां; ; क्षत्रे व्यजां; क्षत्रेभ्यजां (for क्षत्रे अजां); जायिथाः (३)यस्यां योनौ हि,
(४) (१)तान् (for त्वं) (२) (ए)व (for वै) (३)विकृति निकृतिः सम्पन्नान् संयुक्तान्) (४) न समात्मकान्; निश्चियात्मकान् (अशमात्मकान्)

विद्यायामथ लाभे वा मातुरुच्चार एव सः ।।

धार्तराष्ट्रान्महाराज क्षमसे किं दुरात्मनः ।

कर्तव्ये पुरुषव्याघ्र किमास्से पीठसर्पवत् ।
बुद्ध्या वीर्येण संयुक्तः श्रुतेनाभिजनेन च ।। २१ ।।[१]

**लक्षालङ्कारः** पीठसर्पवत् पीठाकारसर्पवत् ।

तृणानां मुष्टिनैकेन हिमवन्तं च पर्वतम् ।
छन्नमिच्छसि कौन्तेय योऽस्मान्संवर्तुमिच्छसि ।। २२ ।।[२]

लक्षालङ्कारः छन्नमिच्छसि इत्यत्र छन्नं छन्नं कर्तुम् । मर्तुं मारयितुम् ।

अज्ञातचर्या गूढेन पृथिव्यां विश्रुतेन च ।
दिवीव पार्थ सूर्येण न शक्याचरितुं त्वया ।। २३ ।।

**लक्षालङ्कारः** अज्ञातचर्यागूढेन अज्ञातचर्यया गूढेन ।

बृहच्छाल इवावाप शाखापुष्पपलाशवान् ।
हस्ती श्वेत इवाज्ञातः कथं जिष्णुश्चरिष्यति ।। २४ ।।[३]

**लक्षालङ्कारः** बृहत्साल इवावाप इत्यत्र 'अवाल आलवालः स्यादावापः स्थानकं तथा' इत्यभिधानात् आवापे आलवाले श्वेतः हस्ती ऐरावतः ।

इमौ च सिंहसङ्काशौ भ्रातरौ सहितौ शिशू ।
नकुलः सहदेवश्च कथं पार्थ चरिष्यतः ।। २५ ।।[४]

---

(१) (१)मन्वाह; नत्वैव (कर्तव्ये) तु प्र पुरुषश्रेष्ठ; सति राजेन्द्र (२) समास्ते (से); समानः किमास्से)
(२) (२) नु च; हि (तु) (३) भेत्तुम् (for छन्नम्) (४) संहर्तुम्; संयन्तुम्; संयातुम् संवर्तुम्)
(३) (१)साल (for शाल) (अ)नूपः प्यः) (२)शाखीपुष्प; साक्षी पुष्प; बहुपुष्पफलैश्चितः शाखा पुष्प इवासवान्; फलान्विता
(४) (१)हि च) सिंहविक्रान्तौ) (२)सदृशौ (सहितौ)

पुण्यकीर्ती राजपुत्री द्रौपदी वीरसूरियम्।
विश्रुता कथमज्ञाता कृष्णा पार्थ चरिष्यति ।। २६ ।।

मां चापि राजञ्जानन्ति ह्याकुमारमिमाः प्रजाः ।
नाज्ञातचर्यां पश्यामि मेरोरिव निगूहनम् ।। २७ ।।(१)

तथैव बहवोऽस्माभी राष्ट्रेभ्यो विप्रवासिताः ।
राजानो राजपुत्राश्च धृतराष्ट्रमनुव्रताः ।। २८ ।।(२)

न हि तेऽप्युपशाम्यन्ति निकृता वा निराकृताः ।
अवश्यं तैर्निकर्तव्यमस्माकं तत्प्रियैषिभिः ।। २९ ।।(३)

**लक्षालङ्कारः** नहि तेऽप्युपशाम्यन्ति इत्यत्र निकृतीनां दर्शनेन न निराकृताः । तत्प्रियैषिभिः दुर्योधनप्रियैषिभिः अस्माकं कर्तव्यं अपकर्तव्यम् ।

तेऽप्यस्मासु प्रयुञ्जीरन्प्रच्छन्नान्सुबहूंश्चरान् ।
आचक्षीरंश्च नो ज्ञात्वा ततः स्यात्सुमहद्भयम् ।। ३० ।।(४)

अस्माभिरुषिताः सम्यग्वने मासास्त्रयोदश ।
परिमाणेन तान्पश्य तावतः परिवत्सरान् ।। ३१ ।।(५)

---

(१) (२)ह्याकुमारा; ह्याकुमारम्; आकुमारा; रान् इव (इमाः) (३) ना न) ज्ञात (अज्ञात) शक्यामि; पश्यन्ति (for पश्यामि) (४) विनिग्रहं (निगूहनम्)

(२) (२)राज्याद्वै; राष्ट्राद्या (राष्ट्रेभ्यो) (४) धार्त (धृतं)

(३) (१)ह्युप व्युप (for प्युप) शाम्येरन्; (श) शाम्येव (च्छाम्यन्ति)) (२)निकृता वा; अस्माभिस्तु; निराकारैः ( निकृतानां) (३) मू निवर्तव्यं; तु क; न कं; ण प्र विक (निक ) ततस्तैः प्रतिकर्तव्यं) (४) विप्रियैषिभिः

(४) (१) ये (for ते) पाप्मासु; द्वे चास्मासु; ()भ्यस्यासुः ह्यस्मासु (प्यस्मासु) (२) युगपज् (सुबहूञ्) चरान्(जनान्) (४) तत्र स्यात्; ततः स्यात् सुमहात्ययं

(५) (२)समां; वासा (for मासां) त्रयोदश समा वने (३) परिणामे परिमाणीकृतान्पश्य) (४) तावन्तः (तावतः) त्रयोदश समा इव

अस्ति मासः प्रतिनिधिर्यथा प्राहुर्मनीषिणः ।
पूतिकामिव सोमस्य तथेदं क्रियतामिति ।। ३२ ।।(१)

**लक्षालङ्कारः** पूतीकामिव इत्यत्र पूतिकां पूतिकाख्यलतां अमृतवल्लीमित्यर्थः । सोमस्य सोमलतायाः । 'सोमाभावे पूतीकाग्रहणम्' इति वचनात् सोमलतायाः प्रतिनिधिभूतां पूतिकामिवेत्यर्थः ।

अथवानडुहे राजन्साधवे साधुवाहिने ।
सौहित्यदानादेतस्मादेनसः प्रतिमुच्यते ।। ३३ ।।(२)

**लक्षालङ्कारः** अथवा इत्यत्र साधवेऽपि साधुवाहिन इति सम्बन्धः ।

तस्माच्छत्रुवधे राजन्क्रियतां निश्चयस्त्वया ।
क्षत्रियस्य हि सर्वस्य नान्यो धर्मोऽस्ति संयुगात् ।। ३४ ।।(३)

अस्मिन् कैरातपर्वणि ३१अध्याये ३४ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अर्जुनाभिगमनपर्वणि भीमवाक्ये एकत्रिंशोऽध्यायः ।। ३१ ।।

## महाभारततात्पर्यनिर्णये २२ अध्याये

भीष्मद्रोणादयोऽस्त्रज्ञा निवार्याश्च कथं युधि।
पूज्यास्ते बाहुयुद्धेन न निवार्याः कथञ्चन ।। ११२ ।।
अस्त्राणि जानन्नपि हि न प्रयोजयसि क्वचित् ।

---

(१) (१)मास (मासः) (३) प्रतीकानीव; पूतिक इव; पुत्तिका इव; पूतिकानीव; पूति कामिव; पूतकानिव; पूतिकमिव (४) तदेतं; तथैव ( तथेदं ) इदं ( इति)
(२) (१)वानर्नहो वानडुहो; वानन्वहो (२) साधवो; मधवो; माधवे साधुवाहिनः; वासिनः; वाहितं (३) एतस्माद् ( एकं) (४) एनसा प्रवि विप्र; परि (प्रति)
(३) (१)भूत रिपुं ( शत्रुं) (३) हि ( सभु तु ) (४) धर्मो नान्योस्ति
आरण्य; वन; अरण्य द्वैतवन; द्वैतवननिवास भीमवाक्यं; भीमसेनवाक्यं

तस्माद् तदैव गन्तव्यं विज्ञातास्त्रे धनञ्जये ।। ११३ ।।
इत्युक्तो भीमसेनस्तु स्नेहभङ्गभयात् ततः ।
नोवाच किञ्चिद् वचनं स्वाभिप्रेतमवाप्य च ।। ११४ ।।
अभिप्रायो हि भीमस्य निश्चयेन त्रयोदशे ।
युधिष्ठिरस्य राज्यार्थं गमनार्थे प्रतिश्रवः ।
अन्यथाऽतिमृदुत्वात् स न गच्छेद् भिन्नधीः परैः ।। ११५ ।।
कृतकृत्ये तथा भीमे स्थिते धर्मात्मजो हि सः ।
भीष्मद्रोणादिविजयः कथं स्यादित्यचिन्तयत् ।। ११६ ।।
निवारणं गुरूणां हि भीम इच्छति न क्वचित् ।
तस्मात् ते ह्यर्जुनेनैव निवार्या इत्यचिन्तयत् ।। ११७ ।।
आपद्येव हि भीमस्तान् निवारयति नान्यथा ।
एवं चिन्तासमाविष्टं विज्ञायैव युधिष्ठिरम् ।। ११८ ।।
सर्वज्ञः सर्वशक्तिश्च कृष्णद्वैपायनोऽगमत् ।
नृपतिं बोधयामास चिन्ताव्याकुलमानसम् ।। ११९ ।।
इमं मन्त्रं वदिष्यामि येन जेष्यति फल्गुनः ।
भीष्मद्रोणादिकान् सर्वान् तं त्वं वद धनञ्जये ।। १२० ।।
इत्युक्त्वैवावदन्मन्त्रं सर्वदैवतदृष्टिदम् ।
न स्वयं ह्यवदत् पार्थे फलाधिक्यं यतो भवेत् ।। १२१ ।।
भीष्णद्रोणादिविजय एतावद् वीर्यमेव हि ।
अलं नातोऽधिकं कार्यमेतावद् योग्यमस्य च ।
फल्गुनस्येति भगवान् न स्वयं ह्यवदन्मनुम् ।। १२२ ।।
गते व्यासे भगवति सर्वज्ञे सर्वकर्तरि ।
धर्मराजोऽवदन्मन्त्रं फल्गुनाय रहस्यमुम् ।। १२३ ।।

# ३२. द्वात्रिंशोऽध्यायः

भीमयुधिष्ठिरसंवादसमयसंनिहितेन व्यासेन युधिष्ठिराय प्रतिस्मृतिविद्योपदेशः ।।१।।
युधिष्ठिरेण व्यासवचनात्परिजनैः सह द्वैतवनात् काम्यकवनगमनम् ।। २ ।।

– –

भीमसेनवचः श्रुत्वा कुन्तीपुत्रो युधिष्ठिरः ।
निःश्वस्य पुरुषव्याघ्रः सम्प्रदध्यौ परन्तपः ।। १ ।।

श्रुता मे राजधर्माश्च वर्णानां च विनिश्चयाः ।
आयत्यां च तदात्वे च यः पश्यति स पश्यति ।। २ ।।

**लक्षालङ्कारः** आयत्यां च तदात्वे च इत्यत्र आयत्याम् आये अतिरतिक्रमः तत्सम्बन्धी अत्ययः आयतिः । तस्याः आयतेः आत्ये अत्यये नाश इत्यर्थः । तं राजधर्मं यः पश्यति स एव पश्यति ।

धर्मस्य जानमानोऽहं गतिमग्र्यां सुदुर्विदाम् ।
कथं बलात्करिष्यामि मेरोरिव विमर्दनम् ।। ३ ।।(१)

स मुहूर्तमिव ध्यात्वा विनिश्चित्येतिकृत्यताम् ।
भीमसेनमिदं वाक्यमपदान्तरमब्रवीत् ।। ४ ।।(२)

लक्षालङ्कारः- आजदान्तरमब्रवीत् इत्यत्र अपदान्तरं प्रत्युत्तररहितम् ।

---

(१) वर्णं(for राजं) राज्ञां चैव(for वर्णानां च); त्वां(for सु)निश्चयाः(for पृथत्त्वथक्) शायमानेन; शायमानोहं(for जानमानोदं); र्मिदां(for र्विदाम्); बाल्यात्; बन्धात् (for बलात्); विवर्तनं(for विमर्दनम्),
(२) (१) सु(for स),

÷९ ÷

एवमेतन्महाबाहो यथा वदसि भारत ।
इदमन्यत्समादत्स्व वाच्यं मे वाक्यकोविद् ।। ५ ।।(१)

महापापानि कर्माणि यानि केवलसाहसात् ।
आरभ्यन्ते भीमसेन व्यथन्ते तानि भारत ।। ६ ।।(२)

**सुमन्त्रिते सुविक्रान्ते सुकृते सुविचारिते ।**

सिध्यन्त्यर्था महाबाहो दैवं चात्र प्रदक्षिणम् ।। ७ ।।

यत्तु केवलचापल्याद्बलदर्पोत्थितः स्वयम् ।
आरब्धव्यमिदं कार्यं मन्यसे शृणु तत्र मे ।। ८ ।।(३)

भूरिश्रवाः शलश्चैव जलसन्धश्च वीर्यवान् ।
भीष्मो द्रोणश्च कर्णश्च द्रोणपुत्रश्च वीर्यवान् ।। ९ ।।(४)

धार्तराष्ट्रा दुराधर्षा दुर्योधनपुरोगमाः ।
सर्व एव कृतास्त्राश्च सततं चाततायिनः ।। १० ।।

राजानः पार्थिवाश्चैव येऽस्माभिरुपतापिताः ।
संश्रिताः कौरवं पक्षं जातस्नेहाश्च तं प्रति ।। ११ ।।(५)

दुर्योधनहिते युक्ता न तथास्मासु भारत ।

---

(१) युधिष्ठिर उं; (३) एतत् (for अन्यत्); त्वम् (for सम्); दन्त्स्व (for धत्स्व),
(२) (१)महोपायानि; महामात्राणि; पथानि; पायानि कार्याणि,
(३) (१)यत्तु; यत्र से तत्तु(for त्वं तु); कार्पण्यात्(for चापल्यात्); (२)दर्पोत्थितः; (३)कार्यं(for कर्म),
(४) (३)द्रोणः कर्णः; (४)तथैव च; प्रताप वान्(for च वीर्यं),
(५) (१)राजानो राजपुत्राश्च; (२)ये चास्मद्(for येस्माभिद्); (३)संस्थिताः; साश्रिताः ते श्रिता;सम्प्रति; (४)सम्प्रति; तं प्रति; तान्प्रति(for साम्प्रतम्),

पूर्णकोशा बलोपेताः प्रयतिष्यन्ति सङ्गरे ।। १२ ।।[(१)]

सर्वे कौरवसैन्यस्य सपुत्रामात्यसैनिकाः ।
संविभक्ता हि मात्राभिर्भोगैरपि च सर्वशः ।। १३ ।।[(२)]

दुर्योधनेन ते वीरा मानिताश्च विशेषतः ।
प्राणांस्त्यक्ष्यन्ति सङ्ग्रामे इति मे निश्चिता मतिः ।। १४ ।।

समा यद्यपि भीष्मस्य वृत्तिरस्मासु तेषु च ।
द्रोणस्य च महाबाहो कृपस्य च महात्मनः ।। १५ ।।

अवश्यं राजपिण्डस्तैर्निर्वेश्य इति मे मतिः ।
तस्मात्त्यक्ष्यन्ति सङ्ग्रामे प्राणानपि सुदुस्त्यजान् ।। १६ ।।[(३)]

लक्षालङ्कारः- अवश्यं राजपिण्ड इत्यत्र राज्ञा दत्तवेतनरूपान्नपिण्डः निवेश्यः प्रत्युपकारेण निवेदनीयः ।

सर्वे दिव्यास्त्रविद्वांसः सर्वे धर्मपरायणाः ।
अजेयाश्चेति मे बुद्धिरपि देवैः सवासवैः ।। १७ ।।[(४)]

अमर्षी नित्यसंरब्धस्तत्र कर्णो महारथः ।
सर्वास्त्रविदनाधृष्यो ह्यभेद्यकवचावृतः ।। १८ ।।[(५)]

---

(१) (४)सङ्गरे (for रक्षणे),
(२) (१)सर्व(for सर्वे); (३)संविभक्ताति; नि; भि मात्रा हि; महता(for मात्राभिर्); (४)भागैर्(for भोगैर्); नित्यशः(for सर्वं),
(३) (१)भर्तृं(for राजं); अवश्यं राज्यकामैस्ते; (२) निवेश्य इति; निर्वेश्यामीति; (४)च(for सु); ब्राह्मणा अपि जीवितं,
(४) (१)सर्वाश्च; विदुषः दिव्यास्त्रविदुषः (४) इति सर्वैः; अपि सर्वैः; सर्वैरपि सुरासुरैः (for सवासवैः),
(५) (१)प्रति; तत्र(for नित्य-); संरब्धः; संरम्भी; (४)ह्यभेद्यं; त्वभेद्यं(for अभेद्यं),

अनिर्जित्य रणे सर्वानेतान्पुरुषसत्तमान् ।
अशक्यो ह्यसहायेन हन्तुं दुर्योधनस्त्वया ।। १९ ।।

न निद्रामधिगच्छामि चिन्तयानो वृकोदर ।
अतिसर्वान्धनुर्ग्राहान्सूतपुत्रस्य लाघवम् ।। २० ।।

लक्षालङ्कारः- अति सर्वान् इत्यत्र अति अत्येति ।

– –

एतद्वचनमाज्ञाय भीमसेनोऽत्यमर्षणः ।
बभूव विमनास्त्रस्तो न चैवोवाच किञ्चन ।। २१ ।।(१)

तयोः संवदतोरेवं तदा पाण्डवयोर्द्वयोः ।
आजगाम महायोगी व्यासः सत्यवतीसुतः ।। २२ ।।(२)

सोऽभिगम्य यथान्यायं पाण्डवैः प्रतिपूजितः ।
युधिष्ठिरमिदं वाक्यमुवाच वदतां वरः ।। २३ ।।(३)

**व्यासः**

युधिष्ठिर महाबाहो वेद्मि ते हृदयस्थितम् ।
मनीषया ततः क्षिप्रमागतोऽस्मि नरर्षभ ।। २४ ।।(४)

लक्षालङ्कारः- मानसम् मनसि विद्यामानम् ।

भीष्माद्द्रोणात्कृपात्कर्णाद्द्रोणपुत्राच्च भारत ।

---

(१) वैशं उं(for वशं); (३)तस्थौ; स्वस्थो(for त्रस्तो); बभूव शान्तिसंयुक्तो (४)न वै प्रों(for न चैवों) गुरोर्वचनवारितः

(२) (१)ततः(for तयोः); एव(for एवं); (२)तथा(for तदा); राजन्ययोदर्(for पाण्डवयोर्),

(३) (२)अभिं (for प्रतिं),

(४) व्यास उं (व्यासः); (२)हृदि संस्थितं; हृदयस्थितं(for हृदि मानसं); (४)भरतर्षभ(for ऽस्मि नरं),

यत्ते भयममित्रघ्न हृदि सम्परिवर्तते।[1]

दुर्योधनान्नृपसुतात्तथा दुःशासनादपि ॥ २५ ॥[२]

यत्ते भयममित्रघ्न हृदि सम्परिवर्तते ।

तत्तेऽहं नाशयिष्यामि विधिदृष्टेन कर्मणा ।

तच्छ्रुत्वा धृतिमास्थाय कर्मणा प्रतिपादय ॥ २६ ॥[३]

प्रतिपाद्य तु राजेन्द्र ततः क्षिप्रं ज्वरं जहि।[4]

– –

तत एकान्तमुन्नीय पाराशर्यो युधिष्ठिरम् ।

अब्रवीदुपपन्नार्थमिदं वाक्यविशारदः ॥ २७ ॥[५]

**व्यासः**

श्रेयसस्ते परः कालः प्राप्तो भरतसत्तम ।

येनाभिभविता शत्रून्रणे पार्थो धनुर्धरः ॥ २८ ॥[६]

गृहाणेमां मया प्रोक्तां सिद्धिं मूर्तिमतीमिव ।

विद्यां प्रतिस्मृतिं नाम प्रपन्नाय ब्रवीमि ते ॥ २९ ॥

यामवाप्य महाबाहुरर्जुनः साधयिष्यति ॥ ३० ॥[७]

अस्त्रहेतोर्महेन्द्रं च रुद्रं चैवाभिगच्छतु

---

(१) (१)तथा(for कृपात्); (२)तथैव च(for च भारत),

(२) (३/४)सम्प्रति सम्परि) यत्ते हृदि तु शत्रुघ्न भयं सं

(३) (१)प्रशमं(for ऽहं नाशं); (२)कर्मणा(for हेतुना),

(४) (प्रतिपाद्य; अभिपद्यल रिपुं (for ज्वरं),

(५) (१)आनीय; उत्तीर्य; आनाय्य(for उन्नीय),

(६) व्यास उं; (४) धनुर्धरः; युधिष्ठिरः(for धनं),

(७) (२)मयीम्(for मतीम्),

वरुणं च कुबेरं च धर्मराजं च पाण्डव ।
शक्तो ह्येष सुरान्द्रष्टुं तपसा विक्रमेण च ।। ३१ ।।[१]

ऋषिरेष महातेजा नारायणसहायवान् ।
पुराणः शाश्वतो देवस्त्वजेयो जिष्णुरच्युतः ।। ३२ ।।[२]

अस्त्राणीन्द्राच्च रुद्राच्च लोकपालेभ्य एव च ।
समादाय महाबाहुर्महत्कर्म करिष्यति ।। ३३ ।।[३]

वनादस्माच्च कौन्तेय वनमन्यद्विचिन्त्यताम् ।
निवासार्थाय यद्युक्तं भवेद्वः पृथिवीपते ।। ३४ ।।[४]

एकत्र चिरवासो हि न प्रीतिजननो भवेत् । ।। ३५ ।।

तापसानां च सर्वेषां भवेदुद्वेगकारकः ।[५]
मृगाणामुपयोगश्च वीरुदोषधिसङ्क्षयः ।
बिभर्षि च बहून्विप्रान्वेदवेदाङ्गपारगान् ।। ३६ ।।[६]

– –

एवमुक्त्वा प्रपन्नाय शुचये भगवान्प्रभुः ।
प्रोवाच लोकतत्त्वज्ञो योगी विद्यामनुत्तमाम् ।। ३७ ।।[७]

---

(१) (३)कुवीरं; कुबेरं(for धनेशं); इन्द्रं चैव वरुणं च; (४)पाण्डवः(for पाण्डव),
(२) (४)त्वा (अ) ज्ञेयो निष्णुरच्युतः; अजेयो (हि जयो) वि(जि)ष्णुरच्युतः; विष्णुरीशः सनां,
(३) (१)देवां(for रुद्रां); अस्त्राणि रुद्रादिद्राच्च; (३)आदाय स(for समादाय),
(४) (३)नि (वि) वासाथं तु (प्रवा सार्थाय); (४)वेत्थ त्वं; भवेयुः; भवेद्यः(for भवेद्वः),
(५) नो भवेत्; (३)हि; तु(for च) सर्वेषां(for शान्तानां),
(६) (१)उपसम्भोगः; भोगश्च रोधश्व; (२) वीरूदौं, वीरूधौं; (३)बिभर्षि च त्वं बिभर्षि (४)वेदाध्ययनतत्परान्,
(७) (२)विभुः; शुचिः(for प्रभुः); (३)योगतः कृष्णो; लोकतत्वज्ञो; योगशास्त्रज्ञो; (४)योगी(for योग),

धर्मराजाय धीमान्स व्यासः सत्यवतीसुतः ।
अनुज्ञाय च कौन्तेयं तत्रैवान्तरधीयत ।। ३८ ।।[१]

युधिष्ठिरस्तु धर्मात्मा तद्ब्रह्म मनसा यतः ।
धारयामास मेधावी काले काले सदाभ्यसन् ।। ३९ ।।[२]

स व्यासवाक्यमुदितो वनाद्द्वैतवनात्ततः ।
ययौ सरस्वतीकूले काम्यकं नाम काननम् ।। ४० ।।[३]

तमन्वयुर्महाराज शिक्षाक्षरविशारदाः ।
ब्राह्मणास्तपसा युक्ता देवेन्द्रमृषयो यथा ।। ४१ ।।[४]

ततः काम्यकमासाद्य पुनस्ते भरतर्षभ ।
न्यविशन्त महात्मानः सामात्याः सपरिच्छदाः ।। ४२ ।।[५]

सम्प्राप्य तद्वनं रम्यमृर्षयो देवपतिं यथा ।

तत्र ते न्यवसन् राजन्किञ्चित्कालं मनस्विनः ।
धनुर्वेदपरा वीराः शृण्वन्तो वेदमुत्तमम् ।। ४३ ।।[६]

चरन्तो मृगयां नित्यं शुद्धैर्बाणैर्मृगार्थिनः ।

---

(१) (१)राजं; राजे(for राज्ञे); तथा; ततो(for तदा); धर्मराजाय धीमान्स; (३)अनुज्ञाप्य स(for च),

(२) (१/२)तद्ब्रह्म धर्मात्मा; (४)सदाभ्यं; तदाभ्यं

(३) (१)व्यासवाक्यप्रमुदितो; (२)वनं(for वनाद्); (३)कूले; कूलं(for तीरे); (४)काननं महत्(for नाम काननम्),

(४) (१)राजं(for राज); (२)विशारदाः,

(५) (१)ततः काम्यं समासाद्य,(२)यत्तास्ते; वनं ते(for पुनस्ते); भरतर्षभ; (३)अवसन्त; न्यवसन्त; निवसन्तो; प्रविशन्त (for न्य विशन्त); (४)सपरिच्छदाः; सपुरोहिताः

(६) (२)किञ्चित्(for कं); (३) क-ख-शृण्वन्तो, धीनाः; धीराः; शूराः(for वीराः); (४)शृण्वन्तो वेदनिः(नि) स्वनं,

पितृदैवतविप्रेभ्यो निर्वपन्तो यथाविधि ।। ४४ ।।

अस्मिन् कैरातपर्वणि ३२अध्याये ४४श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अर्जुनाभिगमनपर्वणि काम्यकवनगमने द्वात्रिंशोऽध्यायः ।। ३२ ।।

## महाभारततात्पर्यनिर्णये-२२ अध्याये

तमाप्य फल्गुनो मन्त्रं ययौ ज्येष्ठौ प्रणम्य च ।
यमजौ च समाश्लिष्य गिरिमेवेन्द्रकीलकम् ।
तपश्चकार तत्रस्थः शङ्करस्थं हरिं स्मरन् ।। १२४ ।।

महाभारते- वनपर्वणि ३३ अध्यायः

# ३३. त्रयस्त्रिंशोऽध्यायः

**युधिष्ठिरेण व्यासोपदिष्टमन्त्रोपदेशपूर्वकमस्त्रग्रहणाय स्वर्गं प्रत्यर्जुनस्य प्रस्थापनम् ।। १ ।। स्वर्गं प्रस्थितेनार्जुनेन मध्येपथमिन्द्रकीलगिरौ तपश्चर्या ।। २ ।। तत्र मुनिरूपिणो इन्द्रस्य दर्शनम् ।। ३ ।। दिव्यास्त्रदानं याचितेनेन्द्रेणार्जुनं प्रति तपसा महेश्वरप्रसाद-नानन्तरमस्त्रलाभाय स्वर्गगमनचोदना ।। ४ ।।**

– –

कस्यचित्त्वथ कालस्य धर्मराजो युधिष्ठिरः ।
संस्मृत्य मुनिसन्देशमिदं वचनमब्रवीत् ।। १ ।।

विविक्ते विदितप्रज्ञमर्जुनं पुरुषर्षभ ।
सान्त्वपूर्वं स्मितं कृत्वा पाणिना परिसंस्पृशन् ।। २ ।।(१)

स मुहूर्तमिव ध्यात्वा वनवासमरिन्दमः ।

(१) (१)विधिना; विविक्तं विदित प्राज्ञम्; विदिताप्रज्ञम्; विततं; बितथं (२)पुरुषर्षभ भः; (भं) भरतर्षभ,

धनञ्जयं धर्मराजो रहसीदमुवाच ह ।। ३ ।।[(१)]

÷९ ÷

भीष्मे द्रोणे कृपे कर्णे द्रोणपुत्रे च भारत ।
धनुर्वेदश्चतुष्पाद एतेष्वद्य प्रतिष्ठितः ।। ४ ।।[(२)]

दैवं ब्राह्मं मानुषं च सयत्नं सचिकित्सितम् ।
सर्वास्त्राणां प्रयोगं च तेऽभि(अभि)जानन्ति कृत्स्नशः ।। ५ ।।[(३)]

ते सर्वे धृतराष्ट्रस्य पुत्रेण परिसान्त्विताः ।
संविभक्ताश्च तुष्टाश्च गुरुवच्चैषु वर्तते ।। ६ ।।[(४)]

लक्षालङ्कारः- गुरुवच्चैषु वर्तत इत्यत्र वर्तते दुर्योधनः ।

ऐकात्म्यं च गताः सर्वे धार्तराष्ट्रेण भारत

सर्वयोधेषु चैवास्य सदा प्रीतिरनुत्तमा ।
शक्तिं न हापयिष्यन्ति ते काले प्रतिपूजिताः ।। ७ ।।[(५)]

आचार्या मानितास्तुष्टाः शान्तिं व्यवहरन्त्युत ।

अद्य चेयं मही कृत्स्ना दुर्योधनवशानुगा ।
त्वयि व्यपाश्रयोऽस्माकं त्वयि भारः समाहितः ।। ८ ।।

लक्षालङ्कारः- त्वयि व्यपाश्रय इत्यत्र व्यपगतः इतोऽन्यः आश्रयो यस्य स तथोक्तः।

---

(१) (१)ख-अयं पादोऽनन्तरश्च न स्तः ।

(२) (१)पक्षे कर्णे; च कर्णे च(for कृपे कर्णे); (२)विशे षतः(for च भारत),

(३) (१)दैवं ब्राह्मं मानुषं (ष्यं); चासुरं(for आसुरं); ब्राह्मं दैवासुरं चैव; (२)सयत्नं सचि कित्सितं; वायव्यं सचिं; स(र)हस्यं चिं; मन्त्रंसक (समन्त्रक)चिं स(सं)प्रयोगं चिं; (३)तम् (ते) (च); (४)अभिजां; ते वै जां; ते विजां; विजानन्ति हि(for तेऽभिं),

(४) (४)भृत्यं(for गुरुं); चैषु(for तेषु); गुरुष्वेषु प्रवर्तते,

(५) (२)समा(for सदा); प्रीतिर्; धृतिर्(for वृत्तिर्),

अत्र कृत्यं प्रपश्यामि प्राप्तकालमरिन्दम ।

सग्रामनगरा पार्थ ससागरवनाकरा । (1)

कृष्णद्वैपायनात्तात गृहीतोपनिषन्मया । ॥ ९ ॥

तया प्रयुक्तया सम्यग्जगत्सर्वं प्रकाशते।(२)

तेन त्वं ब्रह्मणा तात संयुक्तः सुसमाहितः ॥ १० ॥ (३)

देवतानां यथाकालं प्रसादं प्रतिपालय।(४)

तपसा योजयात्मानमुग्रेण भरतर्षभ ॥ ११ ॥

धनुष्मान्कवची खड्गी मुनिः साधुव्रते स्थितः ।

न कस्यचिद्ददन्मार्गं गच्छ तातोत्तरां दिशम् ॥ १२ ॥(५)

इन्द्रे ह्यस्त्राणि दिव्यानि समस्तानि धनञ्जय।

वृत्राद्भीतैर्बलं देवैस्तदा शक्रे समर्पितम् ॥ १३ ॥(६)

तान्येकस्थानि सर्वाणि ततस्त्वं प्रतिपत्स्यसे।(७)

अनेन ब्रह्मणा तात सर्वं सम्प्रतिपद्यते ॥ १४ ॥ (८)

शक्रमेव प्रपद्यस्व स तेऽस्त्राणि प्रदास्यति ।

---

(१) (३)त्वं हि(for त्वयि);त्वपां तूपां(for व्यपां ); अयि त्वमाश्रयोस्माकं; भवा नेव प्रियोस्माकं; (४)समाश्रितः समर्पितः;(for समाहितः); (५)अत्र; तत्ते(for तत्र); प्रवक्ष्यामि,

(२) (३)तया गृहीतया सं; गृहीतया तया सं,

(३) (१)भ्रातः(for तात); (२)सम्प्रयुक्तः;सुसंयुक्तः(for संयुक्तः सु),

(४) (४)प्रतिपालयन्; परिपालयन्; परिपालय,

(५) (४)साधु (मौन);(for सार); व्रते स्थितः; समाहितः(for समन्वितः); (६)गच्छ तात,

(६) (३/४) ख-घ-बलमिन्द्रे समार्पितम् ।, भीतैः देवैः तथा; पुरा(for तदा); तदा बलं शक्रे(for इन्द्रे),

(७) (३)एवास्त्राणि(for एकस्थानि); दिव्यानि(for सर्वाणि),

(८) (स सर्वं प्रतिपत्स्यसे;)

दीक्षितोऽद्यैव गच्छ त्वं द्रष्टुं देवं पुरन्दरम् ॥ १५ ॥[१]

– –

एवमुक्त्वा धर्मराजस्तमध्यापयत प्रभुः ।
दीक्षितं विधिनानेन धृतवाक्कायमानसम् ॥ १६ ॥

अनुजज्ञे तदा वीरं भ्राता भ्रातरमग्रजः ।[२]
निदेशाद्धर्मराजस्य द्रष्टुकामः पुरन्दरम् । ॥ १७ ॥[३]

धनुर्गाण्डीवमादाय तथाक्षय्ये महेषुधी।[४]
कवची सतलत्राणो बद्धगोधाङ्गुलित्रवान् । ॥ १८ ॥

हुत्वाग्निं ब्राह्मणान्निष्कैः स्वस्ति वाच्य महाभुजः ।[५]
प्रातिष्ठत महाबाहुः प्रगृहीतशरासनः ।
वधाय धार्तराष्ट्राणां निःश्वस्योर्ध्वमुदीक्ष्य च ॥ १९ ॥[६]

तं दृष्ट्वा तत्र कौन्तेयं प्रगृहीतशरासनम्
अब्रुवन्ब्राह्मणाः सिद्धा भूतान्यन्तर्हितानि च ॥ २० ॥

क्षिप्रमाप्नुहि कौन्तेय मनसा यद्यदिच्छसि ।[7]
अब्रुवन्ब्राह्मणाः पार्थमिति कृत्वा जयाशिषः
इति कृत्वा जयाशीस्ते ब्राह्मणा वाक्यमब्रुवन् ।

---

(१) (१)शक्रमेवाभिवीक्षस्व,
(२) (१)तु धर्मज्ञम्(for धर्मराजस्); (२)तद्(for तम्); उपाध्यापयत्; अध्यापयति प्रभुम्; (३) (अ)नेन(for तेन); (४)धृतं(for यतं); (५)तदा(for ततो); धीर(for वीरं),
(३) (१)द्रष्टृकामः; देवं द्रष्टुं,
(४) (१) गाञ्जीवम्; (२)अक्षय्ये,
(५) (१)तनुं(for तलं); (२)खड्गी; खङ्ग(for बद्ध); (३)हुत्वाग्नीन्; हुताग्निर्,
(६) (४) (ए)वम्(for (ऊ)र्ध्वम्); अवेक्ष्य च; उदैक्षत; निरीक्ष्य च(for उदीक्ष्य च),
(७) (३)क्षिप्रमाप्नुहि; ध्रुवोस्तु विजयस्तव; यद्यदिच्छसि भारत,

संसाधयस्व कौन्तेय भुवोस्तु विजयस्तव

सिद्धचारणसङ्घाश्च गन्धर्वाश्च तमब्रुवन् ।। २१ ।।

**सिद्धचारणादयः**

स्वस्ति व्रतं समाधत्स्व सङ्कल्पस्तव सिद्ध्यताम् ।

मनोरथाश्च ते सर्वे समृद्ध्यन्तां महारथ ।। २२ ।।

**वैशम्पायनः**

एवमुक्तोऽभिवाद्यैतान्बद्धाञ्जलिपुटस्तथा।

तपोयोगमनाः पार्थः पुरोहितमवन्दत ।

ततः प्रीतमना जिष्णुस्तावुभावभ्यवन्दत ।। २३।।

सहोदरावतिरथौ युधिष्ठिरवृकोदरौ ।

सङ्क्रान्तमनसौ तूर्णमभिगम्य महारथौ ।। २४ ।।

यमौ गाण्डीवधन्वानमभ्यवादयतामुभौ ।

अभिवाद्य तु तौ वीरावूचतुः पाकशासनिम् ।। २५ ।।

**यमौ**

अवाप्तव्यानि सर्वाणि दिव्यान्यस्त्राणि वासवात् ।

अस्त्राण्याप्नुहि कौन्तेय मनसा यद्यदिच्छसि ।। २६ ।।

गिरो ह्यशिथिलास्सर्वा निर्दोषास्सम्मतास्सताम् ।

त्वमेकः पाण्डवेष्वद्य सम्प्राप्तोऽसि धनञ्जय ।। २७ ।।[१]

न चाधर्मविदं देवा नासिद्धं नातपस्विनम् ।

---

(१) (१) ख-धीरो ग्यशिथिलः सम्यङ्निर्दोषः संमतः सताम् ।,

द्रष्टुमिच्छन्ति कौन्तेय चलचित्तं शठं न च ।। २८ ।।

रोरूयमाणः कटुकमीर्ष्यकः कटुकाक्षरः ।
शठकश्लाघकः क्षेप्ता हन्ता च विचिकित्सिता ।। २९।।

विश्वस्तहन्ता मायावी क्रोधनोऽनृतभाषितः ।
अत्याशी नास्तिकोऽदाता मित्रध्रुक्सर्वकर्कशः ।। ३० ।।

आक्रोष्टा चातिमानी च रौद्रौ लुब्धोऽथ लोलुपः ।
स्तेनश्च मद्यपश्चैव भ्रूणहा गुरुतल्पगः ।। ३१ ।।

सम्भावितात्मा चात्यर्थं नृशंसः पुरुषश्च यः ।
नैते लोकानाप्नुवन्ति निर्लोकास्ते धनञ्जय ।। ३२ ।।

आनृशंस्यमनुक्रोशस्सत्यं करुणवेदिता ।
दमस्स्थितिर्धृतिर्धर्मः क्षमा रूपमनुत्तमम् ।।३३ ।।

दया शमश्च धर्मश्च गुरुपूजा कृतज्ञता ।
मैत्रता द्विजभक्तिश्च वसन्ति त्वयि फल्गुन ।। ३४ ।।

व्यपेक्षा सर्वभूतेषु कृपा दानं मतिस्स्मृतिः ।
तस्मात्कौरव्य शक्रेण समेष्यसि धनञ्जय । ।। ३५ ।।

लक्षालङ्कारः- व्यपेक्षा सर्वभूतेषु इत्यत्र विशेषेण अन्येषामुपकारापेक्षाव्यपेक्षा, अन्येभ्यः विगता तद्धनाद्यपेक्षाऽपि व्यपेक्षा सैव कृपा दानं चेति स्मृतिरस्तीत्यर्थः ।

त्वादृशेन हि देवानां श्लाघनीयस्समागमः ।। ३६ ।।

सुहृदां सोदराणां च सर्वेषां भरतर्षभ ।
त्वं गतिः परमा तात वृत्रहा मरुतामिव ।। ३७ ।।

तस्मिंस्त्रयोदशे वर्षे भ्रातरस्सुहृदश्च ते ।
सर्वे हि संश्रयिष्यन्ति बाहुवीर्यं महाबल ।। ३८ ।।

स पार्थ पितरं गच्छ सहस्राक्षमरिन्दमम् ।
मुष्टिग्रहणमादत्स्व सर्वाण्यस्त्राणि वासवात् ।। ३९ ।।

**लक्षालङ्कारः- मुष्टिग्रहणमादत्स्व इत्यत्र मुष्टौ ग्रहणं यस्य तन्मुष्टिग्रहणं हस्तगतमित्यर्थः ।**

शतशृङ्गे महाबाहो मघवानिदमब्रवीत् ।
शृण्वतां सर्वभूतानां त्वामुपाघ्राय मूर्धनि ।। ४० ।।

विदितस्सर्वभूतानां दिवं तात गमिष्यसि ।
प्राप्य पुण्यकृतां लोकान्रंस्यसे जयतां वर ।। ४१ ।।

मानितस्त्रिदशैः पार्थ विहृत्य सुसुखं दिवि ।
अवाप्य परमास्त्राणि पृथिवीं पुनरेष्यसि ।। ४२ ।।

गुणांस्ते वासवस्तात खाण्डवं दहति त्वयि ।
शृण्वतां सर्वभूतानां पुनः पुनरभाषत ।। ४३ ।।(१)

तां प्रतिज्ञां नरश्रेष्ठ कर्तुमर्हसि वासवीम् ।
कञ्चिद्देशमितः प्राप्य तपोयोगमना भव ।। ४४ ।।

कर्तुमर्हसि कौरव्य मघवद्वचनं हितम् ।
दीक्षितोऽद्यैव गच्छ त्वं द्रष्टासि त्वं पुरन्दरम् ।। ४५ ।।

– –

तौ परिष्वज्य बीभत्सुः कृष्णामामन्त्र्य चाभि भो।

---

(१) (२)ख- घ-घख-खाण्डवे दह्यति त्वया,

अभ्यवादयत प्रीतस्तपस्विप्रवरानपि ।

मनांस्यादाय सर्वेषां प्रयातः पुरुषर्षभः ॥ ४६ ॥

तं सिंहमिव गच्छन्तं सिंहस्कन्धोरसं तदा।

प्राञ्जलिः पाण्डवं कृष्णा देवानां कुर्वती नमः ॥ ४७ ॥

वाग्भिः परमशक्ताभिर्मङ्गलाभिरभाषत ॥ ४८ ॥

अब्रुवन्ब्राह्मणाः पार्थमिति कृत्वा जयाशिषः ।

संसाधयस्व कौन्तेय ध्रुवोऽस्तु विजयस्तव ।

तं तथा प्रस्थितं वीरं शालस्कन्धोरुमर्जुनम् ।

मनांस्यादाय सर्वेषां कृष्णा वचनमब्रवीत् ॥ ४६ ॥(१)

ब्रञ्जलिः पाण्डवं कृष्णा देवानां कुर्वती नमः ॥ ४७ ॥(२)

कृष्णा

यत्ते कुन्ती महाबाहो जातस्यैच्छद्धनञ्जय ।

तत्तेऽस्तु सर्वं कौन्तेय यथा च स्वयमिच्छसि।। ।।(3)

वसुदेवस्वसा देवी त्वामार्या पुनरागतम्।

सा पश्यतु पृथा पार्थ सहस्राक्षमिवादितिः ।।

मास्माकं क्षत्रियकुले जन्म कश्चिदवाप्नुयात् ।

ब्राह्मणेभ्यो नमो नित्यं येषां भैक्ष्येण जीविका।। ।।(4)

इदं मे परमं दुःखं यः स पापः सुयोधनः

---

(१) (१)तं तथा (तदा) प्रस्थितं वीरं; (२)सिंहस्कन्धोरसं तदा; (४)प्रयातः पुरुषर्षभः

(२) क-ख-शुक्लाभिर् ; घ-शक्याभिर्,

(३) (१)यद्यत्; यत्तत्(for यत्ते),

(४) (१)मा स्माहं; मा चाहं; (२)पुनर्जन्ममवा(समा) प्रुयात्; (३) (ऽ)पि वा नित्यं (४)भैक्ष्येण(for युद्धे न),

दृष्ट्वा मां गौरिति प्राह प्रहसन्राजसंसदि ।
तस्माद्दुःखादिदं दुःखं गरीय इति मे मतिः ।
यत्तत्परिषदो मध्ये बह्वयुक्तमभाषत।(1)
नूनं ते भ्रातरः सर्वे त्वत्कथाभिः प्रजागरे ।
रंस्यन्ते वीर कर्माणि कथयन्तः पुनः पुनः ।(2)
नैव नः पार्थ भोगेषु न धने नोत जीविते ।
तुष्टिबुद्धिर्भवित्री वा त्वयि दीर्घप्रवासिनि।(3)
आशा सञ्जायते वीर त्वय्यरण्यं प्रपद्यति।
त्वयि नः पार्थ सर्वेषां सुखदुःखे समाहिते
जीवितं मरणं चैव राज्यमैश्वर्यमेव च ।
आपृष्टो मेऽसि कौन्तेय स्वस्ति प्राप्नुहि भारत।(4)
बलवद्भिर्विरुद्धं न कार्यमेतत्त्वयानघ ।
प्रयाह्यविघ्नेनैवाशु विजयाय महाबल।(5)

## द्रौपदी

**नमो धात्रे विधात्रे च स्वस्ति गच्छ ह्यनामयम् ।।४८ ।।**

स्वस्ति तेऽस्त्वान्तरिक्षेभ्यः पार्थिवेभ्यश्च भारत ।

---

(१) (मे परमं; च प मं(for च मे परं); यद्वा पार्थ; यः स पापः; यत्तदा वै(for यत्त्वां पार्थ); जनं; कुरुं(for राजं); यत्त त्परिषदो मध्ये; यस्मादस्मान्प्रहस्यैष; यस्मादन्यत्प्रहस्यैव(for )
(२) (४)कथं(for कीर्तं),
(३) (२)नोत्र; नोप(for नोत); (३)भूतिद्; पुष्टिर्(for बुद्धिर्),
(४) (५) (ऽ)सि हि(for मेऽसि); (६)कौरव; भारत(for पाण्डव),
(५) (विरोधोत्थं; विरुद्धं न; विरुद्धो न; विरोधेन(for विरुद्धेन); बलवद्भिर्विरोधो वै न कार्यस्ते कदावन; चाशु; (ए)वास्तु(for (ए)वाशु);)

दिव्येभ्यश्चैव भूतेभ्यो ये चान्ये परिपन्थिनः ।[1]

धर्मस्त्वां द्विषतः पातु भास्करश्च विभावसुः

१४९*अधिकपाठः

ह्नीः श्रीः कीर्तिर्धृतिः पुष्टिरुमा लक्ष्मीः सरस्वती

इमा वै तव पान्थस्य पालयन्तु धनञ्जय ।। ४९ ।।[२]

ज्येष्ठापचायी ज्येष्ठस्य भ्रातुर्वचनकारकः

प्रपद्येहं वसून्रुद्रानादित्यान्समरुद्गणान् ।। ५० ।।

विश्वेदेवांस्तथा साध्याञ्शान्त्यर्थं भरतर्षभ ।। ५१ ।। [३]

एवमुक्त्वाशिषः कृष्णा विरराम यशस्विनी।

अवरोधाद्वने वासात्सर्वस्वहरणादपि ।

इदं दुःखतरं मन्ये पुत्रेभ्यश्च विवासनम्।

प्राञ्जलिः पाण्डवं कृष्णा देवानां कुर्वती नमः

वाग्भिः परमशक्ताभिर्मङ्गलाभिरभाषत

नमो धात्रे विधात्रे च स्वस्ति गच्छ वनाद्वनम्

धर्मस्त्वां जुषतां पार्थ भास्करश्च विभावसुः

ब्रह्मा त्वां ब्राह्मणाश्चैव पालयन्तु धनञ्जय )

ज्येष्ठापचायी ज्येष्ठस्य भ्रातुर्वचनमास्थितः

प्रपद्येथा वसून्रुद्रानादित्यान्तमरुद्गणान्

विश्वदेवांस्तथादित्याब्दान्त्यर्थं भरतर्षभ

---

(१) (२)वनाद्वनं; ह्यनामयः,

(२) (द्युति(for धृतिः))

(३) (ज्येष्ठोपचायी; मास्थितः(for कारकः);) (३)त्वाम्(for तेऽस्तु); तु(for ऽस्तु); अन्तं(for आन्तं); (४)सर्वशः; पार्थिव(for भारत); (५)देवेभ्यश्चैव; पार्थिवेभ्यश्च,

स्वस्ति तेऽच्छवान्तरिक्षेभ्यो दिष्येभ्यो भरतर्षभ
पार्थिवेभ्यश्च सर्वेभ्यो ये केचित्परिपन्थिनः ।। ५२ ।।

– –

अवरोधाद्वने वासात्सर्वस्वहरणादपि ।
इदं दुःखतरं मन्ये पुत्रेभ्यश्च विवासनात् ।। ५३ ।।

लक्षालङ्कारः- इदं दुःखतरं मन्य इत्यत्र विवासनात् इदं यदिदं दुःखं तत् दुःखेभ्यः नानादुःखेभ्योऽपि दुःखतरं मन्य इति योजना ।

मास्माहं क्षत्रियकुले जातुचित्पुनराभवम् ।
ब्राह्मणेभ्यो नमस्यामि येषां नायुधजीविका ।। ५४ ।।

लक्षालङ्कारः- पुनराभवम् इत्यत्र अहं क्षत्रियकुले आ समन्तात् माभवमिति सम्बन्धः ।

ध्वंसितास्स्वगृहेभ्यश्च राष्ट्राच्च भरतर्षभ ।
वने प्रतिष्ठितो भूत्वा सौहार्दादवतिष्ठते ।। ५५ ।।(४)

लक्षालङ्कारः- ध्वंसिता इत्यत्र ध्वंसिता वयम् । अवतिष्ठते दुर्योधन इति योग्य-पदाध्याहारः ।

जेता यस्सर्वशत्रूणां यः पावकमतर्पयत् ।
जनस्त्वां पश्यतीदानीं गच्छन्तं भरतर्षभ ।। ५६ ।।

अस्मिन्नूनं महारण्ये भ्रातरस्सुहृदश्च ते।
त्वत्कथाः कथयिष्यन्ति चारणा ऋषयस्तथा ।। ५७ ।।

यत्ते कुन्ती महाबाहो जातस्यैच्छद्धनञ्जय

---

(४) अवतिष्ठसे इति मुद्रितपाठः । लक्षालङ्कारानुगुणपाठ- मूले आदृतः ।

तत्तेऽस्तु सर्वं कौन्तेय यथा च मनसेच्छसि ॥ ५८ ॥

लक्षालङ्कारः- यत् एतत् भाग्यमाह, तदिति सम्बन्धः ।

वसुदेवस्वसा देवी त्वामार्या पुनरागतम्
पश्यतु त्वां पृथा पार्थ सहस्राक्षमिवादितिः ॥ ५९ ॥

लक्षालङ्कारः- सहस्राक्षं त्वाम् अदितिरिवेति सम्बन्धः ।

नूनं ते भ्रातरः सर्वे त्वत्कथाभिः प्रजागरे
रंस्यन्ते तव कर्माणि कीर्तयन्तः पुनः पुनः ॥ ६० ॥

नैव नः पार्थ भोगेषु न धने नोत जीविते
तुष्टा बुद्धिर्भवित्री वा त्वयि दीर्घप्रवासिनि ॥ ६१ ॥

आशा सञ्जायते वीर त्वय्यरण्यं प्रपद्यति
त्वयि नः पार्थ सर्वेषां सुखदुःखे प्रतिष्ठिते
जीविते मरणं चैव स्वर्गोथ नरकस्तथा ॥ ६२ ॥

आपृष्टो मेसि कौन्तेय स्वस्ति प्राप्नुहि पाण्डव ।
कृतास्त्रं स्वस्तिमन्तं त्वां द्रक्ष्यामि पुनरागतम् ॥ ६३ ॥

१५४*अधिकपाठः
एवमुक्त्वाशिषः कृष्णा विरराम यशस्विनी
धर्मस्त्वां जुषतां पार्थ भास्करश्च विभावसुः ।
ह्रीः श्रीः कीर्तिर्द्युतिः पुष्टिरुमा लक्ष्मीः सरस्वती।
इमा वै तव पान्थस्य पालयन्तु धनञ्जय।
ज्येष्ठापचायी ज्येष्ठस्य भ्रातुर्वचनकारकः ।

प्रपद्येऽहं वसून्रुद्रानादित्यान्समरुद्गणान्।

विश्वेदेवांस्तथा साध्याञ्छान्त्यर्थं भरतर्षभ।

ततः प्रदक्षिणं कृत्वा भ्रातन्धौम्यं च पाण्डवः ।

प्रातिष्ठत महाबाहुः प्रगृह्य रुचिरं धनुः ।। ६४ ।।(१)

१५५*अधिकपाठः

कृष्णाकटाक्षपाथेयं हृदि कृत्वा ततोर्जुनः (2)

शनैरिव दिशं वीर उदीचीं भरतर्षभ।

संहरंस्तरसा वृक्षाँल्लता वल्लीश्च भारत ।। ६५ ।।

असज्जमानो वृक्षेषु जगाम सुमहाबलः ।।६६।।

तस्य मार्गादपाक्रामन्सर्वभूतानि गच्छतः ।

युक्तस्यैन्द्रेण योगेन पराक्रान्तस्य शुष्मिणः ।। ६७ ।।(३)

लक्षालङ्कारः- शुष्मिणः वीर्यवतः ।

सोऽगच्छत्पर्वतांस्तात तपोधननिषेवितान्।

दिव्यं हैमवतं पुण्यं देवजुष्टं परन्तपः ।

अगच्छत्पर्वतं पुण्यमेकाह्नैव महामनाः ।

मनोजवगतिर्भूत्वा योगयुक्तो यथानिलः ।। ६८ ।।(४)

हिमवन्तमतिक्रम्य गन्धमादनमेव च ।

---

(१) (१)प्रदक्षिणं ततः प्रदक्षिणं पुनः

(२) (४)सुमनाः प्रीतिमांस्तदा,

(३) (१)अपं(for अपां),

(४) (१)स गच्छन्; आगच्छत्; अगच्छत; रम्यम्(for पुण्यम्); (२)सु(for (ए)व); बलः(for मनाः); (३)स तत्र जवगो भूत्वा; (४)महाबलाः; महा(यथा) निलः

अत्यक्रामत्स दुर्गाणि दिवारात्रमतन्द्रितः ॥ ६९ ॥[१]

लक्षालङ्कारः- हिमवन्तमतिक्रम्य इत्यत्र गन्धेन मादयति हर्षयतीति गन्धमादनो हिमवत एव शृङ्गविशेषः ।

इन्द्रकीलं समासाद्य ततोऽतिष्ठद्धनञ्जयः ।
अन्तरिक्षेऽतिशुश्राव तिष्ठेति स वचस्तदा ॥ ७० ॥[२]

१५८*अधिकपाठः

तच्छ्रुत्वा सर्वतो दृष्टिं चारयामास पाण्डवः ।

गत्वा स षडहोरात्रान्सप्तमेहनि पाण्डवः
प्रस्थेन्द्रकीलस्य शुभे तपोयोगपरोभवत् ॥ ७१ ॥
ऊर्ध्वबाहुर्न चाङ्गानि प्रास्पन्दयत किञ्चन
समाहितात्मा नियतः सहस्राक्षसुतोऽच्युतः ॥ ७२ ॥

अथापश्यत्सव्यसाची वृक्षमूले तपस्विनम् ।
ब्राह्म्या श्रिया दीप्यमानं पिङ्गलं जटिलं कृशम्।[३]
सोऽब्रवीदर्जुनं तत्र स्थितं दृष्ट्वा महातपाः ॥ ७३ ॥

तपस्वी-

कस्त्वं तातेह सम्प्राप्तो धनुष्मान्कवची शरी ।

---

(१) (३/४)अनुं; अत्यक्रामत (स); अभ्यं(for अत्यं); सु(for स); दिवारात्रं(for स दुर्गाणि) ध्यायन्नस्त्राणि(for दिवारात्रम्); अरिन्दमः(for अतन्द्रितः),
(२) (१)इन्द्रकीलकमासाद्य; (२)तत्रां(for ततों); (३)रिक्षेति; रि(री);क्षे च;(for रिक्षे हि); (४)तिष्ठ तिष्ठ(for तिष्ठेति स); स्म; च(for स),
(३) (१)इति; अथ(for ततो); सव्यसाची तपोपश्यद्,

निबद्धासितलत्राणः क्षत्रधर्ममनुव्रतः ।। ७४ ।।[१]

नेह शस्त्रेण कर्तव्यं शान्तानामेष आलयः ।
विनीतक्रोधहर्षाणां ब्राह्मणानां तपस्विनाम् ।। ७५ ।।[२]

लक्षालङ्कारः- विनीतक्रोधहर्षाणां इत्यत्र विशेषेण नीतौ स्वतोऽन्यत्र प्रापितौ क्रोधहर्षौ येभ्यस्ते विनीतक्रोधहर्षाः तेषाम् ।

नेहास्ति धनुषा कार्यं न सङ्ग्रामोऽत्र कर्हिचित् ।
निक्षिपैतद्धनुस्तात प्राप्तोऽसि परमां गतिम् ।। ७६ ।।[३]

ओजसा तेजसा वीर यथा नान्यः पुमान्क्वचित्
तथा हसन्निवाभीक्ष्णं ब्राह्मणोऽर्जुनमब्रवीत् । ।। ७७ ।।

न चैनं चालयामास धैर्यात्सुधृतनिश्चयम्।[४]
तमुवाच ततः प्रीतः स द्विजः प्रहसन्निव ।। ७८ ।।

**तपस्वी**

वरं वृणीष्व भद्रं ते शक्रोऽहमरिसूदन ।। ७९ ।।(५)

एवमुक्तः सहस्राक्षं प्रत्युवाच धनञ्जयः ।

---

(१) (३)निबद्धासितनुं; बद्धासिः सतलं,
(२) (१)एष(for अयम्),
(३) (१)नेहात्र, (२) ख-घ-सङ्ग्रामेण, न सङ्गामोत्र (स्ति); न च युद्धेन,
(४) (१)अनन्या ( नन्ता); मोजसा; ओजसा तेजसा; अनन्तमोजसा (अनिन्धेनौजसा); अनन्यः (न्या); मोजसा; अनन्याश्चोजसाः अलभ्यमोजसा; इत्यलं तेजसा(for इत्यनन्तौजसं) वीर(for वीरो); (२)नान्यः; चान्यः(for चान्यं); पुमान्कचित्; पृथग्जनः (३/४)यथा तत्वम्; हसन्(for वाचम्); इवाभीक्ष्णं (क्ष्णो); अभीक्ष्णं स; तथाभीक्ष्णं(for अथाभीक्ष्णं); न चोवाच ततोभीक्ष्णं ब्राह्मणोत्तममर्जुनः; (६)वीर्यात्(for धैर्यात्); सुकृतिं; सुधृतं; सुधृतिं; सुकृतं; सुदृढनिश्चयः; निश्चितं,
(५) (१)उवाच तं; (३/४)कामा न्वृणीष्व लोकांस्त्वं प्राप्तोसि परमां गतिं,

प्राञ्जलिः प्रणतो भूत्वा शूरः कुरुकुलोद्वहः ।। ८० ।।[१]

**अर्जुनः**

ईप्सितो ह्येष वै कामो वरं चैनं प्रयच्छ मे ।

त्वत्तोऽद्य भगवन्नस्त्रं कृत्स्नमिच्छामि वेदितुम्।[२]

वरश्चैष प्रदीयतां वरश्रेष्ठं प्रयच्छति

– –

प्रत्युवाच महेन्द्रस्तं प्रीतात्मा प्रहसन्निव ।। ८१ ।।

**इन्द्रः-**

इह प्राप्तस्य किं कार्यमस्त्रैस्तव धनञ्जय ।

कामान्वृणीष्व लोकांस्त्वं प्राप्तोऽसि परमां गतिम् ।। ८२ ।।[३]

– –

एवमुक्तः प्रत्युवाच सहस्राक्षं धनञ्जयः ।।८३ ।।

δ

न लोभान्न पुनः कामान्न देवत्वं पुनः सुखम्।[४]

न च सर्वामरैश्वर्यं कामये त्रिदशाधिप ।। ८४ ।।

भ्रातंस्तान्विपिने त्यक्त्वा वैरमप्रतियात्य च ।

अकीर्तिं सर्वलोकेषु गच्छेयं शाश्वतीः समाः ।। ८५ ।।[५]

– –

---

(१) (१/२)प्रत्युवाच सहस्राक्षं महा भुजः(for धनं); (३)प्रयतो(for णं),

(२) (१)वै(for मे); (२) चैव(for त्वेनं); चेमं; श्रेष्ठं(for चैनं),

(३) (५/६)त्वं(for च);,

(४) (३)लोभान्न(for लोकान्न); (४)पुनः(for कुतः),

(५) (३)विजने(for विपिने);,

एवमुक्तः प्रत्युवाच वृत्रहा पाण्डुनन्दनम् ।

सान्त्वयञ्छ्लक्ष्णया वाचा सर्वलोकनमस्कृतः ।। ८६ ।।

**इन्द्रः**

यदा द्रक्ष्यसि भूतेशं त्र्यक्षं शूलधरं शिवम् ।

तदा दातास्मि ते तात दिव्यान्यस्त्राणि सर्वशः ।। ८७ ।।(१)

क्रियतां दर्शने यत्नो देवस्य परमेष्ठिनः ।

दर्शनात्तस्य कौन्तेय संसिद्धः स्वर्गमेष्यसि ।। ८८ ।।(२)

**वैशम्पायनः**

इत्युक्त्वा फाल्गुनं शक्रो जगामादर्शनं पुनः ।

अर्जुनोऽप्यथ तत्रैव तस्थौ योगसमन्वितः ।। ८९ ।।(३)

**अस्मिन् कैरातपर्वणि ३३अध्याये ८९श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अर्जुनाभिगमनपर्वणि इन्द्रदर्शने त्रयस्त्रिंशोऽध्यायः ।। ३३ ।।

## महाभारततात्पर्यनिर्णये २२ अध्याये

षण्मासेऽतिगतेऽपश्यन्मूकं नामासुरं गिरौ ।

वराहरूपमायातं वधार्थं फल्गुनस्य च ।। १२५ ।।

तं ज्ञात्वा फल्गुनो वीरः सज्यं कृत्वा तु गाण्डिवम् ।

चिक्षेप वज्रसमितांस्तत्काये सायकान् बहून् ।। १२६ ।।

---

(१) (२)रुद्रं;त्र्यम्बकं(for त्र्यक्षं); हरं(for शिवम्); त्र्यम्बकं शूलपाणिनः (३)कौतेय(for ते तात),

(२) (३)देवस्य(for कौन्तेय);,

(३) (१)फाल्गुनं (भगवान्;) अर्जुनं(for फल्गुनं); (२)पुनः; गतः(for ततः); (३)एकम्(for एंव) (४)योगबलान्वितः,

किरातरूपस्तमनु सभार्यश्च त्रियम्बकः ।
स ममार हतस्ताभ्यां दानवः पापचेतनः ।। १२७ ।।
तेनोक्तोऽसौ मयैवायं वराहोऽनुगतोऽद्य हि ।
तमाविध्यो यतस्त्वं हि तद् युद्ध्स्व मया सह ।। १२८ ।।
इत्युक्तः फल्गुनः प्राह तिष्ठ तिष्ठ न मोक्ष्यसे ।
इत्युक्त्वा तावुभौ युद्धं चक्रतुः पुरुषर्षभौ ।। १२९ ।।
तत्राखिलानि चास्त्राणि फल्गुनस्याग्रसच्छिवः ।
ततोऽर्जुनस्तु गाण्डीवं समादायाभ्यताडयत् ।। १३० ।।
तदप्यग्रसदेवासौ प्रहसन् गिरिशस्तदा ।
बाहुयुद्धं ततस्त्वासीत् तयोः पुरुषसिंहयोः ।। १३१ ।।
पिण्डीकृत्य ततो रुद्रश्चिक्षेपाथ धनञ्जयम् ।
मूर्च्छामवाप महतीं फल्गुनो रुद्रपीडितः ।। १३२ ।।
पूर्वं सम्प्रार्थयामास शङ्करो गरुडध्वजम् ।
अवराणां वरं मत्तो येषां त्वं सम्प्रयच्छसि ।
अजेयत्वं प्रसादात् ते विजेयाः स्युर्मयाऽपि ते ।। १३३ ।।
इत्युक्तः प्रददौ विष्णुरुमाधीशाय तं वरम् ।
तेनाजयच्छ्वेतवाहं गिरिशो रणमध्यगम् ।। १३४ ।।
केवलान् वैष्णवान् मन्त्रान् व्यासः पार्थाय नो ददौ ।
एतावताऽलं भीष्मादेर्जयार्थमिति चिद्घनः ।। १३५ ।।
केवलैर्वैष्णवैर्मन्त्रैः स्वदत्तैर्विजयावहैः ।
अतिवृद्धस्य पार्थस्य दर्पः स्यादित्यचिन्तयत् ।। १३६ ।।
पार्थः सञ्ज्ञामवाप्याथ जयार्थ्याराधयच्छिवम् ।
व्यासोदितेन मन्त्रेण तानि पुष्पाणि तच्छिरः ।। १३७ ।।

आरुहन् स तु तं ज्ञात्वा रुद्र इत्येव फल्गुनः ।
नमश्चक्रे ततः प्रादादस्त्रं पाशुपतं शिवः ।। १३८ ।।

**महाभारते- वनपर्वणि ३४, ३५, अध्यायः**

# 03- 03- 034

# ३४. चतुस्त्रिंशोऽध्यायः

**अर्जुनेन हिमवच्छिखरे तपश्चरणम् ।। १ ।। पार्थतपोभीरुभिर्महर्षिभिः प्रार्थितेन शिवेन आश्वासनपूर्वकमृषीणां प्रति निवर्तनम् ।। २ ।।**

जनमेजयः

भगवञ्छ्रोतुमिच्छामि पार्थस्याक्लिष्टकर्मणः ।
विस्तरेण कथामेतां यथास्त्राण्युपलब्धवान् ।। १ ।।

यथा च पुरुषव्याघ्रो दीर्घबाहुर्धनञ्जयः ।
वनं प्रविष्टस्तेजस्वी निर्मनुष्यमभीतवत् ।। २ ।।(१)

किं च तेन कृतं तत्र वसता ब्रह्मवित्तम ।
कथं च भगवान्स्थाणुर्देवराजश्च तोषितः ।। ३ ।।(२)

एतदिच्छाम्यहं श्रोतुं त्वत्प्रसादाद्द्विजोत्तम ।
त्वं हि सर्वज्ञ दिव्यं च मानुषं चैव वेत्थ ह ।। ४ ।।(३)

अत्यद्भुततमं ब्रह्मन्रोमहर्षणमर्जुनः ।
भवेन सह सङ्ग्रामं चकाराप्रतिमं किल ।

---

(१) (१)यथा च;(for कथं स),

(२) (१) (अ)नेन (for तेन); तात; कर्म(for तत्र); (३) रूद्रो(for स्थाणुर्)

(३) (३)हि (for च); त्वं हि सर्वं भविष्यन्ति); (४)मानुष्यं किं न; चापि; (for चैव); हि(for ह),

पुरा प्रहरतां श्रेष्ठः सङ्ग्रामेष्वपराजितः ।। ५ ।।(१)

यच्छ्रुत्वा नरसिंहानां दैन्यहर्षातिविस्मयात् ।
शूराणामपि पार्थानां हृदयानि चकम्पिरे ।। ६ ।।(२)

लक्षालङ्कारः- यच्छ्रुत्वा नरसिंहानाम् इत्यत्र नरसिंहानां नरश्रेष्ठानाम् । स्वेषां तादृशशौर्याभावाद्दैन्यम् । पार्थानां पृथ्वीसम्बन्धिनां राज्ञाम्।

यद्यच्च कृतवानन्यत्पार्थस्तदखिलं वद ।। ७ ।।

न ह्यस्य निन्दितं जिष्णोः सुसूक्ष्ममपि लक्षये ।
चरितं तस्य शूरस्य तन्मे सर्वं प्रकीर्तय ।। ८ ।।(३)

– –

कथयिष्यामि ते तात कथामेतां महात्मनः ।
दिव्यां पौरवशार्दूल महतीमद्भुतोपमाम् ।। ९ ।।(४)

गात्रसंस्पर्शसम्बद्धां त्र्यम्बकेण सहानघ ।
पार्थस्य देवदेवेन शृणु सम्य समागमम् ।। १० ।।(५)

युधिष्ठिरनियोगात्स जगामामितविक्रमः ।
शक्रं सुरेश्वरं द्रष्टुं देवदेवं च शङ्करम् ।। ११ ।।(६)

---

(१) (१)महाब्रह्मन्; इदं (अहं; इह) ब्रह्मन्(for महाप्राज्ञ); अत्यद्भुततमं ब्रह्मन्; (२) लोमं (for रोमं)

(२) (१)तच्छ्रुत्वा; (३)शूराणां पार्थिवानां च,

(३) (१)यच्चापि कृं; (२) अपि मे;(for अखिलं); (३)कर्म(for जिष्णोः); (५) शौर्यं च(for शूरस्य); (६)तन्मे सवं; तस्मात्त्वमपि कीर्तय,

(४) (१)राजन्(for तात); अहं ते कथयिष्यामि); (३)पौरवं(for कौं);,

(५) (१)संस्पर्शसम्बद्धां बद्धं; बन्धां; स्वर्शत्रसम्भाषं बन्धां); (२)त्र्यम्बकेण न महानघ; महाहवे; (४) राजन् (for सम्यक्);,

(६) (१)च; तु(for स),

दिव्यं तद्धनुरादाय खड्गं च कनकत्सरुम्।
महाबलो महाबाहुरर्जुनः कार्यसिद्धये ॥ १२ ॥

दिशं ह्युदीचीं कौरव्यो हिमवच्छिखरं प्रति।[१]
ऐन्द्रिः स्थिरमना राजन्सर्वलोकमहारथः ॥ १३ ॥

त्वरया परया युक्तस्तपसे धृतनिश्चयः ।
\नं कण्टकितं घोरमेक एवान्वपद्यत ॥ १४ ॥[२]

नानापुष्पफलोपेतं नानापक्षिनिषेवितम् ।
नानामृगगणाकीर्णं सिद्धचारणसेवितम् ॥ १५ ॥[३]

१६०*अधिकपाठः
गन्धर्वैरप्सरोभिश्च क्रीडद्भिरुपशोभितम्
मत्तैः किम्पुरुषैश्चैव पानभूमिगतैस्तथा
तीअयाभिः समन्ताच्च व्यावृत्य परिवीक्षितः
जगाम नरशार्दूलो देवं द्रहुं पिनाकिनम्

ततः प्रयाते कौन्तेये वनं मानुषवर्जितम् ।
शङ्खानां पटहानां च शब्दः समभवद्दिवि ॥ १६ ॥[४]

पुष्पवर्षं च सुमहन्निपपात महीतले ।

---

(१) (१)च (for तद्); (२)कनकत्सरु; पुरुषर्षभ; (४)प्रागुदीचीमरिन्दम; प्रागुदीचीं धनञ्जयः (५) प्रतस्थे(for ह्युदीचीं),

(२) (५)ऐन्द्रिः स्थिरो महाराज;(for ) श्रिया परमया युक्त; कृत(for धृतं); (५)कण्टकिनं ; दुर्गं(for घोरं); (६)एकमेकोन्वं;,

(३) (२)नि (वि);नादितं;,

(४) (१)बीभत्सौ(for कौन्तेये);,

मेघजालं च विततं छादयामास सर्वतः ।। १७ ।।(१)

सोऽतीत्य वनदुर्गाणि सन्निकर्षे महागिरेः ।
शुशुभे हिमवत्पृष्ठे वसमानोऽर्जुनस्तदा ।। १८ ।।(२)

तत्र तत्र द्रुमान्फुल्लान्विहगैर्वल्गुनादितान् ।
दीर्घां च विपुलावर्तां वैदूर्यनीलसंनिभाः ।। १९ ।।(३)

लक्षालङ्कारः- दीर्घां च विपुलावर्ताम् इत्यत्र दीर्घां दीर्घिकाम् ।

हंसकारण्डवोद्गीताः सारसाभिरुतास्तथा ।
पुंस्कोकिलरुताश्चैव क्रौञ्चबर्हिणनादिताः ।। २० ।।(४)

मनोहरवनोपेतास्तस्मिन्नतिरथोऽर्जुनः ।
पुण्यशीतामलजलाः पश्यन्प्रीतमनाभवत् ।। २१ ।।

रमणीये वनोद्देशे रममाणोऽर्जुनस्तदा ।
तपस्युग्रे वर्तमान उग्रतेजा महामनाः ।। २२ ।।(५)

दर्भचीरं निवस्याथ दण्डाजिनविभूषितः ।
पूर्णे पूर्णे त्रिरात्रे तु मासमेकं फलाशनः ।
द्विगुणेन हि कालेन द्वितीयं मासमत्ययात् ।। २३ ।।(६)

तृतीयमपि मासं स पक्षेणाहारमाचरन् ।

---

(१) (१)(अ) नु(for सु); (३)सततं(for विं); (४) सर्वशः

(२) (१) सोर्तात्य,

(३) (१)पुण्य; तत्र; पुण्यान्(for (अ)पश्यद्र); (२)विहङ्गैरु; (३)विपुलावर्ता; (४)सप्रभा; वैदू (डू) र्यविम(सलि)लप्रभाः

(४) (४)हंसं,

(५) (१)रथस्ततः

(६) (५)तु हि;च(for (ए)व); (६)अभ्यगात्; अत्ययात्; अभ्ययात्; द्वितीयं च समभ्ययात्,

शीर्णं च पतितं भूमौ पर्णं समुपयुक्तवान्  ।। २४ ।।[१]

चतुर्थे त्वथ सम्प्राप्ते मासे भरतसत्तमः
वायुभक्षो महाबाहुरभवत्पाण्डुनन्दनः  ।। २५ ।।

ऊर्ध्वबाहुर्निरालम्बः पादाङ्गुष्ठाग्रविष्ठितः  ।। २६ ।।[२]

सदोपस्पर्शनाच्चास्य बभुवुरमितौजसः ।
विद्युदम्भोरुहनिभा जटास्तस्य महात्मनः ।[३]
ततो महर्षयः सर्वे जग्मुर्देवं पिनाकिनम्  ।। २७ ।।

लक्षालङ्कारः- सदोपस्पर्शनात् इत्यत्र उपस्पर्शनम् उदकस्पर्शनम् ।

निवेदयिषवः पार्थं तपस्युग्रे समास्थितम् ।
तं प्रणम्य महादेवं शशंसुः पार्थकर्म तत्  ।। २८ ।।[४]

१६१*अधिकपाठः

निवेदयिषवः पार्थ तपस्युग्रे समास्थितम् (5)

**महर्षयः-**

एष पार्थो महातेजा हिमवत्पृष्ठमाश्रितः ।

---

(१) (२)क्रमेणे (for पक्षेण); आचरत्; जीर्ण(for शी); भुक्तवान्
(२) (१) (ऽ)षिः हि(for तु); अव; अति (for अथ); चतुर्थे प्रथमं प्राप्तौ; (२)मासे भरतसत्तम; (म) (३/४)निराहार;(for महा) स तदा(for अभवत्); (६)पदाङ्गुष्ठाग्र; निष्ठितः; धिष्ठित; पीडिताः,
(३) (१)चैव; तस्य; तत्र; चापि(for चास्य); (३) दरं; धरं(for रुहं);,
(४) (२)जग्मुः देवं;,
(५) (व्यवस्थितं; समाहितं)(३)नीलकण्ठं महादेवं; (४) अ(त्ने)भिवाद्य प्रणम्य च; (५/६)फाल्गुनस्य तं (ते)प्रणम्य महादेवं शशंसुः पार्यकर्म तत्;,

उग्रे तपसि दुष्पारे स्थितो धूमाययन्दिशः ।। २९ ।।(१)

लक्षालङ्कारः- धूमापयन् दिश इत्यत्र धूमं आपयन् प्रापयन् धूमापयन् ।

तस्य देवेश न वयं विद्मः सर्वे चिकीर्षितम् ।
सन्तापयति नः सर्वानसौ साधु निवार्यताम् ।। ३० ।।(२)

तेषां तद्वचनं श्रुत्वा मुनीनां भावितात्मनाम् ।
उमापतिर्भूतपतिर्वाक्यमेतदुवाच ह ।। ।।

**महादेवः**

न वो विषादः कर्तव्यः फाल्गुनं प्रति सर्वशः ।

**श्रीमहेश्वरः**

शीघ्रं गच्छत संहृष्टा यथागतमतन्द्रिताः ।
अहमस्य विजानामि सङ्कल्पं मनसि स्थितम् ।। ३१ ।।(३)

१६३*अधिकपाठः

न वो विषादः फल्गुनं प्रति सर्वशः ।

नास्य स्वर्गस्पृहा काचिन्नैश्वर्यस्य तथाऽऽयुषः ।
यत्तस्य काङ्क्षितं सर्वं तत्करिष्येऽहमद्य वै ।। ३२ ।।(४)

– –

तच्छ्रुत्वा शर्ववचनमृषयः सत्यवादिनः ।

---

(१) (१)एकः(for एष); (२)पार्श्र्वम्(for पृष्ठम्); आस्थितः आगतः(for आश्रित),
(४)धूमाक्यन्; धूममुत्पादयन्दिशः,
(२) (२)कर्म (for सर्वे); विजानीमो मनीषितं;,
(३) (२)देवदेव आह; महादेव उं; ईश्वर उं; श्रेमहेश्वर उं (उं)
(४) (१)स्वर्गे(for स्वर्ग); (२)तथां; च नां(for न चां); (३)तस्य; अस्य(for त्वस्य); प्राप्तुं; प्राप्तं (for सर्वं); (४)तदद्य(for तदस्य;) तत्सवं; करवाण्यहं,

प्रहृष्टमनसो जग्मुः यथा स्वान्पुनरालयान् ।। ३३ ।।(१)

लक्षालङ्कारः- यथास्वं स्वमाश्रममनतिक्रम्य यथास्वम् ।

अस्मिन् कैरातपर्वणि ३४ अध्याये ३३श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि कैरातपर्वणि मुनिशङ्करसंवादे चतुस्त्रिंशोऽध्यायः ।। ३४ ।।

## महाभारततात्पर्यनिर्णये २२ अध्याये

अस्त्रं तद् विष्णुदैवत्यं साधितं शङ्करेण यत् ।
तस्मात् पाशुपतं नाम स्वान्यस्त्राण्यपरे सुराः ।
ददुस्तदैव पार्थाय सर्वे प्रत्यक्षगोचराः ।। १३९ ।।

महाभारते- वनपर्वणि ३५ अध्यायः

## 03- 03- 035

## ३५. पञ्चत्रिंशोऽध्यायः

किरातरूपिणा हरेणार्जुनस्य पराजयः ।। १ ।। तथा पार्थपूजास्तुतिसंतुष्टेन तेन तदाश्वासनम् ।। २ ।। महादेवेन पार्थाय स्वग्रस्तगाण्डीवादि प्रत्यर्पणपूर्वकं पाशुपतास्त्रप्रदानम् ।। ३ ।।

– –

गतेषु तेषु सर्वेषु तपस्विषु महात्मसु ।
पिनाकपाणिर्भगवान्सर्वपापहरो हरः ।। १ ।।
कैरातं वेषमास्थाय काञ्चनद्रुमसन्निभम् ।

(१) वैशं उं (१)तच्छुत्वा भगव द्वाक्यं; तस्य वचनं; ऋषयो वाक्यं; सत्यवचनं
(४)यथास्वान् पुनराश्रमं (मात्); लयान्;,

विभ्राजमानो विपुलो गिरिर्मेरुरिवापरः ॥ २ ॥[१]

श्रीमद्धनुरुपादाय शरांश्चाशीविषोपमान् ।
निष्पपात महावेगो दहनो देहवानिव ॥ ३ ॥[२]

देव्या सहोमया श्रीमान्समानव्रतवेषया ।
नानावेषधरैर्हृष्टैर्भूतैरनुगतस्तदा ॥ ४ ॥[३]

किरातवेषसञ्छन्नः स्त्रीभिश्चापि सहस्रशः ।
अशोभत तदा राजन्स देशोऽतीव भारत ॥ ५ ॥[४]

क्षणेन तद्वनं सर्वं निःशब्दमभवत्तदा ।
नादः प्रस्रवणानां च पक्षिणां चाप्युपारमत् ॥ ६ ॥[५]

प्रेषयित्वा नु दितिजं मूकं वा पार्थनिश्चितम्
मयेप्सितं मदीयैस्तु वस्तुं सह महाबलः ।
तस्मादर्जुनबाणैस्त्वं निर्विद्धो हि ममैव च ।
देहं स्यक्त्वा महाबाहो मामेवैष्यसि दानव ।

स सन्निकर्षमागम्य पार्थस्याक्लिष्टकर्मणः ।
मूकं नाम दनोः पुत्रं ददर्शाद्भुतदर्शनम् ॥ ७ ॥[६]

वाराहं रूपमास्थाय तर्कयन्तमिवार्जुनम् ।

---

(१) (१)रूपम् (for वेषम्); (२)संनिभः (३)विपुलो (for वपुषा),
(२) (१)चित्रं; श्रीमान् (for श्रीमद्); (३)महावेगो (for महार्चिष्मान); (४)दहन; कक्षवानिव; दहनो देहवानिव,
(३) (१)दिव्या (for देव्या); (३)नानाचराचरैर्हृष्टै; (४)अनुगतैसू तथा; प्रभु; सदा (for तदा),
(४) (१)सञ्छन्नः; (२)अपि (for अनु); (३)महाराज(for तदा राजन्); (४)देशो (for देवो),
(५) (१)बलं (for वनं); (४)च व्युपारमत्; चाथ सारसान् (for चाप्युपां),
(६) (१)आगत्य; (३)दनोः (for दितेः); (४)अद्भुतविक्रमं; अमितविक्रमं,

हन्तुं परं दीप्यमानं तमुवाचाथ फाल्गुनः ।। ८ ।।[१]

गाण्डीवं धनुरादाय शरांश्चाशीविषोपमान् ।
सज्यं धनुर्वरं कृत्वा ज्याघोषेण निनादयन् ।। ९ ।।[२]

**अर्जुनः**

यन्मां प्रार्थयसे हन्तुमनागसमिहागतम् ।
तस्मात्त्वां पूर्वमेवाहं नेताद्य यमसादनम् ।। १० ।।[३]

**वैशम्पायनः**

दृष्ट्वा तं प्रहरिष्यन्तं फाल्गुनं दृढधन्विनम् ।
किरातरूपी सहसा वारयामास शङ्करः ।। ११ ।।[४]

मयैष प्रार्थितः पूर्वमिन्द्रकीलसमप्रभः ।
अनादृत्य च तद्वाक्यं प्रजहाराथ फाल्गुनः ।। १२ ।।[५]
मुमोच निशितं बाणं वज्राशनिसमं बलम्

किरातश्च समं तस्मिन्नेकलक्ष्ये महाद्युतिः ।
प्रमुमोचाशनिप्रख्यं शरमग्निशिखोपमम् ।। १३ ।।[६]

तौ मुक्तौ सायकौ ताभ्यां समं तत्र निपेततुः ।
मूकस्य गात्रे विस्तीर्णे शैलसंहनने तदा ।। १४ ।।[७]

---

(१) (२)तर्जं (for तर्कं); (३)तूर्णं (for हन्तुं); (४)फाल्गुनः,
(२) (१)गाञ्जीवं; (४)विनादयन्; ,
(३) (२)मनागपि मृगाधमं; मृगाधमनिरागसं; (४)नयामि; नेताद्य; (स्वि) (for नेष्यामि);,
(४) (१)दृष्ट्वा; (२)अर्जुनं; फाल्गुनं; (३)भगवान् (for सहसा),
(५) (१)सर्वं (for पूर्व); (२)इन्द्रकी (नी) लसमप्रभ; (३)तु; च(for (ए)व); (४)(ए) व) (for (अ)थ); फाल्गुन; फल्गुन; परवीरहा;,
(६) (२)एक लक्षे; लक्ष्यः (३)प्रजहारां;,
(७) (३)संनिपात; अभिघात; (४)शैलपृष्ठनिभेतदा;,

यथाशनेर्विनिर्घोषो वज्रस्येव च पर्वते ।
तथा तयोः सन्निपातः शरयोरभवत्तदा ।। १५ ।।[१]

स विद्धो बहुभिर्बाणैः दीप्तास्यैः पन्नगैरिव ।
ममार राक्षसं रूपं भूयः कृत्वा विभीषणम् ।। १६ ।।[२]

लक्षालङ्कारः- ममार राश्रसं रूपम् इत्यत्र मृतिसमये राश्रसं रूपं मूलरूपं कृत्वा ममार।

स ददर्श ततो जिष्णुः पुरुषं काञ्चनप्रभम्।
किरातवेषसञ्छन्नं स्त्रीसहायममित्रहा ।
तमब्रवीत्प्रीतमनाः कौन्तेयः प्रहसन्निव ।। १७ ।।[३]

**अर्जुनः**

को भवानटते शून्ये वने स्त्रीगणसंवृतः ।
न त्वमस्मिन्वने घोरे बिभेषि कनकप्रभ ।। १८ ।।[४]

किमर्थं च त्वया विद्धो वराहो मत्परिग्रहः ।
मयाभिपन्नः पूर्वं हि राक्षसोऽयमिहागतः ।। १९ ।।[५]

कामात्परिभवाद्वापि न मे जीवन्विमोक्ष्यसे ।। २० ।।

लक्षालङ्कारः- कामात्परिभवाच्चापि इत्यत्र परिभवात् मम परिभवं प्राप्य ।

न ह्येष मृगयाधर्मो यस्त्वयाद्य कृतो मयि ।

---

(१) (१)यथा (महा) शनिविनिर्घोषो; यथाशनेर्विनिर्घोषो (निष्पेषो); अशनेरिव निर्घोषो; (३)स निर्घात; विनिर्धात; (for संनिपात); (४)श्रूयते शरयोर्भुवि;,

(२) (३) क-ख-भूयः, (४)सुदारुणं (for विभीं),

(३) (१)स ददर्श (for ददर्शाथ); (३) सञ्छन्नं; किरातं धर्मवन्तं वै;,

(४) (१)रमते; आगत; (for अटते); (२)वने स्त्रगिणसेवित; वारस्त्रीग्ध्यासंवृत; (४)प्रभ; प्रभं,

(५) (२)वराहो मत्; मृगो ह्यस्मत्,

तेन त्वां भ्रंशयिष्यामि जीवितात्पर्वताश्रयम् ।। २१ ।।(१)

– –

इत्युक्तः पाण्डवेयेन किरातः प्रहसन्निव ।

उवाच श्लक्ष्णया वाचा पाण्डवं सव्यसाचिनम् ।। २२ ।।(२)

न मत्कृते त्वया वीर भीः कार्या वनमन्तिकात् ।

इयं भूमिः सदास्माकमुचिता वसतां वने।

त्वया तु दुष्करः कस्मादिह वासः प्ररोचितः ।

वयं तु बहुसत्त्वेऽस्मिन्निवसामस्तपोधन।

भवांस्तु कृष्णवर्त्माभः सुकुमारः सुखोचितः ।

कथं शून्यमिमं देशमेकाकी विचरिष्यति।

अर्जुनः

गाण्डीवमाश्रयं कृत्वा नाराचांश्चाग्निसन्निभान् ।

निवसामि महारण्ये द्वितीय इव पावकिः ।

एष चापि मया जन्तुर्मृगरूपं समाश्रितः ।

राक्षसो निहतो घोरो हन्तुं मामिह चागतः ।

किरातः

मयैष धन्वनिर्मुक्तैस्ताडितः पूर्वमेव हि ।

बाणैरभिहतः शेते नीतश्च यमसादनम् ।

किरातः-

---

(१) (१)चापि (for वापि); (३)स्वा (for स्वां); एवं च ते वधिष्यमि; तेन त्वां ध्वंसयिष्यामि; (५) श्रयं श्रय श्रयात्;,

(२) (प्रचोदित; प्रयोजित;(for प्ररों); स्तपोवने शरांश्चाग्निसमप्रभान् पावक; स्थित; (for श्रितः); धन्व(for धनुं); मयैवैष धनुर्मुक्तैसू),

ममैष लक्ष्यभूतो हि मम पूर्वपरिग्रहः ।
ममैव च प्रहारेण जीविताद्व्यपरोपितः ।। २३ ।।[१]

दोषान्स्वान्नार्हसेऽन्यस्मै वक्तुं स्वबलदर्पितः ।
अवलिप्तोऽसि मन्दात्मन्न मे जीवन्विमोक्ष्यसे ।। २४ ।।[२]

स्थिरो भवस्व मोक्ष्यामि सायकानशनीनिव ।
घटस्व परया शक्त्या मुञ्च त्वमपि सायकान् ।। २५ ।।[३]

तस्य तद्वचनं श्रुत्वा किरातस्यार्जुनस्तदा ।
रोषमाहारयामास ताडयामास चेषुभिः ।
ततो हृष्टेन मनसा प्रतिजग्राह सायकान् ।
भूयो भूय इति प्राह मन्दमन्देत्युवाच ह ।
प्रहरस्व शरानेतान्नाराचान्मर्मभेदिनः ।
इत्युक्तो बाणवर्षं स मुमोच सहसार्जुनः ।

ततस्तौ तत्र संरब्धौ राजमानौ मुहुर्मुहुः ।
शरैराशीविषाकारैस्ततक्षाते परस्परम् ।। २६ ।।[४]

ततोऽर्जुनः शरवर्षं किराते समवासृजत् ।
तत्प्रसन्नेन मनसा प्रतिजग्राह शङ्करः ।। २७ ।।[५]

---

(१) (१)ममैष लक्ष्य; (क्ष) भूतो वै; ममैष लक्ष्यते भूतो; ममैष लक्ष्य (क्ष)भूतो हि; (२)मम पूर्वपरिग्रहः; (३)मम चैक; मम चैव; मम चैष(for ममैव च); (४)अवं; व्यपं(for व्यवं),

(२) (१) (ऽ)न्यस्य(for ऽन्यस्मै); (३) क-ख-अभिषिक्तोऽस्मि, अवलिप्तोसि; अभिपन्नोसि; अभिषिक्तोस्मि; (पि); अधिक्षिप्तोस्मि;,

(३) (१)स्थितो (for स्थिरो); भव त्वं; भव वि (for भवस्व); (२)अशनीरिव; अशनिप्रभान्,

(४) (२)राजं (for गर्जं); (३)विषप्रख्मयैः (for विषाकारै); (४)युयुधाते (for ततक्षाते),

(५) (१)बाणवर्षं; शरं वर्षं; शरान्घोरान्; (३) तं(for तत्),

मुहूर्तं शरवर्षं तत्प्रतिगृह्य पिनाकधृक् ।
अक्षतेन शरीरेण तस्थौ गिरिरिवाचलः ॥ २८ ॥[१]

स दृष्ट्वा बाणवर्षं तु मोघीभूतं धनञ्जयः ।
परमं विस्मयं चक्रे साधु साध्विति चाब्रवीत् ॥ २९ ॥[२]

ઠ

अहोऽयं सुकुमाराङ्गो हिमवच्छिखराश्रयः ।
गाण्डीवमुक्तान्नाराचान्प्रतिगृह्णात्यविह्वलः ॥ ३० ॥[३]

कोऽयं देवो भवेत्साक्षाद्रुद्रो यक्षः सुरोऽसुरः ।
विद्यते हि गिरिश्रेष्ठे त्रिदशानां समागमः ॥ ३१ ॥[४]

न हि मद्बाणजालानामुत्सृष्टानां सहस्रशः ।
शक्तोऽन्यः सहितुं वेगमृते देवं पिनाकिनम् ॥ ३२ ॥

देवो वा यदि वा यक्षो रुद्रादन्यो व्यवस्थितः ।
अहमेनं शरैस्तीक्ष्णैर्नयामि यमसादनम् ॥ ३३ ॥[५]

– –

ततो हृष्टमना जिष्णुर्नाराचान्मर्मभेदिनः ।
व्यसृजच्छतधा राजन्मयूखानिव भास्करः ॥ ३४ ॥[६]

---

(१) (१)बाणं(for शरं); तु; तं; च(for तत्); (२) प्रगृह्य च (for प्रतिं); भृत्; धृत्;(for धृक्),
(२) (१) तं; तु(for तन्);,
(३) (२)वत्पर्वताश्रय; वच्छिखराश्रय; (२)विव्यथ; निर्विष; चाव्यथ; (for (अ)विह्वल),
(४) (१)भव;(for भवेत्); (२)देव; न्द्रः(for यक्षः); (अ)थ वासुरः; (अ)थ वासुरः; (अ)थ वापुनः; (अ)सुरोपि वा; सुरोसुर; रुद्रो यक्षेश्वरेश्वर; (३) (ऽ)त्र; च(for हि)
(५) (१)कुबेरो (for देवो वा); वा यक्ष; शोटशक्तो तिदेवो वा; देवो वादानवो वापि; (२)रुद्रो वान्यो (रक्षो);(for रुद्रा दन्यो); यदि (for व्यव); रुद्रो वापि स्वयं स्थितः;,
(६) (१)प्रीतं(for हृष्टं); (३)व्यसृज्य; असृजत्; शतश;(for धा);तत्र(for राजन्); असृजच्च महाराज;

तान्प्रसन्नेन मनसा भगवांल्लोकभावनः ।
शूलपाणिः प्रत्यगृह्णाच्छिलावर्षमिवाचलः ॥ ३५ ॥

क्षणेन क्षीणबाणोऽथ संवृत्तः फाल्गुनस्तदा ।
भीश्चैनमाविशत्तीव्रा तं दृष्ट्वा शरसङ्क्षयम् ॥ ३६ ॥(१)

चिन्तयामास जिष्णुस्तु भगवन्तं हुताशनम् ।

&

पुरस्तादक्षयौ दत्तौ तूणौ येनास्य खाण्डवे।(२)
किं नु मोक्ष्यामि धनुषा यन्मे बाणाः क्षयं गताः ॥ ३७ ॥

अयं च पुरुषः कोऽपि बाणान्ग्रसति सर्वशः ॥ ३८ ॥(३)

हत्वा चैनं धनुष्कोट्या शूलाग्रेणेव कुञ्जरम् ।
नयामि दण्डधारस्य यमस्य सदनं प्रति ॥ ३९ ॥(४)

१६८*अधिकपाठः

प्रगृह्याथ धनुष्कोट्या ज्यापाशेनावकृष्य च ।
मुष्टिभिश्चापि हतवान्वज्रकल्पैर्महाद्युतिः ।

– –

सम्प्रयुद्धो धनुष्कोट्या कौन्तेयः परवीरहा।
क्यअतुलं देवमीशानं ललाटे प्रजहार च ।

---

अवा सृजत्तथा राजन्,

(१) (२)फाल्गुन; तथा(for तदा); (३)विषादं (for वित्रासं); तु; वि(for च); स वित्रासं जगामाथ; भीश्चैनमाविशत्तीव्रा; (४)यन्मे बाणा; क्षयं गता,

(२) (३)पुरा तावक्षयौ; (४)मे येन(for येनास्य),

(३) (४)गृह्णाति (for ग्रसति),

(४) (१)अयमेनं; हत्वा चैनं; अयमेव; (२)तोत्रां;(for शूलां),

तदप्यस्य धनुर्दिव्यं जग्राह गिरिगोचरः ।। ४० ।।[१]

ततोऽर्जुनो ग्रस्तधनुः खड्गपाणिरतिष्ठत ।
युद्धस्यान्तमभीप्सन्वै वेगेनाभिजगाम तम् ।। ४१ ।।[२]

तस्य मूर्ध्नि शितं खड्गमसक्तं पर्वतेष्वपि।
मुमोच भुजवीर्येण विक्रम्य कुरुनन्दनः ।। ४२ ।। [३]

तस्य मूर्धानमासाद्य पफालासिवरो हि सः ।। ४३ ।।[४]

ततो वृक्षैः शिलाभिश्च योधयामास फाल्गुनः ।
तदा वृक्षान्महाकायः प्रत्यगृह्णादथो शिलाः ।। ४४ ।।[५]

किरातरूपी भगवांस्ततः पार्थो महाबलः
मुष्टिभिर्वज्रसङ्काशैर्धूममुत्पादयन्मुखे ।
प्रजहार दुराधर्षे किरातसमरूपिणि ।। ४५ ।।[६]

ततः शक्राशनिसमैर्मुष्टिभिर्भृशदारुणैः ।
किरातरूपी भगवानर्दयामास फाल्गुनम् ।। ४६ ।।[७]

ततश्चटचटाशब्दः सुघोरः समपद्यत ।
पाण्डवस्य च मुष्टीनां किरातस्य च युध्यतः ।। ४७ ।।[८]

---

(१) (१)स प्रयुद्धो; स (सं) प्रबुद्धो; सम्प्रयुद्धो (क्तो); सं(स) प्राविध्यद्; (४)जग्रास; जग्राह; वनगोचरः,
(२) (१)स्रस्तं(for ग्रस्तं); (२)व्यदृश्यत; अदृश्यत; (for अतिष्ठत); (३)स(for वै)
(३) (१)तस्य मूर्ध्नि ( र्ध्ना) समासाद्य ,
(४) विलीनोसिवरो; विफलोसिवरो (ऽ)थ; (ऽ)पि (for हि),
(५) (२)फल्गुन; (३)च (त) दा(for यथा); महाकायान्; (४)प्रतिगृहात्यथो,
(६) (३)सङ्काष्टैर् (for संस्प) र्शैर्),
(७) (१)स्पर्शैर्; प्रख्यैर्; (for समैर्); (४) धर्षं; मर्दं; दर्शं; ताडं(for अर्दं) फाल्गुनं,
(८) (२)समपद्यत; (३/४)पाण्डं; किरां; सुध्यतोः,

सुमुहूर्तं तु तद्युद्धमभवल्लोमहर्षणम् ।
भुजप्रहारसंयुक्तं वृत्रवासवयोरिव ॥ ४८ ॥[१]

जघानाथ तोत जिष्णुः किरातमुरसा बली ।
पाण्डवं च विचेष्टं तं किरातोऽप्यहनद्बली ॥ ४९ ॥[२]

तयोर्भुजविनिष्पेषात्सङ्घर्षेणोरसोस्तथा ।
समजायत गात्रेषु पावकोऽङ्गारधूमवान् ॥ ५० ॥[३]

तत एनं महादेवः पीड्य गात्रैः सुपीडितम् ।
तेजसा व्यक्रमद्रोषाच्चेतस्तस्य विमोहयन् ॥ ५१ ॥[४]

ततोऽभिपीडितैर्गात्रैः पिण्डीकृत इवाबभौ ।
फाल्गुनो गात्रसंरुद्धो देवदेवेन भारत ॥ ५२ ॥[५]

सुमुहूर्तं तथा ध्यात्वा सचेताः पुनरूत्थितः ।
ततः प्रीतो भवस्तस्य भगवान्कामनाशनः [6]

निरुच्छ्वासोऽभवच्चैव सन्निरुद्धो महात्मना ।
पपात भूम्यां निश्चेष्टो गतसत्त्व इवाभवत् ॥ ५३ ॥[७]

---

(१) (१)तु (हि) तद्युद्धं; अभृद्युद्धं; तयोर्युद्धं;(for महद्युद्धं); मुहूर्तं सुमहद्युद्धं; मुहूर्तमिव तद्युद्धं; मुहूर्त समभवद्युद्धं; (२)आसीत्सु; अभबल्;(for असित्तलू); आसील्लोक; (द्रोम; ल्लोभ) प्रहर्षणं भुजाभ्यामेव संसक्तं; भुजाप्रहारान्संरब्धं; भुजप्रहारसंसक्तं (भूतं),

(२) (१)जघानाथ; महाराज; अताडयत्; प्रजहार; (for जहाराथ); (३)स; तं; तु;(for च) पाण्डवं चापि निष्टन्तं ; पाण्डवं चैव चेष्टतं; (४) (अ)प्यहरद्; (ऽ)भ्यः (ह्म) हनद्; व्यहरद्; (ऽ) थ हरद्; बली,

(३) (१)युद्धं(for भुजं); (२) (उ)रसम् (सान्); (उ)रसा। तदा; तयोः(for तथा),

(४) (१)ततस्तं च; तत एतं; ततोर्जुनं; (२)गात्रैः प्रपी(सुता)डितं; गात्रेषु पीडितं; (३) (अ)स्थाक्रमत्; व्यक्रमत्; (अ)त्यक्रमत (४)तेजस्तस्य; व्यमोहयत्,

(५) (१) (ऽ)भि; (ऽ)ति(for नि); फाल्गुनो द्रुम् (for देव)

(६) (२) फाल्गुनो; (४) महां (for देवं),

(७) (१)पार्थ; चैष(for चैव); निरुच्छ्वा सः कृत इव; (२)महात्मना; भगवन्तं;महामनाः(for त्मना),

१७०*अधिकपाठः

आत्मानं दर्शयामास फाल्गुनः परवीरहा।

धृतिमास्थाय महतीं तोलयामास शङ्करम् ।

तावदास्थाय रूपं स्वमुवाच भगवान्भवः ।[1]

स मुहूर्तं तथा भूत्वा सचेताः पुनरुत्थितः ।

रुधिरेणाप्लुताङ्गस्तु पाण्डवो भृशदुःखितः ॥ ५४॥

शरण्यं शरणं गत्वा भगवन्तं पिनाकिनम् ।

मृन्मयं स्थण्डिलं कृत्वा माल्येनापूजयद्भवम् ॥ ५५ ॥[२]

तच्च माल्यं तदा पार्थः किरातशिरसि स्थितम् ।

अपश्यत्पाण्डवश्रेष्ठो हर्षेण प्रकृतिं गतः ॥ ५६ ॥

पपात पादयोस्तस्य ततः प्रीतोऽभवद्भवः ॥ ५७ ॥

उवाच चैनं वचसा मेघगम्भीरगीर्हरः ।

जातविस्मयमालोक्य तपःक्षीणाङ्गसंहतिम्।[3]

श्रीमहेश्वरः

भो भोः फाल्गुन तुष्टोऽस्मि कर्मणाप्रतिमेन ते ।

शौर्येणानेन धृत्या च क्षत्रियो नास्ति ते समः ॥ ५८ ॥[४]

समं तेजश्च वीर्यं च ममाद्य तव चानघ ।

---

(१) (३/४) पपात भूम्यां निश्चेष्टो गतसत्व इवाभवत्;,

(२) (भगवन्तं; मृण्मयं; स्थणडिले; हरं(for भवम्) तथा(for तदा),

(३) (प्रणतं; मनसि; भगवान्(for वचसा); आलक्ष्य (for आलोक्य); तपः(for तत);)
भवः,

(४) श्रीभगवानुवाच; रुद्र उं; भव उं; ईश्वर उं; महेश्वरः; (१)फाल्गुन;,

प्रीतस्तेऽहं महाबाहो पश्य मां भरतर्षभ ॥ ५९ ॥[१]

ददामि ते विशालाक्ष चक्षुः पूर्वऋषिर्भवान् ।
विजेष्यसि रणे शत्रूनपि सर्वान्दिवौकसः ॥ ६० ॥[२]

प्रीत्या च तेऽहं दास्यामि यदस्त्रमनिवारितम् ।
त्वं हि शक्तो मदीयं तदस्त्रं धारयितुं क्षणात्।[3]

– –

ततो देवं महादेवं गिरिशं शूलपाणिनम् ।
ददर्श फाल्गुनस्तत्र सह देव्या महाद्युतिम् ॥ ६१ ॥[४]

स जानुभ्यां महीं गत्वा शिरसा प्रणिपत्य च ।
प्रसादयामास हरं पार्थः परपुरञ्जयः ॥ ६२ ॥[५]

अर्जुनः
कपर्दिन्सर्वदेवेश भगनेत्रनिपातन ।
व्यतिक्रमं मे भगवन्क्षन्तुमर्हसि शङ्कर ॥ ६३ ॥[६]

१७४*अधिकपाठः
देवदेव महादेव नीलग्रीव जटाधर
कारणानां च परमं जाने त्वां त्र्यम्बकं विभुम् ।
देवानां च गतिं देव त्वत्प्रसूतमिदं जगत्।

---

(१) (२)मम चाद्य तवानघ; (३)प्रीतस्तेन (for स्तेऽहं); (४)भरतर्षभ;,
(२) (१)ददामि; (२)दिव्यान्यस्त्राणियैर्भवान्; चक्षु; पूर्वविभावनं; चक्षु; पूर्वं मुनिर्भवान्,
(३)ष्यसे; देवा; (४)देवा देवान्(for सर्वान्),
(३) (अवधां; (for अनिवां); अस्त्रं(for शस्त्रं); क्षम; (for क्षणात्))
(४) (२)गिरीशं; (३)फाल्गुनम्; (४)महाद्युतिः,
(५) (१)जानुभ्यां धरणीं गत्वा; (२)च प्रणम्य; (अ)भिप्रणम्यम्यं;(for प्रणिपत्य); वै(for च);,
(६) (१)सर्वदेवेश,

अजेयस्त्वं त्रिभिर्लोकैः सदेवासुरमानुषैः ।
शिवाय विष्णुरूपाय विष्णवे शिवरूपिणे।
दक्षयज्ञविनाशाय हरिरुद्राय वै नमः ।
ललाटक्षाय शर्वाय मीढुषे शूलपाणये।
पिनाकगोप्त्रे सूर्याय मार्जालीयाय(मङ्गल्याय च) वेधसे ।
प्रसादये त्वां भगवन्सर्वभूतमहेश्वर ॥
गणेशं जगतः शम्भुं लोककारणकारणम् ।
प्रधानपुरुषातीतं परं सूक्ष्मतरं हरम्।(1)

भगवन्दर्शनाकाङ्क्षी प्राप्तोऽस्मीमं महागिरिम् ।
दयितं तव देवेश तापसालयमुत्तमम् ॥ ६४ ॥(२)

प्रसादये त्वां भगवन्सर्वलोकनमस्कृतम् ।
न मे स्यादपराधोऽयं महादेवातिसाहसात् ॥ ६५ ॥(३)

कृतो मयायमज्ञानाद्विमर्दो यस्त्वया सह ।
शरणं प्रतिपन्नाय तत्क्षमस्वाद्य शङ्कर ॥ ६६ ॥(४)

– –

(१) (कण्ठ(for ग्रीव); अपि परं(for च परमं); कारणं च परं जाने; हरं(for जाने); भुवि; प्रभुं(for विभुम्); त्वं(for च); गतिर्देव; गतिं देव; मानवै;(for मानुषै); शिव रूपाय विष्णवे; हरिभद्राय वै; हरिरूपाय वै; (ते); शूलपाणिने; मार्जनीयाय; मङ्गल्याय च; त्वा(for त्वां); सर्वभूत(देव)नमस्कृतं; (त तः); सर्वलोकमहेश्वर; महेश्वरमुमापतिं पुहुषादित्यः श्वादिभ्य; (४)प्रसीद क्षन्तुमर्हसि;,

(२) (१)भजवान्; (२)सम्प्राप्तोहं महां; (३)देव(for तव);,

(३) (१)त्वा(for त्वां); (२)सर्वभन्तगुरुं विभुं; विभुं गुरुं; नमस्कृतं; देवनमस्कृतं; (त); लोकनमस्कृतं (त); भूतमहेश्वरं;,

(४) (१/२) (अ)यम्;(for यद्); यम् (ऽयं); (३) प्रतिपन्नाय; मे प्रपं; त्वां (सं); प्रपन्नोस्मि; (४) प्रसीदस्वाद्य;

तमुवाच महातेजाः प्रहस्य वृषभध्वजः ।
प्रगृह्य रुचिरं बाहुं क्षान्तमित्येव फाल्गुनम् ।। ६७ ।।[१]

परिष्वज्य च बाहुभ्यां प्रीतात्मा भगवान्हरः ।
पुनः पार्थं सान्त्वपूर्वमुवाच वृषभध्वजः ।। ६८ ।।[२]

गङ्गड्किततहटः शर्वः पार्यस्यामिततेहसः ।
प्रगृह्य रुचिरं बाहुं वृत्तं म्रतलाङ्गुलिम् ।। ६९ ।।[३]

देवदेवः

नरस्त्वं पूर्वदेहे वै नारायणसहायवान् ।
बदर्यां तप्तवानुग्रं तपो वर्षायुतान्बहून् ।। ७० ।।[४]

त्वयि वा परमं तेजो विष्णौ वा पुरुषोत्तमे ।
युवाभ्यां पुरुषाग्र्याभ्यां तेजसा धार्यते जगत् ।। ७१ ।।[५]

शक्राभिषेके सुमहद्धनुर्जलदनिःस्वनम् ।
प्रगृह्य दानवाः शस्तास्त्वया कृष्णेन च प्रभो ।। ७२ ।।[६]

लक्षालङ्कारः- शक्राभिषेके सुमहत् इत्यत्र खाण्डववनदाहसमये शक्रेण अभिषेके मेधजलैः सेचने कृते सतीत्यर्थः । शास्ताः हिंसिताः ।

तदेतदेव गाण्डीवं तव पार्थ करोचितम्।

---

(१) (२)प्रहसन्(for स्व); (४)कौरव; भारत; फाल्गुनं,

(२) (युज्य सान्त्वमिदं वच; उवाचेदं (for सान्त्वपूर्वम्); सात्वपूर्वामेदं वच; उवाचेदं वृषध्वजः);,

(३) आरण्य; कैरात; किरातार्जुनीय; किरातार्जुन; शिवार्जुनयुद्धं; किरा तार्जुनीययुद्धं;(for युद्धे मूकवधः);,

(४) (१)श्रीभगवान्; महादेव उं; देवदेव उं; ईश्वर उं; देव (शिव) उं; रुद्र; शङ्कर; देवः,

(५) (२)पुरुषोत्तम; (४)तेजसा; धार्यते; जगद्व्याप्यातितेजसा,

(६) (२)निःस्वनं; (३)शप्तास्; शास्तास्; न्यस्ताम्; शान्तास्(for शस्तास्),

मायामास्थाय यद्ग्रस्तं मया पुरुषसत्तम ।। ७३ ।।

तूणौ चाप्यक्षयौ भूयस्तव पार्थ यथोचितौ।[१]

भविष्यति शरीरं च नीरुजं कुरुनन्दन ।। ७४ ।।

प्रीतिमानस्मि ते पार्थ भवान्सत्यपराक्रमः ।

गृहाण वरमस्मत्तः काङ्क्षितं पुरुषोत्तम ।। ७५ ।।[२]

न त्वया सदृशः कश्चित्पुमान्मर्त्येषु भारत ।

दिवि वा वर्तते क्षत्रं त्वत्प्रधानमरिन्दम ।। ७६ ।।[३]

लक्षालङ्कारः- त्वत्प्रधानमरिन्दम इत्यत्र त्वत्तः प्रधानं श्रेष्ठमित्यर्थः ।

**अर्जुनः**

भगवन्ददासि चेन्मह्यं कामं प्रीत्या वृषध्वज ।

कामये दिव्यमस्त्रं तद्घोरं पाशुपतं प्रभो ।। ७७ ।।[४]

एतद्ब्रह्मशिरो नाम रौद्रं भीमपराक्रमम् ।

युगान्ते दारुणे प्राप्ते कृत्स्नं संहरते जगत् ।। ७८ ।।[५]

लक्षालङ्कारः- एतद्ब्रह्मशिरो नाम रौद्रं भीमपराक्रमम् इतय्त्र पाशुपतास्त्रस्य ब्रह्मशिरो-नामेति कथानात् पशुपतिना साधितं गायत्र्यर्थभूतनारायणास्त्रमेव पाशुपतास्त्रम् ।।

---

(१) (१)एतत्; तत्; तदेव दैवगाण्डीवं; एतत्ते देवगाण्डीवं; (३)च; तद्(for यद्); गुप्तं(for ग्रस्तं) तदिदं ग्रसितं तात; (४)त्वया (for मया); (५)तूणी(for तूणौ); चैव(for चापि); तूणिरावक्षयौ भूयः; (६) तथोचितौ; करों; वधों,

(२) (१)राजर्षे; देवर्षे; ते पार्थ; प्रीतोहं शौर्यभावेन; (२)भवान् (for तव); परा क्रमः; (३)वचनं मत्तः; च वरं मत्त; वरमस्त्रं तं(for वरमस्मत्त); वरं गृहाण मत्तस्त्वं; वरं गृहाण चास्मत्तः; (४)पुरुषर्षभ (मुनिसत्तम); पुरुषोत्तम(for यन्नरर्षभ),

(३) (१)पुरुष;(for सदृशः); (२)भारत(for मानद); (३)वर्तते (for विद्यते),

(४) (१)प्रभो; वरं (for भगवन्); (३/४)दिव्यं घोरं; विभो(for प्रभो),

(५) (१)यत्ते; यत्र; यत्तु(for यत्तद्),

कर्णभीष्मकृपद्रोणैर्भविता तु महाहवः
त्वत्प्रसादान्महादेव जयेयं तान्यथा युधि ।। (1)
ब्रह्मास्त्रज्ञानसम्पन्नैर्भविता मे महाहवः ।
कर्णभीष्मकृपद्रोणैर्भविता तु महाहवः ।।
त्वत्प्रसादान्महादेव जयेयं तान्यथा युधि।

दहेयं येन सङ्ग्रामे दानवान्राक्षसांस्तथा ।
भूतानि च पिशाचांश्च गन्धर्वाथ पन्नगान् ।। ७९ ।।(२)

यस्मिञ्छूलसहस्राणि गदाश्चोग्रप्रदर्शनाः ।
शराश्चाशीविषाकाराः सम्भवन्त्यनुमन्त्रिते ।। ८० ।।(३)

युध्येयं येन भीष्मेण द्रोणेन च कृपेण च ।
सूतपुत्रेण च रणे नित्यं कटुकभाषिणा ।। ८१ ।।(४)

एष मे प्रथमः कामो भगवन्भगनेत्रहन् ।
त्वत्प्रसादाद्विनिर्वृत्तः समर्थः स्यामहं यथा ।। ८२ ।।(५)

लक्षालङ्कारः- त्वत्प्रसादाद्विनिर्वृत्त इत्यत्र विनिर्वर्ते विशेषण निर्वृत्तः सुखी भवामि ।

**भवः**

ददामि तेऽस्त्रं दयितमहं पाशुपतं विभो ।

---

(१) (सु; मे(for तु); तथान्यैर्योधसत्तमैःर)
(२) (१)जयेयं(for दहें); सङ्ग्रामे दानवांश्चैव; (२)दानवान् राक्षसान्; तदा(for तथा); राक्षसांश्च महाप्रभो; (३)यक्षांश्चापि; राज्ञश्वैव (for भूतानि च),
(३) (१)यस्मिन्; यत्र(for यतः); (४) (उ)त मन्त्रिते; (अ)नुर्मत्रिताद; (अ)नु (भि) मन्त्रिते; (अ) ग्निसंनिभाः
(४) (१)यदि(for येन); दुर्योधनेन भीं;,
(५) (१)परम; (for प्रथम); (३)विमर्दे वै; विमर्देषु; विनिर्वृत्तं; रिपून्हन्तुं; विनिर्मुक्तः हि निर्वृत्ते,

समर्थो धारणे मोक्षे संहारे चासि पाण्डव ।। ८३ ।।[१]

नैतद्वेद महेन्द्रोऽपि न यमो न च यक्षराट् ।
वरुणोऽप्यथवा वायुः कुतो वेत्स्यन्ति मानवाः ।। ८४ ।।[२]

न त्वेतत्सहसा पार्थ मोक्तव्यं पुरुषे क्वचित् ।
जगद्विनाशयेत्सर्वमल्पतेजसि पातितम् ।। ८५ ।।[३]

अवध्यो नाम नास्त्यत्र त्रैलोक्ये सचराचरे ।
मनसा चक्षुषा वाचा धनुषा च निपातयेत् ।। ८६ ।।[४]

**लक्षालङ्कारः- मनसा चक्षुषा वाचा इत्यत्र मन्त्रं स्मृत्वा नष्टो भवत्विति ध्याने मनसा, मन्त्री भूत्वा दर्शने चक्षुषा, नष्टो भवेति कथने वाचा ।**

**वैशम्पायनः**

तच्छ्रुत्वा त्वरितः पार्थः शुचिर्भूत्वा समाहितः ।
उपसङ्गम्य विश्वेशमधीष्वेत्यथ सोऽब्रवीत् ।। ८७ ।।[५]

ततस्त्वध्यापयामास सरहस्यनिवर्तनम् ।
तदस्त्रं पाण्डवश्रेष्ठं मूर्तिमन्तमिवान्तकम् ।।

---

(१) श्रीभगवान्; श्रीभगवानुवाच; दूद्र उं; देवदेव उं; भव उं; महादेव उं; (१)ददामि; (२)पूरं; वरं; प्रभो विभो(for महत्); (४)चासि; (ऽ)पि च(for चापि),

(२) (१)तद्(for (ए)तद्); सहस्राक्ष; (for महेन्द्रोऽपि); (२)नापि(for न च); (३)च; (अ) पि(for वा); वापि देवानां; वासवो वायुः (for वाथ वा वायु); (४)न तद् (for कुतो); ज्ञास्यन्ति; ज्ञास्यसि (for वेत्स्यन्ति); मानुषा; (for मानवाः),

(३) (१)त्वया(for त्वेब्द); वीर; तात;(for पार्थ) ) नाल्पतेजसि वै पार्थ; (३)एतद्(for जगद्); वि (हि) नाशयेत्; हि निर्दहेत्; एतद्(for सर्वम्),

(४) (१)अत्र (for अस्य); (३)चैव(for वाचा); (४) निपातिते; निपातयेत्,

(५) (३)उपसङ्गम्य; देवेशम्;(for विश्वेशम्); (४) वचो; अ(थ) सो(for च सो),

उपतस्थे च तत्पार्थं यथा त्र्यक्षमुमापतिम् ।। ८८ ।।[१]

प्रतिजग्राह तच्चापि प्रीतिमानर्जुनस्तदा ।। ८९ ।।[२]

**लक्षालङ्कारः- यथा त्र्यक्षमुमापतिम् इत्यत्र यथा यथावत् ।**

ततश्चचाल पृथिवी सपर्वतवनद्रुमा ।
ससागरवनोद्देशा सग्रामनगराकरा ।। ९० ।।

शङ्खदुन्दुभिघोषाश्च भेरीणां च सहस्रशः ।
तस्मिन्मुहूर्ते सम्प्राप्ते निर्घाताश्चापतन् ।। ९१ ।।[३]

अथास्त्रं जाज्वलद्घोरं पाण्डवस्यामितौजसः ।
मूर्तिमद्वै स्थितं पार्श्वे ददृशुर्देवदानवाः ।। ९२ ।।[४]

स्पृष्टेन त्र्यम्बकेणाथ फाल्गुनस्यामितौजसः ।
यत्किञ्चिदशुभं देहे तत्सर्वं नाशमीयिवत् ।। ९३ ।।[५]

**लक्षालङ्कारः- स्पृष्टं स्पर्शनं तेन ।**

स्वर्गं गच्छेत्यनुज्ञातः त्र्यम्बकेण तदार्जुनः ।
प्रणम्य शिरसा राजन्प्राञ्जलिर्देवमैक्षत ।। ९४ ।।[६]

---

(१) (१)च तत्पा तं पा); र्थ (for महां); (२)तदस्त्रं त्र्यम्बके पुरा पार्थ,

(२) (१/२) पार्थः (for चापि); अरिमर्दन; (for अर्जुनस्तदा),

(३) (१)निर्घोषा; निर्घोषो; घोषश्च; घोषांश्च; (३) निर्घातः(for सम्प्राप्ते); (४) भुवि(for अभूत्);, निर्घाताश्चापतन्मुहु; तदा समभवद् भृशं-ख

(४) (१)प्राज्वलद्; (२)महात्मनः; महौजसः (for (अ)मितौजस), वै स्थितं; धिष्ठितं (for विष्ठितं); पार्थे(for पार्श्वे); मूर्तिमन्तस्थितं पार्श्वे,

(५) (१)स्पृष्टस्य त्र्यम्बकेनाथ; (२)फाल्गुनं; (४)नाशमेयि; वान्; मीयिवत् (वान्); मागतं; तत्सर्वं द्राग्विनीनशत्,

(६) (१)स्वर्गच्छेत्यभ्यनुज्ञात; (२)ग्रहात्मना; त (य) थार्जुनः; (३)राजन्; देवं(for पार्थ); (४) भवम्(for देवम्),

ततः प्रभुस्त्रिदिवनिवासिनां वशी महामतिः गिरिश उमापतिः शिवः ।
धनुर्महद्दितिजपिशाचसूदनं ददौ भवः पुरुषवराय गाण्डिवम् ॥ ९५ ॥(१)

ततः शुभं गिरिवरमीश्वरस्तदा सहोमया सिततटसानुकन्दरम् ।
विहाय तं पतगमहर्षिसेवितं जगाम खं पुरुषवरस्य पश्यतः ॥ ९६ ॥(२)

**अस्मिन् कैरातपर्वणि ३५ अध्याये ९६श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि कैरातपर्वणि शिवप्रस्थाने पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

# ३६. षट्त्रिंशोऽध्यायः

**यमवरुणकुबेरैरर्जुनायास्त्रदानम् । अर्जुनं प्रति शक्रेण स्वर्गगमनचोदना ॥**

**वैशम्पायनः**

तस्य सम्पश्यतस्त्वेव पिनाकी वृषभध्वजः ।
जगामादर्शनं भानुर्लोकस्येवास्तमीयिवान् ॥ १ ॥(३)

ततोऽर्जुनः परं चक्रे विस्मयं परवीरहा ।
मया साक्षान्महादेवो दृष्ट इत्येव भारत ॥ २ ॥(४)

धन्योऽस्म्यनुगृहीतोऽस्मि यन्मया त्र्यम्बको हरः ।
पिनाकी वरदो रूपी दृष्टः स्पृष्टश्च पाणिना ॥ ३ ॥

कृतार्थं चावगच्छामि परमात्मानमाहवे ।

---

(१) (१)त्रिदशं (for त्रिदिवं); (२)द्युतिर्(for मतिर्); (३)दीप्तं; मत्तं; दैत्यं (for दितिजं ); (४) हर; वरं; पुनः (for भवः),
(२) (१)अव्ययम्; अगात्(for ईश्वरम्); (२)प्रवरं; ज्वलनं; पवन(for पतग),
(३) (१) तं क्य सं); त्वेवं; तत्र (for त्वेव); (२) गोवृषं (for वृषभं); (४) ईयिवान् (for एयिं)
(४) (४)इत्यसकृत्प्रभु; (कृद् ब्रुवन्),

शत्रूंश्च विजितान्सर्वान्निर्वृत्तं च प्रयोजनम् ।। ४ ।।[१]

इत्येवं चिन्तयानस्य पार्थस्यामिततेजसः ।
ततो वैदूर्यवर्णाभो भासयन्सर्वतो दिशः ।
यादोगणवृतः श्रीमानाजगाम जलेश्वरः ।। ५ ।।[२]

नागैर्नदैर्नदीभिश्च दैत्यैः साध्यैश्च दैवतैः ।
वरुणो यादसां भर्ता बशी तं देशमागमत ।। ६ ।।[३]

अथ जाम्बूनदवपुर्विमानेन महार्चिषा ।
कुबेरः समनुप्राप्तो यक्षैरनुगतः प्रभुः ।। ७ ।।[४]

विद्योतयन्निवाकाशमद्भुतोपमदर्शनः ।
धनानामीश्वरः श्रीमानर्जुनं द्रष्टुमागतः ।। ८ ।।[५]

तथालोकान्तकृच्छ्रीमान्यमः साक्षात्प्रतापवान् ।
मर्त्यमूर्तिधरैः सार्धं पितृभिर्लोकभावनैः ।। ९ ।।[६]

दण्डपाणिरचिन्त्यात्मा सर्वभूतविनाशकृत् ।
वैवस्वतो धर्मराजो विमानेनावभासयन् ।। १० ।।[७]

---

(१) (१)कृतास्त्रं; (२)आहवे; (for आत्मना); यत्स्पृष्ट; परमात्मना; (३)विनिवृत्य तु तान्सर्वान्; (४)निसिद्धि; निवृत्तं,
(२) (१)वैदूर्यं; (२)शमं; द्योतं; (for भासं); दिशं,
(३) (२)मरुद्गणै; (for च दैवतैः); (४)आगतं; आगतः (for आगमत्),
(४) (४)यक्षरक्षोगणैर्वृतः
(५) (३)अधिप;(for ईश्वर); साक्षात् (for श्रीमान्); (४)द्रुतम् (for द्रष्टुम्); आगमत्; आययौ (for आगत);,
(६) (१)ततो (for तथा); लोकान्तक;(for कृत्); (३) मर्त्यमूर्ति; मूर्तामूर्तं; मृत्युमूर्ति; मूर्त्यमूर्तं; मूर्त्यमूर्त्यं,
(७) (४) (ए)व (for (अ)व),

त्रीँल्लोकान्गुह्यकांश्चैव गन्धर्वांश्च सपन्नगान् ।
द्वितीय इव मार्तण्डो युगान्ते समुपस्थिते ।। ११ ।।(१)

ते भानुमन्ति चित्राणि शिखराणि महागिरेः ।
समास्थायार्जुनं तत्र ददृशुस्तपसान्वितम् ।। १२ ।।(२)

ततो मुहूर्ताद्भगवानैरावतशिरोगतः ।
आजगाम सहेन्द्राण्या शक्रः सुरगणैर्वृतः ।। १३ ।।(३)

पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ।
शुशुभे तारकाराजः सितमभ्रमिव स्थितः ।। १४ ।।(४)

संस्तूयमानो गन्धर्वैरृषिभिश्च तपोधनैः ।
शृङ्गं गिरेः समासाद्य तस्थौ सूर्य इवोदितः ।। १५ ।।(५)

अथ मेघस्वनो धीमान्व्याजहार शुभां गिरम् ।
यमः परमधर्मज्ञो दक्षिणां दिशमास्थितः ।। १६ ।।

**यमः**

अर्जुनार्जुन पश्यास्मांल्लोकपालान्समागतान् ।
दृष्टिं ते वितरामोऽद्य भवानर्हति दर्शनम् ।। १७ ।।(६)

पूर्वर्षिरमितात्मा त्वं नरो नाम महाबलः ।

---

(१) (२)अथ; चैव; अपि (for च स); माताण्डो,

(२) (१)च (for वि); ते भानुमन्ति चित्राणि,

(३) (२)ऐरावणं; (३)महे;द्राण्या,

(४) (१)ऐरावणं; (३)तारकाराज्ञः; इन्दुः; चन्द्र नागराजस्थ; (तारकानाथः); (४) (आ) श्रितः; स्थित;(for (आ)स्थितः); सितमभ्रश्रियान्वित; सिताभ्रमिवचाश्रित,

(५) (१) ख-अर्धमिदं नास्ति, संसाध्याः इत्युत्तरेणान्वयः स्यात्,

(६) (२)इहां (for समां); (४)अर्होथ; अर्हति (for अर्हो हि); दर्शने

नियोगाद्ब्रह्मणस्तात मर्त्यतां समुपागतः ।। १८ ।।

त्वया च वसुसम्भूतो महावीर्यः पितामहः ।[१]

भीष्मः परमधर्मात्मा संसाध्यश्च रणेऽनघ ।[2]

त्वया सह समुद्भूतो महावीर्यः पितामहः ।।

क्षत्रं चाग्निसमस्पर्शं भारद्वाजेन रक्षितम् ।। १९ ।।

लक्षालङ्कारः- क्षात्रं चाग्निसमस्पर्शम् इत्यत्र क्षात्रं क्षत्रसम्बन्धि तेजश्च सुसम्भूतम् ।

दानवाश्च महावीर्या ये मनुष्यत्वमागताः ।

निवातकवचाश्चैव सम्साध्याः कुरुनन्दन ।। २० ।।[३]

पितुर्ममांशो देवस्य सर्वलोकप्रतापिनः ।

कर्णश्च सुमहावीर्यस्त्वया वध्यो धनञ्जय ।। २१ ।।[४]

अंशाश्च क्षितिसम्प्राप्ता देवदानवरक्षसाम्

त्वया निपातिता युद्धे स्वकर्मफलनिर्जिताम् ।। २२ ।।

गतिं प्राप्स्यन्ति कौन्तेय यथास्वमरिकर्षण ।। २३ ।।[५]

अक्षया तव कीर्तिश्च लोके स्थास्यति फाल्गुन ।

त्वया साक्षान्महादेवस्तोषितो हि महामृधे ।

---

(१) (५)त्वया च (स) वसुसम्भूतो; त्वं वा वसुषु सम्भतो; त्वया वसुश्च सम्भूतो ; (६) महावीर्य; (र्य); पितामह; मह्वाबलपराक्रम,

(२) (जेतव्यं (for संसाघ्यं); त्वया (for रणे)र)

(३) (४)मनुष्यत्वमुपागता; ये मानुष्यमुपागता; (५)सङ्ख्याः; दानवाः; त्वत्साध्या; (for संसाध्या),

(४) (१)पितुर्मम सुतश्चैव; (३)च; तु (for स); तु (for सु);सु (तु) महातेजास्,

(५) (१)क्षितिसम्भूता; (२)दानवं; (४)निर्जिताः; निर्जितान्; (५)धर्मज्ञ; दुर्धर्ष; (for कौन्तेय); (६) यथास्वाम्; अरिमर्दन; कर्षण,

लघ्वी वसुमती चापि कर्तव्या विष्णुना सह ।। २४ ।।[१]

लक्षालङ्कारः- लघ्वी वसुमती इत्यत्र वसुमती भूमिः लघ्वी गतभारा ।

गृहाणास्त्रं महाबाहो दण्डमप्रतिवारणम् ।
अनेनास्त्रेण सुमहत्त्वं हि कर्म करिष्यसि ।। २५ ।।

**वैशम्पायनः**

प्रतिजग्राह तत्पार्थो विधिवत्कुरुनन्दनः ।
समन्त्रं सोपचारं च समोक्षविनिवर्तनम् ।। २६ ।।[२]

ततो जलधरश्यामो वरुणो यादसां पतिः ।
पश्चिमां दिशमास्थाय गिरमुच्चारयन्प्रभुः ।। २७ ।।[३]

**वरुणः**

पार्थ क्षत्रियमुख्यस्त्वं क्षत्रधर्मे व्यवस्थितः ।
पश्य मां पृथुताम्राक्ष वरुणोऽस्मि जलेश्वरः ।। २८ ।।

मया समुद्यतान्पाशान्वारुणाननिवारितान् ।
प्रतिगृह्णीष्व कौन्तेय सरहस्यनिवर्तनम् ।। २९ ।।[४]

एभिस्तदा मया वीर सङ्ग्रामे तारकामये ।

---

(१) (१)अक्षया तावकी (ती; का;); कीर्ति; (२) यास्यति (for स्थां); फाल्गुन; पाण्डव; (४) महाहवे,
(२) (१)पार्थोपि (for तत्पार्थो); (२)नन्दन; (३) क-ख-सोपचारं च - सनिवर्तनम, सोपरोधं (for चारं); (४)विनिवर्तनं; सं (च) निवर्तनं; समोक्षवि; (स) निवर्त्तनं;,
(३)(४)उद्गारयत्; चोदीरयत्; उच्चारयत्; (for उच्चारयन्),
(४) (२)दारुणान्; वरुणान्; अ(वि) निवारितान्; अतिमन्त्रितान्; अतिदारुणान्; अरिवारणा for रितान् (४) निवर्तनं,

दैतेयानां सहस्राणि संयतानि महात्मनाम् ।। ३० ।।[१]

लक्षालङ्कारः- तारकामये द्रष्टचक्षुस्तारकाणामामयो यस्मात् तस्मिन् ।

तस्मादिमान्महासत्त्व मत्प्रसादसमुत्थितान् ।
गृहाण न हि ते मुच्येदन्तकोऽप्याततायिनः ।। ३१ ।।[२]

अनेन त्वं यदास्त्रेण सङ्ग्रामे विचरिष्यसि ।
तदा निःक्षत्रिया भूमिर्भविष्यति न संशयः ।। ३२ ।।

**वैशम्पायनः**

ततस्तान्वारुणान्दिव्यानस्त्रानस्त्रविदां वरः ।
प्रतिजग्राह विधिवद्वरुणाद्वासविस्तदा ।। ३३ ।।

ततः कैलासनिलयो धनाध्यक्षोऽभ्यभाषत ।
दत्तेष्वस्त्रेषु दिव्येषु वरुणेन यमेन च ।। ३४ ।।[३]

**प्रीतोऽहमपि ते प्राज्ञ पाण्डवेय महाबल ।**
**त्वया सह समागम्य अजितेन तथैव च ।।**

सव्यसाचिन्महाबाहो पूर्वदेव सनातन ।
सहास्माभिर्भवाञ्छ्रान्तः पुराकल्पेषु नित्यशः ।। ३५ ।।

**दर्शनात्ते त्विदं दिव्यं प्रदिशामि नरर्षभ ।**
**अमनुष्यान्महाबाहो दुर्जयानपि जेष्यसि।।**
**अनेन त्वमनीकानि धार्तराष्ट्रस्य धक्ष्यसि।**

---

(१)(४)महौजसां (for महात्मनाम्),
(२) (२)समुद्धतं; समुद्यतान्; (for समुत्थिं); मत्प्रसादसमुत्थि (छ्रि) तान्; मत्प्रसादमुपस्थितान् (३) ह न; (ए)भिनै; (ए)हि न; हि न (४)जरातिग; प्रजान्तक; (for (अ)ततायिनः),
(३)(४)वरुणेन यमेन,

तदिदं प्रतिगृह्णीष्व अन्तर्धानं प्रियं मम।।

मत्तश्चैव भवानाशु गृह्णात्वस्त्रमनुत्तमम् ।
ओजस्तेजोद्युतिकरं प्रस्वापनमरातिनुत् ।। ३६।।(१)

अनेन त्वमनीकानि धार्तराष्ट्रस्य धक्ष्यसि
महात्मना शङ्करेण त्रिपुरं निहतं यदा ।।
तदैतदस्त्रं निर्मुक्तं येन दग्धा महासुराः ।
त्वदर्थमुद्यतं चेदं मया सत्यपराक्रम ।।
त्वमर्हो धारणे चास्य मेरुप्रतिमगौरव ।

ततोऽर्जुनो महाबाहुर्विधिवत्कुरुनन्दनः ।
कौबेरमधिजग्राह दिव्यमस्त्रं महाबलः ।। ३७ ।।(२)

ततोऽब्रवीद्देवराजः पार्थमक्लिष्टकारिणम् ।
सान्त्वयञ्श्लक्ष्णया वाचा मेघदुन्दुभिनिःस्वनः ।। ३८ ।।(३)

**इन्द्रः**

कुन्तीमातर्महाबाहो त्वमीशानः पुरातनः ।
परां सिद्धिमनुप्राप्तः साक्षाद्देवगतिं गतः ।। ३९ ।।(४)

लक्षालङ्कारः- कुन्तीमातः इत्यत्र कुन्ती माता यस्य स तथोक्तः ।

देवकार्यं तु सुमहत्त्वया कार्यमरिन्दम ।

---

(१) (१)मत्तश्चैव भवानाशु; (३)करं; (४)पुरातनं; अरातिनं; अरातिनुत्; अमित्रहन्,

(२) (२)नन्दन; (३) अ-घ-करस्थमपि, अभि; अधि (for अपि);,

(३) (४) दिव्यं; निःस्वनः;,

(४) (१) क-मातर्; ख-सुत, इव उं (इन्द्र); (२)ईशो नः (for ईशान); प्रतापवान् (for पुरातन); (३) त्वं हि (for परां); (४)तस्माद् (for साक्षाद्),

आरोढव्यस्त्वया स्वर्गः सञ्जीभव महाद्युते ।। ४० ।।(१)

रथो मातलिसंयुक्त आगन्ता त्वत्कृते महीम् ।
तत्र तेऽहं प्रदास्यामि दिव्यान्यस्त्राणि कौरव ।। ४१ ।।(२)

**वैशम्पायनः**

तान्दृष्ट्वा लोकपालांस्तु समेतान्गिरिमूर्धनि ।
जगाम विस्मयं धीमान्कुन्तीपुत्रो धनञ्जयः ।। ४२ ।।

ततोऽर्जुनो महातेजा लोकपालान्समागतान् ।
पूजयामास विधिवद्वाग्भिरद्भिः फलैरपि ।। ४३ ।।(३)

ततः प्रतिययुर्देवाः प्रतिमान्य धनञ्जयम् ।
यथागतेन विबुधाः सर्वे काममनोजवाः ।। ४४ ।।(४)

ततोऽर्जुनो मुदं लेभे लब्धास्त्रः पुरुषर्षभः ।
कृतार्थमथ चात्मानं स मेने पूर्णमानसम् ।। ४५ ।।(५)

**अस्मिन् कैरातपर्वणि ३६अध्याये ४५श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि कैरातपर्वणि देवप्रस्थाने षट्त्रिंशोऽध्यायः ।। ३६ ।।

(कैरातपर्व समाप्तम् )

---

(१) (१)च; तु (for हि); महत (for सुमहत्);,

(२) (२)आगतम्; मम; (for महीम्); (४)सर्वाणि (for दिव्यानि); सर्वश; (for कौरव);,

(३) (१)ततः प्रत्म्य तान्सर्वान्;,

(४) (२)प्रतिमुच्य; मानं; गृह्य; मान्य; (४) कामं (for काम);,

(५) (१)महाराज (for मुदं लेभे); (२)लब्धार्थ०; ०र्षभ; (३) कृतास्त्रम्; एव अथ; इति (for इव); च (४)मेने सं (for स मेने) मानसं;,